कृताः विपोथिताः तत्करोतीति णिचि कर्मणि क्तः॥
ननु च पुष्पितेरुडुपधत्वाच्च पुंसके भावे क्ते कृते
किंत्वे निषेधप्रत्ये पोथितमिति स्यात्॥ ततश्च वि
विधं पोथनं हिंसनं येषां ते इति बहुव्रीहौ वाहिता
ग्न्यादित्वान्निष्ठान्तस्य परनिपाते विपोथिताः स्युः

नस्युः॥ यत उडुपधत्वादिकर्मणोरन्यतरस्यामित्यत्र शब्दि
करणं नाम बोडुपधानां तत्र सूत्रेण ग्रहणं नान्येषामिति स
भयं ज्ञेयम्॥ यद्वा॥ पुथ हिंसासंक्लेशनयोः॥ चुरादिः कर्मणि
क्तः॥ विपुथिता इति पाठः॥ विपुथिता विहिताः संक्लेशिताः
सम्यक् क्लेशिताः बाधिता इति यावत्॥ ८८॥ ॥विमुश्च
केचिद्रुधिरं मुसलेन भृशं हताः॥ केचिन्निपातितो भृ
मौ भिन्नाश्च न क्षेसी॥ ८९॥ ॥केचन महासुराः दे
व्या मुसलेन भृशं अत्यर्थं हताः ताडिताः न्यपतन् चे
मुः इति॥ अतएकहल्मध्ये नादेश्यादेरिति टुवमुद्गि
रणे इत्यस्य नशसददवादिगुणानामिति निषेधादेत्वा
भ्यासलोपौ न स्तः इत्याहुः॥ तेन भूवव वमुरिति वक्तव्यमिति
व्यमिति॥ अत्रे ऋसंदेहुः॥ अतएकहल्मध्येनादेशादे
रासददवादिगुणानां लिटीत्यस्य योगे कृत्वं योगवि
भागादस्यापि निषेधः भवितु॥ ततः वेमुरिति सिद्धं
स्याम्युः स्यादिति॥ ८९॥ ॥निरंतरं रात्रौ चर[illegible]ण

कृताः केचिद्रणाजिरे ॥ शैलानुकारिणः प्राणान् मुमु
चुस्त्रिदशार्दनाः ॥ ७० ॥ ॥ केचित् शैलानुकारिणः
शैलानुस्वगात्रपरिमाणतः अनुकुर्वाणाः पर्वतोपय
मानाः त्रिदिवानां त्रिदशानां अर्दनाः ॥ आर्दयितारः
हिंसका असुराः रणाजिरे रणाग्रे देव्या प्रयुक्तेन नि
रंतरशरौघेण अविच्छिन्नबाणव्यूहेन कृताः छिन्नाः
विद्धाः संसक्तचेष्टाः प्राणान् तत्यजुः मुमुचुः ॥ प्रमु
२४ चन ॥ शराणामोघः शरौघः तेन शरौघेण ॥ कुमि २४
लिचेतिणिचं ॥ निरंतराः निरंतरशराः तेषां मो
घः समूहः तेन निरंतरशरौघेण ॥ निरंतराः शरौ
घेण कृताः केचिद्रणाजिरे ॥ शैलानुकारिणः प्रा
णान् मुमुचुस्त्रिदशार्दना इति वा पाठः ॥ शरौघे
ण प्रतिलोमं कृमं निरंतरा ॥ व्याख्यावयवाः कृताः
सेनानुकारिणः सेनांसेनं अनुपश्यात्कर्तुरी ठं

ततः रणोत्सवोत्साहपटहवादनानंतरं देवी त्रिशूलेन गद
या शराणां वृष्टिभिः खड्गादिभिश्च स्वयामससोधनेश
क्तयः शतशः शतैः शतैः महासुरान् निजघान ॥ नि
तरां जिहिंसा आदिशब्देन यष्टिपरशुकुठारमुद्गरमुस
लकर्तरीकरवालिकाभिंडिपालपरिघदंडकुलीम र
वज्रशक्तिपाशचक्राद्यायुधानि गृह्यंते ॥ ६६ ॥
पातयामास चैवान्यान् घंटास्वनविमो
हितान् ॥ असुरान् भुवि पाशेन बद्ध्वा चान्यानक
र्षयत् ॥ ६७ ॥ ॥ अथ देवी घंटास्वनविमोहितान् घंटा
निर्घोषमूर्छितान् अन्यान् असुरान् भुवि भूमौ पातयामास
प्रस्थं शयामास ॥ अथ च देवी अन्यान् असुरान् पाशेना
कर्षयत् ॥ अकृष्टवती ॥ कृषश्चौ रकस्त्वा चेति चिल
हिरूपं ॥ ननु च नायं परस्पते चु गादौ ॥ यदेवं कर्षयामक
र्षणे शेतु कृवाले कृवाती कृषी ॥ २ सेवं पठ्यते ॥ प्र
वंतीहि भ्वादेः कर्षतेः कर्षणं कर्षः कर्षमकरोत्

छिन्नाः ग्रीवाः शिरोधराः येषां ते तथोक्ताः छिन्नग्रीवाः
सन्तः पेतुः भुवि ॥ तथा देव्या अन्येषाम् असुराणां शिरां
सि पेतुर्भुवि ॥ तथा देव्या अन्ये असुराः वपुषो मध्य
देशे विदारिताः खंडिताः सन्तः पेतुः ॥ भूमौ वा त्रेसुः
असीकल्पेतु विशून् ॥ छिन्नं छातं लूनं कृत्तं दातं दितं
छितं वृक्णं ॥ दारिते भिन्नभेदितौ ॥७१॥ ॥ विच्छिन्न
जंघास्त्वपरे पेतुरुर्व्यां महासुराः ॥ एकबाहुक्षिच
२५ रणाः केचिद्देव्या द्विधाकृताः ॥७२॥ ॥ अपरे तु २५
महासुराः महांतोऽसुराः महासुराः देव्या विच्छिन्न
जंघाः खंडितजंघाकाः सन्तः ऊर्व्यां पृथ्व्यां पेतुः प्र
पतुः ॥ केचित्तु महासुराः युध्यंतः एकबाहुक्षिच
रणाः ॥ एकबाहुकाः एकाक्षाः एकचरणाश्च सन्तो
देव्या द्विधा कृताः खंडिताः ऊर्व्यां पेतुः ॥ अपतन्
बाहुश्च अक्षि च चरणं च बाहुक्षिचरणं युध्यतः प्र

पं

तिमहासुरं संपन्नमेकैकमेव बाहुक्षिचरणं येषां ते ए
कबाहुक्षिचरणाः ॥ द्वंद्वो द्वंद्वं द्वौ ते च श्रूयमाणं व्या
वर्त्तकं प्रत्येकमभिसंबध्यते यथा यथा संपन्नव्री
हियवो ग्रामः ॥ यथाह च व्रीहियववधनाः प्रजाः ॥७२॥
छिन्नेपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ क
बंधा युयुधुर्देव्या गृहीतपरमायुधाः ॥७३॥
अन्ये महासुराः शिरसि छिन्नेपि सति भूमौ पति
ताः सन्तः पुनः तदनु उत्थिताः कं शिरो बध्नंतीति कबं
धाः सन्तः पुनः शिरोधारिणः सन्तः गृहीतपरमायु
धाः आत्तोत्तमशस्त्राः सन्तः पुनः देव्या समं युयुधुः ॥
चिक्षिङो ङि · युदादनुदात्तेत्त्वान्निमित्तादात्मनेपदा
निसत्यां स्वधेतोरनुदात्तत्वेपि परस्मैपदं ॥ अन्यथा
युयुधिरे इत्यात्मनेपदमेव स्यात् ॥ गृहीतपरमा
युधेति हलविसर्गपाठे तु गृहीतापरमा आसमंतात्

यत्र युद्धे यया सा देवी ॥ गृहीतपरमायुधात् तया गृही-
तपरमायुधया देव्या इति लीलीयांतमितत् ॥ कबंधो
स्त्री क्रियायुक्तमपमूर्धकलेवरं ॥ कस्याशिरसः बंधो
त्र कबंधः ॥ कं वधातीति कबंधः ॥ कबंधः क्लिबे रुंउे
युद्धे यो युद्धसुभ्रे पुलसः स्त्रे हूजमूर्द्धसु ॥ तदा वे
गात् कबंधः स्यादेको मूर्धा क्रियान्वितः ॥ ॥ इति क-
बंधलक्षणं ॥ देवीदानवयुद्धे तु कबंधा बुद्धकोटयः ॥ २९
२६ देवीगोषांधकं कारज्वलज्ज्वलनभास्मितः ॥७९॥
नन्तु श्वा परेत तत्र युद्धे तु यत्र लयाश्रिताः ॥ कबंधाः
छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥८०॥
तत्र युद्धे देविदानवसंग्रामे अपरे महासुराः
तत्र लयाश्रिताः वीरवशा वेगावृत्ताः खड्ग
शक्त्यृष्टिपाणयः युध्यमानाः ॥ हर्वदेव्याछिन्ना

येषां ते तथोक्ताः अग्रेसराः शूराः शिरस्यादिभिः देव
हिंसिनः केचिदसुराः रणाजिरे प्राणान् मुमुचु-
र्ययाधु ॥ सेधानुपकारिणि इति क्वचित् पाठः ॥ स्व
धां तिस्त्रियाः शाल्मालुकारिणि इति तु स्वरूपः पाठः ॥
श्वाविच्छल्लम्इत्यभिधानात् ॥ शल्यः शल्यको
भक्ष्यः पंचनखः शरौघेण निरंतराः प्रतिलोमद्रू-
पं व्याप्ताः कृताः विद्धाः अतएव शल्यका इव
शल्यकीकंटक ——— शल्यका इव दृश्यमानाः रणा-
ग्रे प्राणान् मुमुचुः ॥ केचिदसुरा इत्यर्थः ॥ निरंतराः
शरौघेण कृता इति तु पाठे कृताश्चिता इत्यर्थः ॥८०॥
केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ शि-
रांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥८१॥
तथा देव्या केषांचिदसुराणां बाहवो भुजाः छिन्नाः
खंडिताः भुवि पेतुः तथा देव्या अपरे असुराः ॥

मिषु येषां ते स्वकृरी चकृष्टपापाय:॥७४॥ ॥तिष्ठति
ष्ठेति भाषंते देवीमन्ये महासुरा:॥७५॥ ॥अन्ये च म
हासुरा: संग्रामे महासुता:॥ युद्धे तिष्ठ तिष्ठेति देवीं भा
षंते: कथयंत: स्वकीयां महामहिमकां प्रकटयंत: देव्या
स नंयो युद्धमाजग्मुरिति शेष:॥ तिष्ठ तिष्ठेति सर्वत्र वीप्स
योरिति निहते अभीक्ष्ण्य इति द्वि: तस्य द्विर्वचनं॥ भाषंत
२९ इति भाष व्यक्तायां वाचि॥ अनुदात्तेत्वा आत्मनेपदा २८
त्मनेपदस्य चाक्षिडोद्धि: त्वा दनिमत्वा परस्मैपदं
ञान्तप्रत्यय:॥ तिष्ठति ष्ठेति भाषंते इति तु पाठे तु अ
न्ये महासुरा: देवीं तिष्ठ तिष्ठ अधुना अस्मद्दये वृथा स्व
स्थिक्ष्ण च नष्ठीयस इति निर्भर्त्सनं नाम ग्राह मोल्लप
न्निसुरर्थ:॥७५॥ ॥तिष्ठ तिष्ठेति चैवोक्त्वा देव्या व्ययु
युधुर्मध्ये॥७६॥ ॥अन्ये च महासुरा: मध्ये युद्धे
देवीं तिष्ठ तिष्ठेति भर्त्सनमुक्त्वा देव्यैव समं युयुधु:॥

चाक्षिडोद्धि: त्वादनुदात्तेत्वा निमित्तं दात्मनेपदानि प्रत्ता
युध्यते: परस्मैपदं॥ अन्ये तथा युयुधिरे इत्येव स्यात्॥७६॥
तस्मिंस्तथा विलिप्तांगम: संग्रामे रोमहर्षणे॥७७॥
लोमानि रोमाणि हृष्यंत उद्गच्छंति येन तेन लोमहर्षणे
तस्मिन् रोमांचोद्भवकारिणि संग्रामे रुधिरेण शो
णा: स्त्रोणा: ते: रक्तसमूहै: विलुप्तांगा: विलिप्तांगा:
अपरे महासुरा: देवीं तिष्ठ तिष्ठ मा पलायस्वेति भर्त्स
नमुक्त्वैव देव्या समं युयुधिरे॥ रोमांच: रोमपुलको
रोमहर्षणमित्यभिधा ओघो हेमभस्मोरये॥७७॥
पातितै रथैर्नागैर्हयैरसुरैश्च वसुंधरा॥ अगम्या सा
भवत्तत्र यत्राभूत्स महारण:॥७८॥ ॥देव्या पाति
तै: छेदितै: रथै: नागै: गजै: अश्वै: असुरैश्च आ
कीर्णा सा वसुंधरा आगम्या अनधिगम्या गंतुम
शक्या तत्राभवत्॥ कुत्र यत्र स महारण: संग्राम:

देव्यास्तत्र महिषासुरसेन्यानाम भारत॥ पातितैरथैरि
त्यत्र रो रीति रेफलोपः॥ रथसहिता नागाः रथनागाः
रथाः नागसहिताः अश्वसहिताः रथनागाश्वाः
तैः हेतुभूतैर्नागाश्वादेकैवज्ञावः स्यात्॥ वसूनि धा
रयतीति वसुंधरा न गम्या अगम्या अभवत्॥ गमेः
पोरदुपधात्यत्॥ ७०॥ शोणितौघा महानद्यः स
द्यस्तत्र प्रसुस्रुवुः॥ मध्ये चासुरसैन्यस्य वारणासुरवा
२८ जिनाम्॥ ७१॥ ॥किंच तत्र सु असुरसैन्यमध्ये ४८
सद्यः सपदि तत्क्षणे देव्या सह संग्राममारंभक्षणए
व॥ वारणानां गजानां असुराणां देत्यानां वाजिनां
घोटकानां शोणितौघाः रक्तसमूहाएव महानद्यः
सद्यः अपगाः नद्यः प्रसुस्रुवुः॥ विसुस्रुवुरि
त्यर्थः॥ विशेषेण स्रवंति स्म॥ रक्तप्रवाहमय्यः महा
नद्यः बभूवुरित्यर्थः॥ प्रसुस्रुवुः॥ स्रुगतौ॥ शिर

२

शिरसोवीररसावीरेस। विस्फारासंग्रामो पिदेवता
वेशाच्च॥ आविष्कृतच्चेतयाः॥ खंतः पश्चात्तु केशि
रः वधं तिरवं संयथोस्थानं निवेशायंतीति कं वेधाः
सेतः पुनः शिरो धारिणः सेतः नेन्दुः चेसंच कुः
चकारो कांचिद्दृष्ट्वा समेकुमुष्टिरेच॥ तुयैलया श्रिताहि
न्येयंतिता स्वकरेण त्यं हि पाणयो हियुध्यंति॥ ततवी
णादिकं वाद्यं॥ आनद्धं मुरजादिकं॥ वंशादिकंतु सु
षिरं कांस्यतालादिकं घनं॥ तथोक्तं भारते॥ ततं चै
वावनद्धं च घनं सुषिरमेव च॥ चतुर्विधं तु विज्ञेय
मातोद्यं लक्षणान्वितं॥ आतोद्यं कथ्यते॥ चतुर्विध्य
मिदं वाद्यं वादित्रातोद्यनामकमित्यपि॥ यद्यपि स्वरे
तु निस्त्रिंशचंद्रहासासिरिष्टय इति कोशः स्वड्ग
पर्यायः तथाप्याकृतिसंनिवेशविशेषभेदभि
न्नतया पृथगुपन्यस्तः॥ यष्टादेशाः केचिदत्र भु
जाः संतीति खड्गादिभ्यो ष्टभ्यो अष्टस्वपृष्टसुपं

जन् कुर्वन् यथोचितं असुरसैन्यं क्षयं नाशं निन्ये प्रा
पयामास॥ यच्चारम्य ल॥८॥ ॥सोपि क्रुद्धो धुत
सटो देव्या वाहन केसरी॥ चचारासुरसैन्येषु वने
ष्विव हुताशनः॥८२॥ ॥इति अथ वा स च सिंहः क
तोषि विचिन्वति विचिन क्रियायां संबंधिनीयुः॥ स च
सिंहो महानादमुत्सृजं धुत केसरः॥ शरीरेभ्योमरा
रीणामसूनिव विचिन्वति॥८२॥ ॥स च सिंहो देव्याः
२९ सिंहश्च महानादमुत्सृजन् धुत केसरः अमरारी २९
णां सुरद्विषां शरीरेभ्यः सकाशात् असून् प्राणान्
विचिन्वतीव प्राणानुद्धृत्य यादिव॥ प्राणान् सं
हरतिव॥ विचिन्वतीति चिञ् चयने॥ विध्यदे लिङ
र्थे लट्॥ कर्तरि स्वरादिभ्यः श्नुः लेटोस्त॥ एव्ये
टोडाटावालिषः अडागमः छंदसो गुणाभावः॥
इको यणचि॥ नो कितु रुभ्योः सार्वधातुकयण
इतश्च लोपः॥ परस्मैपदेषु इति तु वार्ति नो ग

डुः श्रूयते अथवा विचिन्वतीति सप्तमी॥ स च सिंहश्च धुत
केसरः महानादमुत्सृजन् असुरान् व्यापाद्य तच्छरीरेभ्यः
प्राणान्विचिनोतीवेत्युत्प्रेक्षते॥ त तैश्च तस्मिन् सिंहे
अमरारीणां शरीरेभ्यः सकाशात् असून् प्राणान् वि
चिन्वतीव इतस्ततः संहरतीवेति वस्तादेव्या गणैश्च
तैरसुरैः सह युद्धं कृतं॥ तथा हि॥८३॥ ॥देव्या गणैश्च
तैस्तत्र कृतं युद्धं महासुरैः॥ यथैनां तुष्टुवुर्देवाः पुष्प
वृष्टिमुचो दिवि॥८३॥ ॥तत्र संग्रामभूमौ देव्याश्चं
कि कोपाः श्री विकारोप निश्वास संभूत गणैश्च तैरसुरैः
सह युद्धं कृतं॥ यथा दिवि स्वर्गे दिविषदः पुष्पवृष्टिमुचः
संतः एनां देवीं तुष्टुवुः॥ एवं ता पुष्पाणां वृष्टयः ताः
मुंचंति पुष्पवृष्टिमुचः युद्धं महासुरैः॥ अथैनां तुष्टुवु
रिति पाठे तु देव्या गणैश्च तैस्तत्र युद्धमभूत्मोलेः म
हासुरैः सम्यक् युद्धं कृतं॥ अथ समनंतरं पु
वृष्टिमुचो दिवि देवा दिविषदः॥ एतां युद्धभूमौ नां सा

सगणां अंबिकां तुष्टुवुः ॥ अहो इदं महाश्चर्यं ॥ यो ह्यते
मायाविनो महासुराः ते समस्ते काकिन्येव क्षयावुध्य
ते ॥ महासुरसैन्यान्यप्यनेकानि दशशः शतशः सहस्र
शः अयुतशः लक्षशः नियुतशः कोटिशः कोटिकोटिश
श्चक्षयंतयेकयैव भितानि तद्गणैकवंधा अपि तया अव
कायाबुध्यते ॥ ते च तद्बलारोषहुंकारज्वलज्ज्वलन
ज्वालावलीढाः क्षणे क्षणे भस्मीभवंति ॥ अथ चरण ३०
३० मंडले तद्बलाविरचितप्रचंडचक्राक्रोशि महायोद्
महासुरवपुर्लिंगाद्रुधिरौघमहानद्यः प्रवहंतीति ततो
मिस्तमद्भुताद्भुतचरितां लोकाभ्युदयैकफलोदयां अंबि
कां देवगणाः स्तुवंतीत्यर्थः ॥ ६९ ॥ ॥ इति श्रीमद्दक्षा
त्रिशंभु श्रीमन्नोमरान्वय श्रीमदुधरणात्मज श्रीशांतनु
श्चक्रवर्तिविरचितायां शांतनव्यां चंडीकामहास्यटीका
यां महिषासुरसैन्यवधविध्वंसको नाम द्वितीयोध्यायः
२ ॥ श्रीजगदंबार्पणमस्तु ॥ श्रीरस्तु ॥ मंगमस्तु ॥

उत्सवचक्रुः ॥ ५९ ॥ ॥ क्षणेन तन्महासैन्यमसुराणां
तथांबिका ॥ निन्ये क्षयं यथा वह्निस्तृणदारुम
हाचयं ॥ ६० ॥ ॥ यद्वत् वह्निस्तृणदारुमहाचयं
४ क्षण क्षणेनैव मात्रेण क्षयं विनाशं नयते प्रापयते ॥ त
थातद्वत् अंबिका देवी असुराणां तत् प्रसिद्धं महा
सैन्यं महतीं सेनां क्षणेन क्षणमात्रेण क्षयं विना
शं निन्ये प्रापयामास ॥ नयते द्विकर्मकः ॥ तृणा
नि च दारूणि च तृणदारूणि तेषां महान् चयः
राशिः समूहः तं वह्निर्यथा तथैवेवं साम्यो ॥ ६० ॥
स चापि सिंहो महानादमुत्सृजन्धुतकेसरः ॥ ६१ ॥
न केवलमंबिकैवासुरसैन्यं क्षयं निन्येऽपि तु
सिंहश्च ॥ सप्रसिद्धो देव्याः वाहनीभूतो धुत
केसरः कंपितस्कंधकेसरः सिंहश्च महाना
दं महांतं नादं कठोरवलालकंठगर्जनं उत्सृ

याश्रृंगमिव। नजितस्वनेछिंगेनहीनाधिकतापिवा। उपमादू
दूषणायालंय त्रोद्वेगोन धीमतां॥ क्रियावाचित्वमाख्यातुनेकं
त्रार्थःप्रदुर्शितः॥ प्रयोगतोनुसर्त्तव्याअनेकार्थाहि धातवः॥
यद्वायथातथावैवंसाम्ये॥२॥ तस्यछित्वाततोदेवीलीलयैव
नू वारोत्करान्॥ अद्यानतुरगान्बाणैर्यंतारंचैववाजिनां॥२॥ त
तोनंतरंदेवीसंयामेलीलयैवक्रीडयैव अनायासेनैवतस्य ॥१॥
॥३॥ चिक्षुरसंज्ञस्यमहासुरस्यशरोत्करान्बाणपुंजान्छित्वाखं
डयित्वातुरगान्घोटकान्बाणैर्जघान। अथचबाणैरेववाजि
नांघोटकानांयंतारंसारथिंचजघान। जहिंस। क्रीडालीलाचन
बो र्मच। स्त्रीणांविलासःविब्बोकविभ्रमाललितंतथा। हेलालीले
त्यमीहावःक्रियाःश्रृंगारभावजाः। नियंतावाजियंताचसूतःक्ष
त्ताचसारथिः॥३॥ ॥चिछेदचधनुःसद्योध्वजंचातिसमुछ्रितं॥

विव्याधचैनंगात्रेषुछिन्नधन्वानमाशुगैः॥४॥ ॥सादेवीसद्यः
सपदितत्क्षणएव आशुगैर्विशिखैः धनुःकोदंडंचिछेद। अ
छिदत्। अतिसमुछ्रितंअत्युन्नतंअत्यूच्चतरंध्वजंचकेतनंआशु
गैःचिछेदअछेत्सात्। छिन्नंधन्वधनुर्यस्यसतथाक्तः तंछिन्न
धन्वानंचिक्षुरंमहासुरंगात्रेषुसर्वावयवेषुचआशुगैरेविव्याध।
ताडयामास। व्यधताडने। ग्रिहज्यावयिव्यधीतिसंप्रसा
रणं। आशुगौवायुविशिखौ॥ धनुश्चापौदृढाज्ञेपुंसकेपि
अन्यथाधनुश्चापोधन्वशरासनेकोदंडकार्मुकमिपस्त्रिधा
नात्। पुंस्येवस्यात्। धनुर्वंशाविशुद्धोपिनिर्गुणःकिंकरिष्यती
तिवत्॥४॥ ॥सछिन्नधन्वाविरथोहताश्वोहतसारथिः॥
अभ्यधावततांदेवींखड्गचर्मधरोसुरः॥५॥ ॥सचिक्षुरा
ख्योमहासुरःदेव्याछिन्नंधन्वधनुर्यस्यसःछिन्नधन्वावि
छिन्नःरथोयस्यसःविरथःहताःअश्वाःयस्यसःहताश्वःहतः

सारथिर्यस्य स हतसारथिः इहगयस्थः खड्गचर्मधरः सन्
तां देवीं हन्तुं अन्यधावत् उपाद्रवत् । खुगतौ । सत्तैर्वेगितायां
गतौ धावादेशो वक्तव्यः । यद्येवं सति तेः परस्मैपदत्वादात्म
नेपदं न स्यात् । स्यात्कर्त्रे रिक्रमे व्यवहार इति न स्यात् ।
न गतिहिंसार्थेभ्यश्च इति प्रतिषेधात् । अतश्च अन्वधावत
२ तां देवीमिति पपाठः यद्वा धावु गतिशुद्ध्योरिति येन तस्य २
स्वरितेत्वात् माक्षिकमस्यात्मनेपदमियत्तु अन्यधाव
तां देवीमिति निपाठ पाठं पठिन्तुणां । फलकोत्वी फलं
चर्म । गात्रत्राणं चर्ममयत्वात् चर्म धृञ् धारणे । ध
रतेधरः खड्गश्च चर्म च खड्गचर्मणी । सेनांगत्वादेकवद्भा
वः खड्गचर्मणोधरः खड्गचर्मधरः अन्यथा कर्मण्य
ण् स्यात् ॥५॥ सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्द्धनि ॥
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥६॥ ॥

श्रीगणेशायनमः ॥ ॐ नमश्चंडिकायैनमः ॥ ऋषिरुवाच ॥
सुमेधाः ऋषिः सुरथं राजानं चंडिकामहिमानमाचिवान् ॥
निहन्यमाने तत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चिक्षुरः
कोपाद्ययौ योद्धुमथांबिकां ॥१॥ ॥अथ महिषासुरसेना
नीः चिक्षुरः चिक्षुरसंज्ञकः महासुरः तत्सैन्यं तस्य महिषा
सुरस्य सैन्यं देव्या निहन्यमानं अवलोक्य वीक्ष्य कोपात्यो
द्धुमंबिकां देवीं ययौ जगाम । निहन्यमानमिति वर्त्तमाने
सामीप्ये वर्त्तमानवद्वेति लट् ॥ निहतमित्यर्थः ॥१॥
स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥ यथा मेरुगिरेः शृंगं तोय
वर्षेण तोयदः ॥२॥ ॥स चिक्षुरनामासुरः समरे संग्रा
मे शरवर्षेण निरन्तरप्रयुक्तबाणपातेन देवीं ववर्ष छादया
मास । कः केन कमिव । तोयं ददातीति तोयदः मेघः तोयव
र्षेण सततं प्रबद्धपाथः प्रपिततपातनेन मेरुगिरेः शृंगंय

राख्योऽसुरः शूलं त्रिशूलमायुधं जग्राह । अगृहीत् अ
स्त्री शूलं रुगायुधं ॥८॥ ॥ चिक्षेप च ततस्तत्तु भद्रका
ल्यां महासुरः ॥ जाज्वल्यमानं तेजोभि रविबिंबमि
वांबरात् ॥९॥ ॥ ततस्त्रिशूलग्रहणानंतरं चिक्षु
॥३॥ राख्यो महासुरः तत् आकृष्टहीतं त्रिशूलं भद्रकाल्यां दे ॥३॥
व्या विषये चिक्षेप । अक्षेप्सीत् । क्षिप प्रेरणे । कीदृशं
त्रिशूलं अंबरात् आकाशात् अंबरमाक्रम्यामाक्रम्य
तेजोभिः रविबिंबमिव जाज्वल्यमानं देदीप्यमानं
अत्यर्थं अतितरां ज्वलद्रूपमित्यर्थः ॥ कर्मणि ल्य
ब्लोपे पंचमी ॥ स्वकृयातेजोभिरविबिंबमित्यपरो
रीतिर ल्लोपं ब्लोपे परवे स्पर्द्धी पीणः ॥ तेजोभिरविबिंब
मिवेत्यत्र दीपपाठे पि ध्रुवेः सूर्यस्य बिंबमिवेत्यर्थः ॥ अ
२

वयः शोलमेषा कीदृश्य भिधानात् । अंबरमंततेसनंतं गच्छ
ति अंबरादिति प्राहुः ॥ तेन तु रविबिंब विशेषणं द्रष्टव्यं ।
नद्या चसा कालस्य कालोऽग्निरद्रुस्यस्त्री काली चेति षड्
काली यद्वा काली चंडिका ॥८॥ दृष्ट्वा तरापतच्छूलं देवी
शूलमसुंचत । तेन तच्छतधा नीतं शूलं सच महासुरः ॥९॥
ततश्चिक्षुरप्रयुक्तं आपतत् आगच्छत् शूलं क्रमे दृष्ट्वा दे
थं वीत्वरया यं शूलं अमुंचत । प्रयुक्तवती तेन देव्या अंबिकया
प्रयुक्तेन शूलेन ततश्चिक्षुरप्रयुक्तं शततधा शतप्रकारे
चूर्णितां नीतं प्रापितम् नत्कत । न केवलं चिक्षुर संबंधिशू
लमेव शतधा चूर्णतां नीतं अपितु स चिक्षुराख्यमहासु
रः देव्या प्रयुक्तेन शूलेन शततधा चूर्णितां नीतं नीत
वान् इत्यर्थः ॥ अस्त्री शूलं रुगायुधं । अमुंचत् मुचॢ मो
क्षणे । त्वरितेन ॥१०॥ ॥ हते तस्मिन् महावीर्ये महिषस्य चमू

पतौ। अजगाम गजारूढश्चामरस्त्रिदशार्दनः॥१०॥
महिषस्य महिषासुरस्य चमूपतिः सेना— अपेतस्मिन्
चिक्षुरे चिक्षुराख्ये महासुरे देव्या हते संग्रामे देव्या ह
ते सति चामरो नाम त्रिदशार्दनः अमरहिंसकः महा
सुरः गजारूढः सन् देव्या सह संग्राममपि तु आजगा
॥५८॥ म आययौ आगतवान्। वीर्यबलं प्रभावश्च अर्द
यति हिनस्ति अर्दनः त्रिदशानामर्दनः १० सोपि नि ॥५८॥
क्षिप्तुमोचाथ देव्यास्तामंबिकाद्रुतं। हुंकाराभिहतां भू
मौ पातयामास निःप्रभां॥११॥ ॥अथ सः चामरोपि
चामरनामा महादैत्यः देव्याः प्रतिघातनाय शक्तिं
आयुधविशेषं मुमोच उत्ससर्ज चकार॥ अथांबिका
देवी द्रुतं शीघ्रं सत्वरं हुंकाराभिहतां अत एव निः
प्रभां तां। चामरप्रयुक्तां शक्तिं भूमौ पातयामास भ

अतितरां वेगवान् अतिवेगवान् स चिक्षुरः सेनानी अ
सुरः तीक्ष्णा तिग्मा धारा यस्य तेन तथोक्तेन खड्गेन मं
डलाग्रेण सिंहं आहत्य प्रहृत्य देवीमपि सव्ये वामे भु
जे आजघान प्रजहार। सकर्मकत्वात्सरागकर्मकत्वाच्चा
ङ्गयमहन इत्यात्मनेपदाप्राप्तिर्वामे शरीरे सव्यं स्या
दपसव्यं तु दक्षिणं॥६॥ ॥तस्याः खड्गो भुजं प्राप्य प
फाल नृपनंदन॥ ततो जग्राह शूलं स कोपादरुणलो
चनः॥७॥ ॥सुमेधा सुरथं संबोधयति। हे नृपनंद
न हे राजन् निशामय तत्। तस्याः देव्याः वामं भुजं प्राप्य
चिक्षुराख्यमहासुरप्रयुक्तः खड्गः मंडलाग्रः पफाल।
भिन्नफला विशरणे विशरणार्थ चूर्णीबभूव। विशीर्णो
भूत्। ततः खड्गभंगानंतरं कोपादरुणलोचनः स चिक्षु

तेसति अनंतरं सिंहः पंचास्य उच्चैः समुत्पत्यसम्यगुत्प्लु
त्य गजस्य कुंभौ तयोरंतरं मध्यं तस्मिन् गजकुंभां
तरे स्थितः सन् तेन त्रिदशारिणा सुरद्विषा चामरेण
समं उच्चैर् नितरां बाहुभ्यां प्रवर्तितेन युद्धेन नियु
द्धेन संप्रहारेण युयुधे संप्रजह्रे। युधतेरनुदात्ते
॥५॥ त्वादात्मनेपदं। कुंभौ तु पिंडौ शिरसस्तयोर्मध्ये वि ॥५॥
दुः पुमान्॥१३॥ युध्यमानौ ततस्तौ तु तस्मान्नागा
न्महीं गतौ॥ युयुधातेतिसंरब्धौ प्रहारैरतिदारुणैः॥१४॥
ततौ बाहुयुद्धप्रवर्तितनस्तु युध्यमानौ तौ सिंहचाम
रौ तस्मान्नागात् गजात् संक्रान्तौ महीं भूमिं गतौ
संतौ अतिदारुणैः भयंकरैः प्रहारैः अतिसंरब्धौ

नितरां क्रोधाविष्टौ युयुधाते संग्रामयांचक्रतुः। संप्रवी
रंभिः क्रोधार्थः युयुधाते अतिसंरब्धौ इति छेदः मणी
वादित्वात्प्रगृह्यत्वान्नावादेशक्त्तिभावाभावादेङः पदां
तादिति पूर्वरूपमेव। अथवा शिष्टप्रयोगतः संज्ञापू
र्वको विधिरनित्यः। ओर्गुणानित्यत्वतः स्वायंभुवप्र
योगवत्॥१४॥ ॥ततो वेगात्खमुत्पत्य निपत्य च
मृगारिणा॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतं॥१५॥
ततो युद्धरसावेशात वेगाज्जवात् खं अंतरिक्षं उत्पत्य
उत्प्लुत्य पुनर्वेगान्निपत्य च मृगारिणा मृगशत्रुणा सिं
हेन चामरस्य चामरनाम्नो महासुरस्य शिरो मस्त
कं करप्रहारेण करेण कृतः प्रहारः ताडनं तेन पृथक्

कृतं द्विधाकृतं छिन्नं। प्रवाहजवयोर्वेगो विरुध्रुत्रा निप्र
वर्तने ॥१५॥ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्
हतः ॥१६॥ रणे देव्या शिलाभिः पाषाणैः वृक्षैस्त
रुभिश्चादिशब्दाद्धनुराद्यायुधैश्च उदग्रः उदग्राख्यो
महासुरः हतः अधा निव्यस्तं कृतः ॥१६॥ दंतमुष्टि
॥६६॥ तलैश्चैव करालश्च निपातितः ॥१७॥ ॥करालेना ॥६६॥
मा महासुरः च चाव द्धा — सैन्यः दंतमुष्टितलैः दंतै
मुष्टिभिः तलैः चपाद्दतखड्गाद्यैरायुधैश्च रणे सिंह
नराणैर्दिव्या च निपातितः न्यधा निव्यस्तं कृतः ॥पाणौ
चपेट प्रतल प्रहस्ता विस्तृतांगुलौ। दंतैः सहिता मु
ष्टयः दंतमुष्टयः दंतमुष्टिभिः सहितैः [illegible]लाः दंत

चं ग्रायां चकार ॥११॥ ॥भस्मां शक्तिं निपतितां दृष्ट्वा क्रो
धसमन्वितः ॥ चिक्षेप चामरः [illegible] शूलं बाणैस्तदपि साछि
नत् ॥१२॥ ॥चामरः चामराख्यो महासुरः आत्मयां
शक्तिं आयुधं देव्या भस्मी चूर्णितां भूमौ निपतितां प्र
दृष्ट्वा च दृष्ट्वा क्रोधसमन्वितः अप्रतिहतशक्तिः शक्ति
रघ मदीयाहतं दृग्वस्थामा दिति क्रोधान्मूर्छितः स
न्देवी प्रति शूलं चिक्षेप मुमोच तदपि चामरादेत्य प्रय
क्तं शूलं सा देवी बाणैश्छिनत्। खंडयामास। छिदिर् द्वैधी
करणे। भूतानद्यतने लङ्। छिद्धिः षयेपिक्कुविद्दत्ति।
पुराकल्प एतदासी दिति भाष्यकार प्रयोगाल्लिंग
दियाकु ॥१२॥ ॥ततः सिंहः समुत्पत्य गजकुंभां
तरे स्थितः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारि
णा ॥१३॥ ॥ततस्तु देव्या चामरीये शूलेभिन्ने च चूर्णि

त्रिनेत्रापरमेश्वरीचंडिकादेवीरणेक्रुद्धासतीभिंडिपालेनह
स्ताक्षेप्यलगुडेनबाष्कलंनाममहासुरंजघानाजिहिंस।व्य
स्तंचकार।भिंडिपालंखुगस्तुल्यो।रिष्टिः।चक्रपाणिकाष्ठोच्चाभिं
डिपालस्कगोफणिरितितुभिंडिपालव्याख्यानमम्लमय
व्याख्यानम्।—पेस्यंप्रेक्षावद्भिः॥तथापरमेश्वरीबाणैःताम्रं
नाममहासुरंजघानव्यस्तंचकार।तथापरमेश्वरीबाणैरंधा
॥८॥ कंनाममहासुरंजघानव्यस्तंचकार।तथापरमेश्वरीबाणै ॥८॥
रेवउग्रमास्यंमुखंयस्यतंउग्रास्यनाममहासुरंजघानव्य
स्तंचकार।तथापरमेश्वरीबाणैरेवउग्रंमहावीर्यंयस्यतंउग्र
वीर्यंनाममहासुरंजघान।चक्राद्वाससैन्यंतंव्यस्तंचका
र।विगतःअसवःप्राणाःयस्मात्व्यसुःअव्यसुंव्यसुंतथा
चकारेतिव्यस्तंचकार।त्रिनेत्रंचेतिपाठेपरमेश्वरी।त्रीणि
नेत्राणियस्यतंत्रिनेत्रंनाममहासुरंत्रिशूलेनजघा
न।चक्राद्वाससैन्यंतंव्यस्तंचकारेतिव्याख्यातव्यं।पर
माईश्वरी।त्र्यक्षोतेराशुकर्मणिवरदैत्योपधायाः॥यद्वाप

रमेश्वरस्यस्त्रीपरमेश्वरी॥२०॥बिडालस्यासिनाकाया
त्पातयामासवैशिरः॥२१॥ रणेदेवीअसिनाखड्गेन
बिडालनाममहासुरस्यशिरःमूर्द्धानंकायात्शरी
रात्वेगव्याप्तितःपातयामास।प्रेष्यंयामास।दुर्द्ध
रंदुर्मुखंचोभौशरैर्निन्येयमक्षयं॥२२॥रणेदेवीशरै
र्दुर्द्धरंनामदुर्मुखंचनामउभौमहासुरौकर्मणीय
मक्षयंयमस्यगृहंद्वितीयंकर्मनिन्येप्रापयामास।
नयतिर्द्विकर्मकःप्रयोपक्ष्मणिकल्पांतेःनिलयेऽप्य
येपिच॥२२॥ कालंचकालदंडेनकालरात्रिरपा
तयात्॥२३॥ ॥कालंनाममहासुरंकालरात्रिं
बिकाकालदंडेनआपातयात्॥प्राप्नयत्॥२३॥
उग्रदर्शनमस्त्युग्रैःखड्गपातैरपातयत्॥२४॥उग्रद
र्शनंनाममहासुरंअस्त्युग्रैःखड्गपातैःकालरात्रिं
बिकाआतडयत्तउआधावेशुरारिः२४॥ ॥

असिनेवासिलोमानमछिदत्सारणोत्सवे ॥२५॥
साकालरात्रिरेविकारणोत्सवे असिनेवअसिलो
मानंनाममहासुरंअछिदत्अछेत्सीत ॥२५॥ गणैः
सिंहेनदेव्याचक्षयस्वेजाकृतोध्वैः ॥२६॥ ॥द्वि
जत्वसिंहैनादःस्यात।कालचेसादिश्लोकद्वयंकेचि
त्पठंतिकेचिन्न ॥२६॥ ॥एवंसंक्षीयमाणेतुस्व
॥८॥ सैन्येमहिषासुरः॥माहिषेणस्वरूपेणत्रासयामा ॥८॥
सतान्गणान् ॥२७॥ ॥एवंप्रागुक्तप्रकारेणस्वसैन्ये
आत्मीयसैन्येत्वयंक्षीयमाणेसतिमहिषासुर
स्तदसहमानःसन्माहिषेणमहिषसंबंधिना
महिषाकारेणस्वरूपेणतान्देवीसंबंधिनोग
णान्त्रासयामासउद्वेजयामास ॥ संक्षीयमा
णइतिक्षिस्ययेभ्वादिरकर्मकःपरस्मैपदीइहतु

मुष्टितलाः ते प्राण्यंगत्वादेकवद्भावःस्यात् ॥ दंतोगज
दंतः तेनमितोमुष्टिःक्षुरिकामुष्टिः तस्यतलैःभाग
देशैः क्षुरिकाधाराविशेषैश्चनिपातितेनइत्यपि
व्याख्यानं ॥ केचिद्दंतमुष्टितलैरितिसमस्तपाठेत्व
दंतमुष्टितलंयेषांगणेस्तिमुष्टितलाःतैर्निपाति
ना ताइतिव्याख्याति ॥१७॥ ॥देवीहत्वागदापातै
श्चूर्णयामासचोद्धतं ॥१८॥ रणेहत्वादेवीउद्धतना
ममहासुरंचशब्दात्ससैन्यंगदापातैश्चूर्णया
मास ॥ सपिपेषपरासुमकार्षीत् ॥१८॥ ॥बा
ष्कलंभिंडिपालेनबाणैस्ताम्रंतथांधकं ॥ उग्रास्य ५
मुग्रवीर्यंचतथैवचमहाहनुं ॥१९॥ ॥त्रिने
त्राचत्रिशूलेनजघानपरमेश्वरी ॥[illegible]१॥

द्वे। स तथा अन्यांश्च शृंगाभ्यां विषाणाभ्यां विदारि
तान् भेदितान् गणान् भूमौ पातयामास। दारितेति
न्नभेदितौ। स तथा वेगेन कांश्चित् अपरान् गणान् भू
मौ पातयामास। स तथा महिषः नादेन ध्वनिना
कंठगर्जनेन च अपरान् गणान् व्याकुलचित्तान् भू
॥ ९ ॥ मौ भ्रमणेन पातयामास। स तथा अपरान् गणा ॥ ९ ॥
न् भ्रमणेन परिवेगाग्रतः पार्श्वतश्च भूतले पात
हि यामास। स महिषः तथा अन्यान् गणान् नि
श्वासपवनेन निश्वास एव पवनः वायुस्ते
न पातयामास। भूतले॥ २८॥ ॥ निपात्य प्र
मथानीकं भ्यधावत सोऽसुरः॥ सिंहं हंतुं महा
न्य

देव्याः॥ २९॥ ॥ स च महिषोऽसुरः महादेव्याः अंबि
कायाः प्रमथानां पारिषदानां अनीकानि सैन्यानि
सैन्यानि प्रमथगणान् निपात्य भूमौ नितरां
पातयित्वा तस्याः सिंहं पंचास्यं हंतुं हिंसितुं अभ्य
धावत् अभिमुख्येनाधावत्। आड्वन्। आद्रीकृत।
धावु गतिशुद्ध्योः लङ् स्वरितेत्वादात्मनेपदं। वरू
थिनी बलं सैन्यं चक्रं चानीकमस्त्रियां॥ ततः
प्रमथगणमथनतः सिंहहंतुमागमनतश्च महि
षे महिषासुरे विषये ऽबिका चंडिका कोपं चक्रे
क्रोधं व्यधादित्यर्थः॥ कोपं चक्रे ततो ऽबिका इति॥
सोपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः॥
शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च॥ ३०॥

महावीर्यः समहिषो महासुरः खुरक्षुण्णमहीतलः ॥
स नेयोद्धुं क्रोधात् कोपात् अत्र कूपारं शाकानिधि
ष्ठकृष्टाग्रं स्रोणि नागः स्तन उच्चैर्न्नोलिहान्यास्पगा
न्यां उच्चैर्न्नलिहान् पर्वतान् उच्चैर्न्नलिहं मुकु
टं इति देव्या मुख्यो विक्षेप च । उच्चैः क्षेपसीन । अ
थवो स्वैनै नादश्च । गलगर्जनं चोच्चैश्चकार ॥ वी ॥१०॥
र्यं बलं प्रभावश्च बलं प्राण सामर्थ्यमिह वीर्य
॥१०॥ संपन्नः सबलवान्महिषो ऽतितरामितियावत् ॥२०॥
वेगभ्रमणविक्षुण्णमही तस्य व्यशीर्यत ॥२१॥ ॥
तस्य महिषस्य महासुरस्य वेगेन जवेन युक्तं भ्र
मणं तेन विक्षुण्णा विनोपूर्ण संपिष्टा मही व्यशी
र्यत स्वयमन्मेव विदीर्णाभवत् ॥ श्रृंगसायां

न्मेघगं तोत भोवि लप्यथोऽधिव क्षसांग्ने नाभु
ल्केक्षीयते कर्म ॥ क्षियते चास्य कर्मणीति
यावत् ॥ सकर्म कत्ते स्ति कर्म कर्तरि लुङ्
रोगन चोकर्म वत् ॥ कर्मणा तुल्य इति येको
स्य नेपदः लृत सार्व धातुकयोः दीर्घस्त्र
पं ॥२०॥ ॥ कांश्चितुंडप्रहारेण खुरक्षेपै
स्तथापरान् ॥ लांगूलताडितांश्चान्यान् शृं
गाभ्यां च विदारितान् ॥२८॥ ॥ वेगेन कांश्चि
दपरान् नादेन भ्रमणेन च ॥ निःश्वासपवने
नान्यान् पातयामास भूतले ॥२९॥ ॥ स महि न१०
षासुरः तुंडप्रहारेण तुंड ओष्ठ घातेन कांश्चि
त् कान् गणान् देवी संपज निर्जान् रणा श्च
रान् हतले पातयामास ॥ पुच्छास्त्री लेप श्रृंगा

सप्तशतिः॰ न्नाभ्रखंडखंडं ययुर्घनाः ॥२३॥ ॥घनाभ्रमहां टीकृत॰
तोमेघाः तेनमहिषेणधुतान्यांशृंगान्याविभिन्नाः वि
दारिताः संतः खंडखंडं न्नानूल्लंययुः प्रापुः महिषे
ण धुतशृंगविदारिताः महांतोपिमेघाः खंडप्रकाराः
खंडसदृशाः संतः खंडसादृश्यंययुरित्यर्थः प्रका
रेणगुणवचनस्येति । अधिकस्याल्पसादृश्ययुण
वचनस्येतिद्वित्वम् ॥ खंडखंडं ययुरितिपाठे कर्मधा
॥३१॥ रयवदुत्तरेषु इति विकल्पेन कर्मधारयवत्त्वातिदेशात ॥३१॥
द्विरुक्तयोर्भागयोर्मध्ये पूर्वभागसंबंधिन्याः वि
भक्तेर्लुक् ॥२२॥ ॥श्वासानिलास्ता विशीर्णानि
पेतुर्नभसोऽचलाः ॥ श्वासानिलास्ताः शतशोनि
पेतुर्नभसोऽचलाः ॥ श्वासानिलाहताः शीर्णानिपे
तुर्नभसोऽचलाः ॥२४॥ इतिपाठत्रयं । तस्यमहि
षस्यरोषजाः श्वासा एवं अनिलाः वायवः तैः अ

शो५।

स्ताः क्षिप्ताः अतएवविशीर्णाः चूर्णीभूताः अचलाः
पर्वताः नभसः सकाशात् निपेतुः निपतिताः यद्वा श्वा
सानिलास्ताः शतशः शतंशतंशः संख्यैकवच
नाच्चवीप्सायांशस्प्रत्ययः । यद्वा श्वासानिलाहताः
शीर्णाः श्वसानिलैराहतास्ताडिताः इत्यनुसंधे
यं । शीर्णाः चूर्णीभूताः ॥२४॥ ॥ इतिक्रोधस
मा ध्मातमापतंतं महासुरं ॥ दृष्ट्वा सा चंडिकाको
८ पं तद्वधाय तदाकरोत् ॥२५॥ ॥ इति श्रा गुरुकरि
स्या क्रोधं समाध्मातं क्रोधाग्निसंतप्तं क्रोधेनस
मंताद्याविष्टमासमंतात् दृष्टं अभितं आपतंतं आपा
यांतं महिषासुरं दृष्ट्वा वीक्ष्य तदा तद्वधाय महि
षवधाय महिषं वधितुं हंतुं चंडिकादेवी कोपमक
रोत् ॥ वधार्से हिंसार्थे इति वधि प्रकृते संतरं ज
निवधाभ्येति वधि ग्रहणे दवसीयते तद्वधायेति ॥
तस्य वधनं वधः तद्वधः भावे घञ् ॥

जानिवध्योऽस्येयत उपपायादुर्द्धाभावः ॥ क्रिया
र्थोपपदस्य कर्मणि स्थानिन इति चतुर्थी ॥ तद्
धयिष्यतु कोपं क्रोधमकरोत् ॥ अकुप्यत् ॥ चंडि
का वै ॥ चंडीति चंडते वा चंडिका ॥ ३५ ॥ ॥ सा क्षि
प्त्वा तस्य वै पाशं तं बबंध महासुरं ॥ तत्याज्य
माहिषं रूपं सोपि बद्धो महामृधे ॥ ३६ ॥ ॥ क्षि
यते स्मिन् वीरैः क्षेपं युद्धं तत्र महति मृधे सा
२२ चंडी देवी तावत् तस्य महिषस्य महासुरस्य बधा २२
य वै प्रसिद्धं ॥ वरुणादेवी प्राप्त पाशं आयुधं क्षि
प्त्वा प्रवर्तितं माहिषं माहिषासुरं सं बबंध अथ स
पाशबंधमसौ हि महिषं माहिषरूपं तत्याज्य उपा
क्षीत् ॥ ततो नुससंहतक माहिषाकारे मायया
क्षि तो दृश्यते पशुः ... पोत्री वा प्र
शस्तः प्रथमपक्षे मृगो ... अथ देव्या
पाशेन सोपि बद्धो नाहित ॥ ३६ ॥

न्यादिः परस्मैपदी विपर्वीकर्मकः इहं तु अंतर्भा
वितण्यर्थविवक्षायां विशीर्यते मघः स्वयमेव
विशीर्यते से तु स्वयमेवेति व कर्मकर्त्तरि लि
ड्रूपं ॥ ३१ ॥ ॥ लांगूलेनाहतश्चाब्धिः प्ला
वयामास सर्वतः ॥ ३२ ॥ ॥ किंच तस्य महिषस्य
लांगूलेन पुच्छेन आहतस्ताडितोब्धिः समुद्रः स
र्वतः सर्वत्र पृथिव्यां सकलजनं तां प्लावयामा
स ॥ वारिपूरमग्नां चकार ॥ तसिप्रकरणे आ
द्यादिभ्यः उपसंख्यानमिति याधिकरणे तसिः ॥
यद्वा कर्मणि ल्यब्लोपे पंचमी ॥ सर्वां पृथिवी
प्राप्य सर्वतः सर्वां पृथिवीं प्राप्य प्लावयामा
समज्जयामासस्यथी ॥ ३२ ॥ धुतशृंगविभि

णार्थेभ्यः परे निःश्वाससम्भवो भवत इति वक्तव्यं ॥२८॥
तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥ तं खड्गचर्म
णा सार्द्धं ॥२९॥ ॥ ततः खड्गपाणेः पुरुषस्य दर्श
नानंतरमेव देवी आशु सत्वरं सायकैः आशुगैः खड्
ग चर्मणा सार्द्धं तं खड्गपाणिं पुरुषं कंठे चिच्छेद ॥
खड्गं च चर्म च पुरुषं च सायकैः चिच्छेदेति समुच्चयेन तं
सार्द्धमित्युक्तं ॥ खड्गश्च चर्म च खड्गचर्मं ॥ सेनाग
त्वादेकवद्भावः ॥ तेन सार्द्धं ॥ फलकोऽस्त्री फलं चर्म
चर्मभेद्यं चर्म ॥ गाचत्रापि हस्तग्राह्यफलके ॥३४॥
ततस्सोऽपि महागजः ॥ करेण च महासिंहं तं चक
र्ष जगर्ज च ॥३०॥ ॥ ततः पुरुषपतनतः स कोपेन तु
महासुरः महागजोऽभवत् ॥ स च महागजः करेण ह
स्तेन शुंडादंडेन तं प्रसिद्धं देव्याः वाहनं सिंहं
चकर्ष आकृष्टवान् ॥ जगर्ज च ॥ बृंहितं चकार
बृंहितं करिगर्जितं ॥ गज शब्दार्थेः ॥ भ्वादिः परस्मैपदी ॥
गजः सिंहं चकर्षेति हि महासुरविनाशस्य चकोप
युक्ततः ॥ प्रसिद्धिवैपरीत्यात् ॥ ● ॥ ॥ कर्षतस्तु
करं देवी खड्गेन निरकृंतत ॥३१॥ ॥ ततो देवी तु
पुनः सिंहं कर्षतः आक्षिपतः आहरतः तस्य महासु
रस्य करं शुंडादंडं खड्गेन चंद्रहासेन निरकृंतत ॥ नि
कृत्या छेदने ॥ कृती छेदने परस्मैपदी ॥ यदप्यधुः
कृंतति कृंतनो ॥ इति वेष्टने छेदने कमाल इति ॥ इह
तुदादस मात्मनेपदं ॥ कृषयभ्वादस्य पदमनुकु
र्वंति ॥ अन्यथा निरकृंतदित्येव स्यात् ॥ कर्षत
स्तु करं देवीति पाठे कर्षतो गजस्य सकरः प्रसि
द्धः त करः व्याख्या ॥ इह स महासुरः प्राङ्मु
माह वक्षमः ॥ महिषो भूत्वा ततो व्याघ्रः खड्गपोत्री

हरिः पुमान् ॥ गजोथ महिषो भूयो मायावी स म
हामृधे क्षोवेदयितुं आह ॥ ३१ ॥ ॥ ततो महा
सुरो भूयो माहिषं वपुरास्थितः ॥ तथैव क्षोभ
यामास त्रैलोक्यं सचराचरं ॥ ३२ ॥ ॥ ततः ग
जरूपं तत्तु साग ॥ अनंतरं भूयः पुनरपि महासुरः
माहिषं वपुराश्रितः ॥ आस्थितवान् सन् तथैव पू
२८ र्ववदेव प्राग्माहिषः सन् तथैव त्रैलोक्यं क्षोभया २८
मास क्षोभं प्रापयामास ॥ तथैव सचराचरं त्रै
लोक्यं लोकत्रयं क्षोभयामास ॥ ३३ ॥ भूत इति
ष्टसेवायां ॥ से नानुसरणं गति बिभ्रो मइति क
र्तरि क्तः ॥ आस्थितइति पाठे तु आङ्पूर्व स्थितिष्ठति
प्रतिज्ञानार्थः सकर्मकः ॥ गत्यर्थकर्मकाश्लि
षशीङ्स्थासे यादि कर्तरि क्तः ॥ वपुरास्थितः

ततः सिंहोऽभवेत्सद्यः ॥ ३४ ॥ ॥ ततो महिषादिरूप
परित्यागानंतरं स महासुरः मायावी चालद्धः
सपदि देख्यासमेयो सुःसिंहोऽभवत् ॥ ३५ ॥
यावत्तस्यां बिकाछिरः ॥ छिनत्ति तावत्पुरुषः
खड्गपाणिरदृश्यत ॥ ३६ ॥ ॥ ततः अंबिकादे
वी तस्य मायामयसिंहस्य शिरः कृन्तनं यावत्
तु यावता कालेन छिनत्ति छेत्स्यति तावत् तावद्
वैतावत्येव काले समायावी महासुरः खड्गपा
णिः पुरुषः प्रादुर्भवेत् ॥ अदृश्यत दृक्षत दृश्ये
तिरोषः ॥ यावच्छिनत्तिइति भविष्यतिकाले
यावत्पुरा निपातयोर्लट् [illegible] हेधीकरणे
सेधातिः यावत्तावत्साकल्पेऽवधौ मानेऽवधा
रणे ॥ खड्गःपाणौ यस्य स खड्गपाणिः ॥ प्रहर

जंगमात्मकं त्रैलोक्यं क्षोभयामासेत्यर्थः ॥ य
द्वा चराचरं जंगमसहितं त्रैलोक्यं क्षोभया
मासेत्यर्थः ॥ चर गत्यर्थः ॥ चरिचलिपतिवदी
नामभ्याकाभ्यासस्येति पचाद्यचि वा द्विर्भावे
अभ्यासस्य च आगागमः ॥ आग्विधिसामर्थ्या
द्धलादिशेषभावः ॥ अन्यथा ह्यागमादेशयो
र्द्वित्वाभावादागमलिंगमपार्थकं स्यात् ॥
चरेश्च जंगमं चरं च सम्मिगं चराचरं ॥ ३३ ॥

ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३४ ॥
पीतपेयपानं कर्मणि ल्युट् ॥ ततस्त्रैलोक्यक्षोभ
णतः जगन्माता जैता जननी जगद्धिता चं
डिका देवी क्रुद्धासती अत एवारुणलोचना

॥

अरुणलोचनेयस्याः सा उत्तममुत्तमं पानं मधु
पुनः पुनः पपौ पानेनलीलया मध्वेव पपौ ॥ पुनः
पुनश्च जहास एव युद्धं तृणगणयामास ॥ हास हसने
लिट्यत्तपोर्णल् ॥ पापतविहितउर्णलि ॥ वीरपानं
चकारेत्यर्थः ॥ वीरपानं तु यत्पानं वृत्ते भावि निवा
रणे ॥ वीराणां कर्त्तव्यं मद्यपानं वीरपानं ॥ मुहुः पु
नः पुनः शश्वदभीक्ष्णमसकृत्समाः ॥ घटयुता
युतो स्नानं मधु मासो पद्राक्षं ॥ एकैकश्वास तश्चं
डी पपौ वसरणौ सव ॥ ३४ ॥ ननर्द चासुरः सो
पि बलवीर्यमदोद्धतः ॥ विषाणाभ्यां च चिक्षेप
चंडिकां प्रति भूधरान् ॥ ३५ ॥ बलेन सा
मर्थ्येन वीर्येण प्रभावेन तेजसा मदेन हर्षेण
गर्वेण च उद्धतः ॥ अविनीतः निर्भयो दृप्त

टः। समहिषः असुरोपि च ननर्द च कंठगर्जनं चका
र॥ ननर्द गर्जशब्दो च चंडिकां प्रति भूधरान् गिरीन्
विषाणाभ्यां शृंगाभ्यां चिक्षेप च॥ प्रक्षिप्तवान्
अविनीतः समुद्धतः स्वेच्छया सामर्थ्यं सैन्येषु
बलनाशकसीरिणो॥ वीर्यबलं प्रभावश्च॥
सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः।
१६ उवाच तं मदोद्धूतमुखरागाकुलाक्षरं॥ १६
सा चेति कोप तेन महिषेण महासुरेण प्रहिता
न् क्षिप्तान् तान् भूधरान् गिरीन् शरोत्करैः उत्से
पैः प्रक्षेपणैः चूर्णयंती निष्पेषयंती सती तं म
२० हिषासुरं मदरागाकुलाक्षरं यथा स्यात्तथा उवाच॥
मदात् मधुपानजात् उद्धूतो मुखरागः कषाय
भावस्तेन आकुलानि अक्षराणि वर्णा यस्मिन्

मद्धोद्धूत

आगीछूतकानूसनुत्रैलोक्यं क्षोभयामासेत्यर्थः॥
अस्यके सा विसर्गे पाठे तु आउ स्थः प्रीति ज्ञाने
इश्वास्त्रलिपदं॥ कर्तरीत्वद्भु॥ स्वेच्छया धोदिद्धे सा
कारूस्यइ हंसिचः किंचच॥ तेन गुणाभावः कृ
स्वादगास्तितसिचोलोपः॥ त्रैलोक्यं सचराचर
मित्यत्र त्रयो लोकाः त्रैलोक्यं चातुर्वर्ण्यादित्वा
त्स्वार्थे ष्यञ्॥ सह लिंगेन तु समहासुर इत्यर्थः॥
चराश्च देवाद्यः अचराश्च पर्वतादयः चरा
चरं॥ सर्वो द्वंद्वो विभाषया एकवद्भवति॥ चराच
रात्मकं त्रैलोक्यं समहासुरः क्षोभयामासे
त्यर्थः॥ यद्वा चराचरश्च चराचराः तैः सहि
तं त्रैलोक्यं क्षोभयामास तत्कीदृशं चरा
चरं॥ चरं जंगमात्मकमित्यर्थः॥ समहासुरः

गर्ज गर्ज यावदहं मधु पिबामि यावत् तत्क्षणेन मधुपा स्यामि
तावत्तत्क्षणं त्वमपि कं० गर्जनं कुरु ॥ कुरु ॥ तावदेव
तवायुः ततः क्षणांतरे मया देव्या त्वयि हते महिषासु
रे अस्मिन्कुले सति अत्रैव संग्राम भूमावेव ॥ अत्रैव
स्मिन्क्षणे वसरे आशु अवलंबितं देवताः इंद्रा
दयोपि देवाः गर्जिष्यंत्याशानंदतो गास्यंति गर्जितावे
ल इदं पिबामीति पापाने भविष्यति काले यावत् ॥ पुरा
निपातयोर्लट् ॥ अतिहीनम् ० यथाजातं ॥ मृत्यैधे वे
चत्वारिंशः ॥ ॥ ऋषिरुवाच ॥ ॥ ऋषिः सुरथं रा
जानं वाक्यमूचिवान् ॥ ३८ ॥ ॥ एवमुक्त्वा समुत्पत्य
साऽऽरूढा तं महासुरं ॥ पादेनाक्रम्य कंठे च शूलेनैन
मताडयत् ॥ ३९ ॥ ॥ सा देवी एवं उक्त्वा समुत्पत्य
उत्प्लुत्य तं महिषं महासुरं आरूढा आरूढ० वलीसती ॥
एनं महिषं महासुरं कंठे च कंठप्रदेशे एवमेकेन पा

देन आक्रम्य शूलेनायुधेन अताडयत् ॥ तड आघाते चु
रादिः आरूढा हेतुगर्भ गत्यर्थाकर्मकेष्वादिना कर्त्तरि क्तः ॥
एनमित्यत्रादेशो रूपभेदमेतदोरन्यतरस्यां ॥ ३९ ॥ ॥
ततः सोपि पदाक्रांतस्तया निजमुखात्ततः ॥ अर्द्धनि
ष्क्रांत एवासीद्देव्या वीर्येण संवृतः ॥ ४० ॥ ॥ ततोनं
तरं महिषो महासुरः तया देव्या पदा पादेन आक्रांतः
शूलेन ताडितः सोपि ततः तस्मात् निजमुखात्
आत्मीयात् मुखात् महिषवक्त्रात् स कारणात् अ
र्द्धनिष्क्रांत एव अर्द्धेन शरीरेण निर्गतः देव्याः वी
र्येण बलेन सामर्थ्येन संवृतः संछादितः संभितः
आसीत् ॥ तथैव तेन वसं क्षणे निष्क्रांतः ॥ वीर्यं ब
लं प्रभावश्च ॥ अर्द्ध निष्क्रांतः ॥ अर्द्धेनैव निष्क्रांतः ॥
अर्द्धनिष्क्रांत एवासौ युध्यमानो महासुरः ॥ त
या महासिना देव्या शिरश्छित्वा निपातितः ॥ ४१ ॥

असौ महासुरः महिषवक्त्रात्तु अर्द्धनिष्क्रान्तः शरीरस्या
र्द्धगतः युध्यमानः युद्धं कुर्वन्नेव तयादेव्या भगव
त्या महासिना मंडलाग्रेण शिरस्तस्यासुरस्योत्तमां
गं छित्वा भूमौ निपातितः ॥ शरीरस्यार्द्धनिष्क्रान्तः अ
र्द्धनिष्क्रान्तः विशेषेण समासः शरीरस्यार्द्धेन नि
ष्क्रान्तोर्द्धनिष्क्रान्तः कर्तृकरणे कृता बहुलमिति स
मासः ॥ अर्द्धेन निष्क्रान्तो देहभागो यस्यासौ र्द्धनि
ष्क्रान्त इति बहुव्रीहौ तु वाहिताग्न्यादिष्विति निष्ठां
तस्य परनिपातः ॥ मात्रार्द्धेन हंसकृष्णमिति समासः ॥
अर्द्धनिष्क्रान्तस्येति ॥ निग्रहप्रसंगात् ॥ ४९ ॥
एवं स महिषो नाम ससैन्यः ससुहृद्गणः ॥ त्रैलो
क्यं मोहयित्वा तु तया देव्या विनाशितः ॥ ५० ॥
एवमुक्तरीत्या महिषो नाम प्रसिद्धः स महासुरः
सैन्यसहितः ससैन्यः सुहृद्गणसहितः सुहृद्गणः
त्रैलोक्यं त्रीन् लोकान् मोहयित्वा मोहं दुःखं प्रा

कर्मणि वचनमेतत् ॥ मदोद्धतं मुखरागाकुलाक्ष
रं ॥ कुलं क्रियाविशेषणानां कर्मत्वं ॥ नपुंस
कैकत्वं च वक्तव्यं ॥ यद्वा मदोद्धृतं मुखरागादे
वी मदेन मधुपानजेन उद्धृतो जातो मुखे रागः के
षा प्रभा वा यस्याः सा तथोक्ता आकुलाक्षरमि
ति क्रियाविशेषणं ॥ अकुलानि व्याकुलानि
अस्पष्टानि अक्षराणि यस्मिन् कर्मणि तत्
अकुलाक्षरं अस्फुटाक्षरं ॥ ॥ श्रीदेव्युवाच ॥
किंचिदुवाचेशा हि ॥ ५५ ॥ ॥ गर्ज गर्ज क्षणं मूढ
मधु यावत् पिबाम्यहं ॥ मया त्वयि हतेत्रैव ग
र्जिष्यंत्याशु देवताः ॥ ५६ ॥ ॥ अत्र या कुला
क्षरमुवाच तत् कथयति गर्ज गर्ज इत्येवं प्रतिपद
मस्फुटाक्षरं देव्योक्तं ॥ ओं जिणातु तत् स्फुटस्या
र्थ संगमयति ॥ हे मूढ हे अज्ञ त्वं क्षणं तावत्

स्तस्याक्रोपपीडयोः॥ भ्रः आप्ता बाहुना पदी चुमर्दि
त धृष्टाहिंतिनिज भाव पक्षे कर्तरि क्तेरूपं॥ योगवि
भागात्समासः॥ उद्धृतं हतं तेन निर्दिष्टं॥४१॥
ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्॥ प्रहर्षं
च परं जग्मुः सकला देवतागणाः॥४२॥ ततो
महिषासुरवधानंतरं यत्किंचिद्दैत्यसैन्यं नना
१९ ~~श~~ तेषां अवशिष्टमल्पं स्वल्पं तदपि हाहाकृतं १९
हाहा इति ससंभ्रमं दीनभावेन हृतं आकृतिं तस्य
ननाश नाशं ग आदर्शने॥ अदर्शनं अभावः नष्टम
भूत्॥ किं च देवतानां गणास्ते सकलाः सर्वे वि
परं मुत्कृष्टं प्रहर्षं संतोषं जग्मुश्च प्राप्तवंतः॥
हा विषादशुगार्तिषु॥ चायद्दोभयंत इति वक्ष्यमा
संभ्रमेण प्रवृत्तिश्चापलं॥ हाहा इति संभ्रम

प्रभृत्यादीनत्वेन कृतमननार्थं ननाश दैत्यसैन्यमि
त्यर्थः॥४२॥ ॥तुष्टुवुस्तां सुरा देवीं सह दिव्यै
र्महर्षिभिः॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरो
गणाः॥४३॥ ॥अथ तां देवीं सुराः इंद्रादयः
दिवि भवैर्दिव्यैर्महर्षिभिः सहसहिताः स्तुष्टु
वुः॥ स्तुतवंतः॥ सुनारदादिव्यासमहर्षयश्च
देवीं स्तुतवंत इत्यर्थः॥ अथ गंधर्वपतयश्च ज
गुः॥ हाहाहूहू प्रभृतयः॥ गंधर्वाः गायकाः ते
षां पतयो गाने विचक्षणाः तुंबुरुप्रभृतयः॥
तवंतो गायं चक्रुः॥ अथ अप्सरोगणाश्च ननृ
तुः॥ उर्वशीप्रभृतयः स्वर्वारांगनाः अप्सरसः
तासां गणाः नृत्यवंतो देवीविजयमहोत्सवे॥

न्वति ॥ च विक्षेपे ॥ नाघे लिट् ॥ उस् ॥ ५३ ॥ ॥
इति श्रीमद्भोजाधिराजश्रीमच्चोमशान्वये श्रीम
दुम्बरणाम्नुज श्रीशान्तनुभूचक्रवर्ति विरचि
तायां शान्तनव्यां चण्डिका महास्पष्टटीकायां महि
षासुरवधो विद्युत्पलक्षितस्तृतीयोध्यायः ॥ ३ ॥
 श्रीजगदम्बार्पणमस्तु ॥ श्रीरस्तु ॥ मंगलम् ॥

॥ ५०म

पर्यन्तं तलो युद्धं कुर्वाणो देव्या तया भगवत्या तु विनाशितः ॥
विनाशं प्रापितः ॥ महाकाव्यं निपातितं इति किंचित्स्प
ष्टः ॥ महान् क्रोध इति व्युत्पत्त्या महती काली दुर्गा तया
वा निपातितः परस्तु कूलं ॥ त्रैलोक्यस्थैः स्तदा भू
तेर्महिषे विनिपातिते ॥ जयेत्युक्तं तदा सर्वैः सदेवासु
रमानुषैः ॥ ५१ ॥ ॥ तदा तस्मिन्समये देव्या महि
षे महासुरे विनिपातिते सति त्रैलोक्यस्थैः सर्वैः पु
रुषैः देवी प्रति जयलोके को उक्त एषा वर्तस्वेत्युक्तं ॥ त्रै
लोक्ये त्रैलोक्यस्थैः सर्वैः पुरुषैः सदेवासुरमानुषैः
देवाः स्वर्लोकस्थाना इन्द्रादयः असुराः पाताल
लोकस्थाना बलिप्रभृतयो मानवाः भूर्लोकस
स्था ब्राह्मणादयः तैः सहिताः तैः पुनः किं दृशैः
त्रैलोक्यस्थैः सर्वैः पुरुषैः तदा भूतैः तस्मात्
महिषासुरात् आहताः पीडां प्राप्तवन्तः तैः उ

त्मनि सुरारिबले च निहते वधिते सति प्रणतिनम्रशि
रोधरांसाः प्रहर्षपुलकोद्गमचारुदेहाः शक्रादयः
सुरगणाः तां देवीं वाग्भिः तुष्टुवुः॥ स्फुलत्वंतः।
वीर्यं बलं प्रभावश्च॥ प्रणतिभिः नम्राः शिरोधराः
शं: शिरोधराः कंधराः ग्रीवाः अंसाः स्कंधाः भुजशिरां
२ सि च येषां ते तथोक्ताः धरंतीति धराः शिरसां धराः २
शिरोधराः प्रहर्षेण प्रमोदेन पुलकाः रोमांचाः ते
षामुद्गमः प्रादुर्भावः तेन चारवः मनोहराः देहाः ये
षां ते तथोक्ताः वाग्भिरिति चतुर्विधाभिर्वाणीभिः
दृष्टश्चेव लुष्टयी शब्दानां प्रवृत्तिः जातिशब्दा गुण
शब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्च चतुर्धा इति॥ अन्ये
त्वाहुः॥ द्रव्यं गुणं क्रियां जातिमाहुर्गोशब्दाश्चतुर्वि
धाः॥ यदृच्छया प्रयुक्तोस्यः संज्ञाशब्दास्तु पंचमाः
अपरे त्वाहुः॥ वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगो

चरा॥ द्योतितार्था च पश्यंती सूक्ष्मा ह्यतिः चतुर्विधा या
गुच्यते॥ शब्दानां निष्पत्तिर्यस्याः सा शब्दनिष्प
त्तिः॥ घटः पटः रूपा वाक् वैखरी कथ्यते श्रुतिगो
चरा श्रोत्रग्राह्या वाक् मध्यमेत्युच्यते॥ द्योतितो
र्थो यया सा द्योतितार्था ज्ञानरूपा वाक् पश्यंति
कथ्यते अनपायिनी ब्रह्मरूपा वाक् सूक्ष्मेति कथ्य
ते॥२॥ ॥देवा ऊचुः॥ स्फुरद्रूपयुक्ताभिर्वचनैर्नि
देव्या यया ततमिदं जगदात्मशक्त्या निःशेष
देवगणशक्तिसमूहमूर्त्या॥ तामम्बिकामखिलदे
वमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि
सा नः॥३॥ ॥निःशेषदेवगणशक्तिसमूहमू
र्त्या यया देव्या आत्मशक्त्या स्वशक्त्या इदं जग
त् ततं॥ प्रपंचितं तामखिलदेवमहर्षिपूज्यां

सप्तश०

अंबिकां चंडिकां देवीं भक्त्या आनताः स्म ॥ सा नो
स्माकं शुभानि विदधातु । करोतु ॥ तु हि च स्म
वै पादपूरणे ॥ निःशेषाः सर्वे देवाः तेषां गणाः
तेषां शक्तयः तासां समूहाः तद्वन्मूर्तिर्यस्याः
सा तथोक्ता ॥ अखिलाः सर्वे देवाः महर्षयश्च
तैस्तैश्च पूज्यां पूजनीयां आनताः वयं भक्ति
२ प्रह्वाः ॥ ३ ॥ यस्याः प्रभावमतुलं भगवाननं २
तो ब्रह्मा हरश्च न हि वक्तुमलं बलं च । सा
चंडिकाखिलजगत्परिपालनाय नाशाय
सुर चाशुभभयस्य मतिं करोतु ॥ ४ ॥ यस्याः
देव्याः अतुलं अनुपमं प्रभावं बलं च वक्तुं
साकल्येन वर्णयितुं ब्रह्मा च चतुर्मुखः भ
गवान् षड्गुणैश्वर्यसंपन्नः अनंतः विष्णुः ह

श्रीगणेशाय नमः ॥ ऋषिरुवाच ॥ ॥ सुमेधाः ऋ
षिः सुरथं राजानं वाक्यमुक्तवान् ॥ ततः सुरगणाः
सर्वे देव्या इंद्रपुरोगमाः ॥ स्तुतिमारेभिरे कर्तुं नि
हते महिषासुरे ॥ १ ॥ चंडिकया रणे महिषासुरे नि
हते सति ततोनंतरं इंद्रपुरोगमाः शक्रप्रमुखाः
सर्वेपि सुरगणाः देव्याः स्तुतिं कर्तुं आरेभिरे ॥ उप
क्रांतवंतः ॥ रभ राभस्ये ॥ आत्मनेपदरूपं लिट् ॥
पुरोगच्छतीति पुरोगमः इंद्रः पुरोगमो अग्रेसरो
येषां ते तथोक्ताः पुरोगमः पुरोगामी ॥ १ ॥ ॥ श
क्राद्यः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि
सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशि
रोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः
॥ २ ॥ ॥ रणे देव्या चंडिकया तस्मिन् अतिवीर्ये सुरा ये
रिबले महिषासुरसैन्ये च तस्मिन् अतिवीर्ये दुरा

स्वयं तां लोकानताः प्रणताः वयं अतस्त्वं पापात्म
कं विश्वं अलक्ष्मी सती परिपालय ॥ हे देवि कृत
धियां शास्त्रजनितधियां ज्ञानिनां हृदये बुद्धिया
बुद्धिरूपा तु अस्ति भविष्यति स्वयं तां लोकानता
प्रणता वयं ॥ अतस्त्वं कृतबुद्ध्यालकं विश्वं बु
२ द्धिः सती परिपालय ॥ हे देवि सतां सज्जनानां हृ
दये पुण्या श्रद्धा सत्कर्मनिष्ठाऽस्ति भविष्य २
ति स्वयं तां लोकानताः प्रणता वयं ॥ अतस्त्वं शा
स्त्रोक्ता श्रद्धा सती सदालसकं विश्वं परिपालय ॥
हे देवि कुलजनप्रभवस्य सतां जनानां कुलज
नो प्रभूतस्य लोकस्य हृदये या लज्जा अस्ति ॥
अस्ति भविष्यति स्वयं तां लोकानताः प्रणताः वयं ॥

अतस्त्वं सत्कुलाचारसंरक्षणसज्जा लज्जा स
ती सत्कुलप्रभवात्सकं विश्वं परिपालय ॥ स्व रा
बः पादपूरणे ॥ स्वयम स्वयं ॥ सुकृतं अयः शुभा
वहो विधिः यस्मिन् कर्मणि ॥ नमने परिपाल
ने वा नवर्त ॥ स्वयमिति क्रियाविशेषणं नपुंस
कलिंगं ॥ ५ ॥ ॥ किं वर्णयाम तव रूपमचिं
त्य मेतत्किं चातिवीर्यमसुरक्षयकारि भूरि ॥ किं
चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसु
रदेवगणादिकेषु ॥ ६ ॥ ॥ असुराश्च देवाश्च
असुरदेवाः शाश्वतीकविरोधः विविधक्षायां
लु असुरदेवेति षष्ठी ॥ मनुष्याणां च देवानां च गणाः
आदयो येषां ते मनुष्यादीनां तेन तथोक्ताः तेषु ॥

अज्ञाघदंतभिमसुरशकस्य सर्वेप्रयोगः॥ अ
ज्ञाघदंत सादृश्येति तिसा च असुरदेवगणा
दिकेष्विति पाठः सप्तमी॥ हे देवि सर्वेषु असुरदे
वगणादिकेषु तव अद्भुतं रूपं अचिंत्यं मनसा
पिचिंतयितुं स्वप्नेमशक्यं एतत्तव मनोहरं
४ रूपं वाचा किं वर्णयाम॥ वर्ण वर्णक्रियायां चु
रादिः लोउत्तमः मनसापि स्वप्नेमपि नशक्यं ६
तत्र वाचा किं वर्णयितुं शक्यं स्यादिति भावः॥
हे देवि तव भूरि अधिकं असुरक्षयकारि अतीव
वीर्यं च किं वा वर्णयाम यन्मनसाप्यचिंत्यं स्या
त्॥ वीर्यं विक्रमं प्रभावश्च॥ हे देवि सर्वेषु असुरदे
वगणादिकेषु आहवेषु संग्रामेषु ते यान्यद्भुता
नि चरितानि वीरकर्माणि किं वा किं वर्णयाम वाचा॥

रस्ति नालं नहि समर्थः॥ हि प्रसिद्धमेतत्॥ सा चं
डिका देवी अखिलजगत्परिपालनाय अशुभ भ
भयस्य नाशाय च मतिं करोतु॥ अखिलं जग
त् पालयितुं अशुभो यो भयं नाशयितुं च स्वये
स्वांतं दत्तावधानं करोतु प्रभावः प्रभुत्वं स्थो
ल्यसामर्थ्ये सैन्येषु बलं॥ अशुभभयस्य
अशुभकायस्येति च वा पाठः भवतु दयः॥४॥
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पा
पात्मनां कृतधियां हृदयेषु बुद्धिः॥ श्रद्धा
सतां कुलजनप्रभवस्य लज्जा तां त्वां नता
स्म परिपालय देवि विश्वं॥५॥ ॥हे देवि
सुकृतिनां पुण्यवतां भवनेषु गेहेषु
या श्रीः संपत्तिरभूत्॥ लक्ष्मीर्भविष्यति

मायारूपत्वात् ॥ हे देवि त्वं अपारा ॥ अनवधिरनं
तापर्यंत ॥ रहिता ॥ हे देवि त्वं सर्वाश्रया सर्वैः आ
श्रयो यस्याः स्या तथोक्ता आश्रिय ते आश्रया
सर्वस्याश्रया सर्वाश्रयापि ॥ हे देवि इदं अखि
लं जगत् तथैवां राशर्फतं मायायतोऽज्जगतः अं
शरूपेण संपन्नं अंशानुकृतं प्रापदितवा अंश
५ कृतं ॥ हे देवि त्वं अव्याहृतासि केनापि [redacted] ५
न व्याहृतासि पदेन वाक्येन वा यतो वाचो
निवर्त्तंते अप्राप्य मनसा सहेति श्रुतेः त्वं च
विधा हेनेन परब्रह्मण त्वमेव यद्वा हे देवि त्वं च
अप्रकाशितासि केनापि प्रकाशेनेन प्रकाशि
तासि ॥ परप्रकाश्यत्वानभ्युपगमात् ब्रह्मस्व
रूपस्य स्वयंप्रकाशत्वाभ्युपगमाच्च ॥ तस्य
त्वेन परब्रह्मतत्वमेव ॥ स्वयंप्रकाशमान

मनतिशयानंदचिद्रूपमसीत्यर्थः ॥ यद्वा हे देवि त्वं
अव्याकृतासि अव्याहतासि केनापि न हिंसिता
सि ॥ हन हिंसायां ॥ इत्यादिः ॥ त्वमेव युद्ध्य हि
तारं व्याहृणोत्थि व्याहृ सि व्याहिंनसीत्यर्थः ॥
यद्वा पंथुः ॥ हिंसाकर्मणश्चोः श्चो व्याहृणोति कृणुते
कृञः ॥ करोति कृणोते ह्वे वे संपद्येते पदेक्रमा दिति ॥
अव्याहृतासि परमा इति पाठे तु ॥ हि यस्मात् हे देवि
त्वं परमा परा उत्कृष्टा माळक्ष्मीः ततः अव्याहृता
सि विष्णुः तेन व्याहृतां करिस्य रूपिता लोके पुव्या
हृता व्यवस्थापिता ॥ यद्वा हे देवि हि यस्मात् त्वं स
श्रीः मस्तशेमकूपेषु निजरत्नैः मानृदिवा कर्मैदेदौ ॥
अतस्त्वं अव्याहृतासि ॥ अविनोत्स्तयेन आस
मंतात् हृतासि ते जो लिनिमिनितासि ॥ अतएव त्वं

परमा परा श्रेष्ठा मा तेजोलक्ष्मीः अव्ययः दौ लसे षाकै
यद्वा अव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ हे देवि हि
यतः त्वं जगतां माया मूलभूता अतः सृष्टेः प्राक्
केवलैवेति ॥ अव्याकृता सत्वरजस्तमोगुणानुद
यात् भेदप्रपञ्चानुदयात् सत्वादिनां अपृथक्कृता
सा रूपदर्शनप्रसिद्धा परमा प्रकृतिः प्रधानाख्या
स्या यियं देवी सांख्यमते प्रकृतिरित्याख्याता ॥ वे
६ दांतिनस्तु तामनिर्वचनीया मायामाथामनादिम प ६
विद्यामाहुः ॥ शाक्तिकास्तां शिवशक्तिमाचक्षते ॥
तांत्रिकाः कर्मणामपूर्वासादनसामर्थ्यलक्ष
णाकृतिमाहुः ॥ तार्किकास्तां वस्तुतत्त्वावसि
तिसिद्धिमाहुः ॥ शैवास्तां शिवशक्तिसंसक्ति
माहुः ॥ वैष्णवैः विष्णुमायां तां माहुः ॥ सा कास्मि

यानि मनसापि स्मर्तुमशक्यानि ॥ ६ ॥ ॥ हेतुः
समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिह
रादिभिरप्यपारा ॥ सर्वाश्रयाखिलमिदं जगदं
शाभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥
७ ॥ ॥ हे देवि त्वं त्रिगुणापि त्रयो गुणाः यस्यां
सा सत्वरजस्तम इति त्रयो गुणाः सत्वगुणा त्वं
वैष्णवी शक्तिः सती जगंति रक्षसि ॥ रजोगुणा त्वं
ब्राह्मी शक्तिः सती जगंति सृजसि ॥ तमोगुणा त्वं
माहेश्वरी शक्तिः सती संहरसि ॥ अत एव त्वं त्रिगु
णाप्यसि ॥ अत एव त्वं समस्तजगतां हेतुरसि
सर्जनीय संरक्षणीय संहरणीयानि त्रीणि यानि
जगंति स्वर्गमर्त्यपातालाख्यानि तेषां त्वं हेतुरसि
हे देवि त्वं हरिहरादिभिरपि देवैस्तत्वतो न ज्ञायसे

स्वधा॥ स्वधेमेवं रूपमंत्रा आस्तुती त्वमेवोच्चार्यसे॥ कथ्यसे॥
देवेभ्यो हवने स्वाहा पित्रेभ्यो द्रव्य उच्यते॥ स्वाहा देवहवि
र्दाने श्रौषड्वौषट् स्वधेति च॥ अभिधाने तु विशेषो कश्चित्तः
८॥ ॥या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यसे सुनियतेंद्रि स्य
यतत्त्वसारैः॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा
भगवती परमा हि देवि॥ ९॥ ॥हे देवि हि निश्चयेन या मुक्ति
हेतुः अविचिंत्यमहाव्रता परमानंदात्तो ज्ञापनीय ब्रह्मत
त्वावगतिरूपसाक्षात्कारलक्षणा विवक्षास्ति॥ सा भगवती त्व
मेव सती सुनियतेंद्रियतत्त्वसारैर्मोक्षार्थिभिरस्तसमस्त
दोषैर्मुनिभिः अभ्यस्यसे॥ पुनः पुनरावर्त्यसे॥ सिध्यसे इ
त्यन्वयः॥ विद्यासि इति पाठे तु हे देवि हि निश्चये॥ त्वमेव
भगवती सा परमा॥ वेदांतश्रवणमनननिदिध्यास
नावर्तनीयब्रह्मतत्त्वावगमात्मा दृष्टसाक्षात्कृतिरू
पा विद्यासि॥ सा विद्यारूपत्वात्त्वमेव मुक्तिहेतुरविचिंत्य स

महाव्रता॥ सुनियतेंद्रियतत्त्वसारैर्मोक्षार्थिभिः अस्तस
मस्तदोषैर्मुनिभिरभ्यस्यसे॥ सिध्यसे स्वस्वरूप
इत्यन्वयः॥ मुक्तिरमृतं कैवल्यं॥ ज्ञानादेव तु कैव
ल्यमित्याद्युपगमात्॥ मुक्तिहेतुर्विद्या अविचिंत्या
चिंतयितुमशक्यानि दुश्चराणि महांति व्रतानि उपवा
सादीनि पुण्यानि यस्याः सा अविचिंत्यमहाव्रता अ
भ्यस्यसे॥ असु क्षेपणे अभिपूर्वकः कर्मणि लट्॥ आप्य
से॥ सुष्ठु नियतानि विषयेभ्यो व्यावर्तितानि इंद्रियाणि
येस्ते सुनियतेंद्रियाः ते च ते तत्त्वसाराश्चेति सुनिय
तेंद्रियतत्त्वसाराः तत्त्वं तत्त्वज्ञानं सारं प्राप्यं येषां
ते तत्त्वसाराः मन्यंते मुनयः तैः मोक्षमर्थयंते मोक्षा
र्थिनः अस्ताः नष्टाः समस्ताः दोषाः कामक्रोधलोभा
दिरूपा येषां ते अस्तसमस्तदोषाः तैः विद्यते ज्ञाय
ते अनया इति विद्या भगवती सर्वैश्वर्यसंपन्ना परमा सं
वेदितुमिष्टा॥ ९॥ ॥शब्दात्मिका सुविमलर्ग्

ग्यजुषां निदानमुद्गीथरम्यपदपाठवतां च साम्नां ॥ देवि
त्रयी भगवती भवभावनाय वार्त्ता च सर्वजगतां परमार्तिह
न्त्री ॥१०॥ ॥हे देवि त्वं भगवती ऐश्वर्यादिसंपन्ना शब्दि
का ॥ वर्णपदवाक्यरूपवाणीस्वरूपा सुविमलऋग्य
जुषां उद्गीथरम्यपदपाठवतां साम्नां च निधानं सर्वज
गतां आर्तिहंत्री परमा उत्तमा च लुवर्गदर्शनी ॥ वार्त्ता व
८ तांतरूपा त्रय्यसि ॥ वेदानां त्रयी भवसीत्यन्वयः ॥
अथवा हे देवि भगवति त्वं सर्वजगतां भवभावनाय संस ८
रूपादनाय परमं निधानं आश्रयस्थानं वसति त्राम
हे देवि त्वं आर्तिहंत्री असि ॥ हे देवि त्वं वार्त्तासि ॥ कृषि
गोरक्षादिवृत्तिरसि ॥ हे देवि त्वं शब्दात्मिकासि ॥
नादस्वरूपासि ॥ यद्वा ॥ वर्णपदवाक्यरूपासि ॥ गद्य
पद्यात्मिकासि ॥ हे देवि त्वं सुविमलऋक्स्थितः संहि
तानि यजूंषि तेषां विमलऋग्यजुषां ॥ ऋक् च ऋग्वे
दः यजूंषि यजुर्वेदः तेषां उद्गीथरम्यपदपाठवतां

तो महामायासि अनादिमादिशक्तिमाहुः ॥ पौराणिकास्त्वं तां
देवीमाहुः ॥११॥ ॥यस्याः समस्तसुरता समुदीर
णेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि
वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः
स्वधा च ॥१२॥ ॥समस्तसुरता इति सुर ऐश्वर्ये ॥ सुरंति
सुराः सुराणां भावः सुरता सुरता अस्ति येषां ते सुर
ताः इंद्रादयः मत्वर्थे अर्श आदित्यादच् ॥ समस्ताश्च ते
सुरताश्च समस्तसुरताः समस्तविबुधा इति यावत् ॥ हे दे
वि मेधासि हि स्वाहा त्वमेवासि ॥ स्वाहा च कृतभुक्प्रि
या ॥ यस्याः स्वाहायाः समुदीरणेन उच्चारणेन सकलेषु
मखेषु यज्ञेषु समस्ताः सुरताः समस्तविबुधाः यज्ञ
भुजः तृप्तिं प्रयांति ॥ प्राप्नुवंति ॥ किंच हे देवि मेधासि हि सा २
स्वधा च त्वमेवासि ॥ अत एव जनैः पितृयज्ञेषु जनैः
पितृभ्यो स्वधा इति पुरुषैः पितृगणस्य तृप्तिहेतुः

मितेषां ॥ यद्वास्य मासां त्वरमुत्कमेव ॥ भवभावनाय ॥ भवः
शिवः परमात्तस्य भावनं ध्यानं तस्मै ॥ प्रकटा त्रयी त्वमेवा
सीत्यर्थः ॥ रुद्रो जन्मनि कूलाण प्राप्तो संस्मृतिस्तयोर्भाव ॥
अर्द्धेहंत्री तिजननिकर्तुरिति निर्देशः समासार्थ सिद्धः ॥
आन्त्रपीआधनुः को स्या आउ पूर्वता क्वचित् ॥ देवित्रयी
हीतसंबुध्यं तद्गतिपाठः ॥ असीति संबंधत ॥ १० ॥
मेधासि देवि विदिता खिलशास्त्रसारा दुर्गासि दुर्गभव
सागरनौरसंगा ॥ श्रीः कैटभारिहृदयैककृताधिवा
सा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥
हे देवी त्वं मेधासि ॥ अत एव त्वं विदिता खिलशास्त्रसारासि ॥
यद्वा हे देवी त्वं विदिता खिलशास्त्रसारा मेधासि ॥ धी
धारिणा वृत्तीमेधा ॥ विदितान्यखिलानि शास्त्राणि
चतुर्दश तत्त्वपराणि न्याय्यानि यया मेधया सा त्व
मेवासी ॥ प्रवृत्तिर्वा निवृत्तिर्वा विसेनकृतकेन वा ॥

पुंसा येनोपदिश्येत तच्छास्त्रमभिधीयते ॥ हे देवि त्वं असं
गा संगसक्ता खिलबंधहेतुः ॥ अप्रतिबंधा ॥ अनि
वारितगतिः दुर्गा दुःप्रापा दुःखेन गम्यमानो
दुर्गभवसागरनौरसि ॥ दुर्गो दुस्तरो भवः संसारः
सागर इव दुर्गभवसागरः दुर्गभवसागरे नौर्दु
र्गभवसागरनौस्तरणिरसि ॥ लोके नौः प्रसिद्धापि
स्यात् ॥ यद्वा दुर्गं दुस्तरो भवः संसारः तं दुर्गभवं
स्यति खंडयतीति दुर्गभवसा ॥ न विद्यते गरो विषं दुः
खं यत्र सा अगरा अगरा चासौ नौश्चेति अगरा
नौः दुर्गभवसागरनौश्चेति दुर्गभवसागरनौः ध
भवा हे देवि त्वं दुर्गा दुर्गमे दुःप्रापे ॥ भवे शंभौ परत्र
लतत्वे सागरे अमृत विषये असंगा ॥ रागादिरहि
ता दुर्गा दुःप्रापा दुर्लभा नौस्तरणिरसि ॥ नौरिव

नोर्देवी ब्रह्मप्राप्ति साधनभूता विद्यारूपेति भावः॥ हे देवि
त्वं कैटभारि हृदयैकहृतः पिनासा श्रीरसि विष्णुवक्ष
स्थल निवासिनी लक्ष्मीस्त्वमेवासि कैटभस्येवइंगो
पस्येवभावस्यतत्कैटभं विष्णुकर्णमळोत्पन्नः कै
टभः॥ असुरः तस्य अरिः शत्रुः कैटभारिर्विष्णुः तस्य
हृदयं वक्षः तत्र एकः मुख्यः कृतः अधिवासः स्थिति
र्ययासा तथोक्ता॥ हृदयं चित्तवक्षसोः॥ हे देवि त्वमेव
५० गौरी असि शिवकृतप्रतिष्ठा गौरी उमा॥ शशी चंद्रः मौ ५०
लौ किरीटे यस्य स चंद्रमौलिः शंभुः तेन कृता प्रतिष्ठा
आदरपूर्वकस्थितिः येन यस्याः सा॥ तथोक्ता॥
...वि किरीटं चूडा मौलि॥ १९॥
म ईषत्सहासममलं परिपूर्णचंद्रबिंबानुकारिकनको
त्तमकांतिकांतं॥ अत्यद्भुतं प्रहृतमात्तरुषा तथापि

स्त्रोणां

साम्नां च सामवेदानां च त्रयाणां सौहृत्नयः॥ वेदशाखा
नां चाकुलौ... वचनप्रयोगः उद्गीथः उद्गानं अत
एव रम्यपाठवतां॥ उद्गीथेन रम्याणि पदानि तैः हृ
द्यपाठवतां अन्यथापदानां पाठः उद्गीथेन रम्य
पदपाठो येषां तानि उद्गीथरम्यपदपाठानि सामानि
इति स्यात्॥ गम्भीरोदात्तिनंद... उद्गीथः प्रणव इति क्षी
रस्वामी ... व्याख्यत्॥ उद्गीथः सामवेदइत्यमरुणा
दिवृत्तिकारः॥ उद्गीथः प्रणव इति पक्षे उद्गीथरम्यता
ऋग्यजुःसामस्वस्ति॥ यद्वा उद्गीथः उद्गानं सा त्वं प्रशस्य
ते॥ वार्ता जनस्य तो... कृषिः पाशुपाल्यं वाणिज्यं
वृत्त्या॥ जनस्यार्तिर्वृत्तांतः॥ त्रिया मूर्त्ताम यजुष
इति वेदाः त्रयस्त्रयी॥ ऋचश्च यजूंषि च ऋग्यजु
षाणि ... चतुरादिना अच् समासांतः॥ इह तु समा
सांतविधेरनित्यत्वमाश्रित्य अनुपरिमवां ऋग्यजुः

सप्तशती

नौ देवी ब्रह्मप्राप्तिसाधनभूता विद्यारूपेति भावः॥ हे देवि
त्वं कैटभारिहृदयैककृतापि असि श्रीरसि विष्णुवक्ष
स्थलनिवासिनी लक्ष्मीस्त्वमेवासि कैटभस्येव दुर्भो
पस्येव भावस्य तत् कैटभं विष्णुकर्णमलं तत्प्रभवः कै
टभः॥ असुरः तस्य अरिः शत्रुः कैटभारिर्हरिः तस्य
हृदयं वक्षः तत्र एकः मुख्यः कृतः अधिवासः स्थितिः
१० र्यया सा तथोक्ता॥ हृदयं चित्तं वक्षस्तो॥ हे देवि त्वमेव १०
शशिमौलिकृतप्रतिष्ठा गौरी उमा॥ शशी चंद्रः मौ
लौ किरीटे यस्य स चंद्रशेखरः शंभुः तेन कृता प्रतिष्ठा
अवस्थितिरर्धशरीररूपार्धेन यस्याः सा॥ तथोक्ता॥
ऊर्ध्वकिरीटचंद्रकेशा श्वसीतप्रासोलयस्त्रयः॥११॥
म ईषत्सहासममलं परिपूर्णचंद्रबिंबानुकारिकनको
त्तमकांतिकांतं॥ अत्यद्भुतं प्रहृतमात्तरुषा तथापि

साम्नां च सामवेदानां च त्रयी असि इत्यन्वयः॥ वेदशाखा त्रीणां
नां बाहुल्यात् बहुवचनप्रयोगः उद्गीथः उद्गानं तेन
एकरम्यपाठवतां॥ उद्गीथेन रम्याणि पदानि तैः कृ
तो पाठवतां अन्यथा पदानां पाठः उद्गीथेन रम्यः
पदपाठो येषां तानि उद्गीथरम्यपदपाठानि सामानि
इति स्यात्॥ गम्भीरोदात्तिति ... उद्गीथः प्रणव इति क्षी
रस्वामी व्याख्यत्॥ उद्गीथः सामवेदः इति लक्ष्मणा
दिवृत्तिकाराः॥ उद्गीथः प्रणव इति पक्षे उद्गीथरम्यता
ऋग्यजुःसामस्वप्यस्ति॥ यद्वा उद्गीथः उद्गानं सामस्वि
व॥ वार्त्ता जनश्च तोकवृत्तिः कृषिः पाशुपाल्यं वाणिज्या
ख्या॥ जनश्च तिवृत्तांतः॥ त्रिया ऋक्सामयजुर्भि
इति वेदास्त्रयस्त्रयी॥ ऋचश्च यजूंषि च ऋग्यजू
षाणि अचतुरादिना अच् समासांतः॥ इह तु समा
सांतविधेरनित्यत्वमाश्रित्य सुविमलानि ऋग्यजूं

सहसेसहः अनुर्वे त्वसहसा ज्ञात्वा मिसोजः सहोजस्तमस
स्हतीयाथा इत्योत्तरपदिकमध्याने चावेगेमकं अद्भुते ॥
अतिशुवो ॥ उवं च अन्यो तो श्वर्थे व्ययं ॥ आत्तारुद्र क्रुधं
येनसः ते नपरिसर्ण चेद् विवमक क करासा हृतिवा ॥
ताहस्रामिति ॥१२॥ ॥दृष्ट्वा तु देवि कुपितं भ्रुकुटीक
रालमुद्यच्छशांकसदृशच्छवियन्न सद्यः॥ प्राणान्मुमो
४१ चमहिषस्तदतीवचित्रं कैर्जीव्यते हि कुपितांतकदर्शने
न॥१३॥ ॥हे देवि कुपितं क्रोधाविष्टं भ्रुकुटीकरालं वि ४१
षमविकटं भयंकरं अतएव क्रोधतान्त्र उद्यच्छशांकसदृ
शच्छवि ॥ उद्यत् उदयं कुर्वन् यः शशांकः शशलांछनः
शशिअसकः पूर्णमंडलश्चंद्रस्तेन सदृशा छविः प्रभा प
ञ्चवर्णलोहितत्वं यस्य तत् तथोक्तं ॥ वदीयं संग्रामो मुखं मुखं मु
खं दृष्ट्वा तु दृष्ट्वैव महिषो महासुरः सद्यः सपदि दर्शनक्ष

णएव प्राणान् न मुमोच न तत्याज इति यत् तदतीवचित्रं
मुत्कोयमर्थः॥ हि निश्चयेन कुपितांतकदर्शनेन कैर्जंतुभिः
जीव्यते न कश्चिदपि ॥ जीवप्राणधारणे॥ अकर्मकस्तात्र
वेलिट्॥ ययालुने पदे प्रथमे कपुरुषवचनमेवभावस्ये
कलात् ॥ प्राणधारणं ग्रहं नावं तर्भूतमिति जीवति देवदत्त
इति प्रयोगे पृथक्प्राणपदकर्मवाचि न प्रयुज्यते ॥ उत्तुन्य
मानेपि तस्मिन् प्राणान् धारयतीति गम्यमानत्वात् ॥ अत
श्चजीवतिरकर्मकः ॥ भ्रुवौ कुटीव भ्रुकुटी ॥ इकोऽह्रस्वो
ग्यालवस्येति उत्तरपदिकं ह्रस्वत्वं ॥ भवे च वा ते नभ्रुकुटीभ्रु
कुटी भ्रुकुटी॥ करालं कुपितं चलवस्तुपुंकिमुतस्वैसतीव
निर्भरे ॥ करालो दंतुरे तुंगे ॥ कृणोतु हन्ति करालं ॥१२॥
देवी प्रसीद परमा भवती भवाय सद्यो विनाशयसि को
पवती कुलानि ॥ विज्ञातमेतदधुनैव यदस्तमेतन्नीतं
बलं सुविपुलं महिषासुरस्य ॥१४॥ ॥हे देवि त्वं
प्रसीद प्रसन्ना भव ॥ हे देवि त्वं परमासि ॥ परा उत्कृ

ष्टामात्रु ष्मीरसि॥ हे देवि भगवति प्रसन्ना सती जगतां भवाय
संपदुद्भवाय सद्यः सपदि भवति॥ संपद्यते॥ अथ चेत्
हे देवि भगवति अप्रसन्नासि तर्हि सद्यः सपदि जगतां कु
लानि गृहाणि वंशान् समूहान् वा विनाशयति विध्वंस
यति॥ इत्थं भगवतीति भवच्छब्दप्रयोगे पुरुषमध्यमस्त्वच्छब्दान्य
त्वेन शेषप्रथमः पुरुषः विनाशयतीत्ययं॥ वंशो वंदेग
हे कुलमुक्तमर्थं प्रकृते न देवी चरित्रे न योजयति॥ वि
ज्ञातं निसादिनाईन॥ हे देवि भगवती कोपवती सती कुपिता
१२ अप्रसन्ना सती कुलानि विश्वानि विनाशयतीति तत्॥ अ १२
धुनैव विज्ञातं विदितमस्माभिः एतदिति॥ किंतु यत् एतत्
आहृतं एतं यो उमागतेसु विपुलं सुबहुकुलं बहुतरं न
हि यासुरस्य बलस्ते न्येअस्तं विनाशं नीतं प्रापितमिसे तद
तं स्मालिज्ञानं॥ दे विप्रसादपरमा भगवती भवायेति पाठे तु॥
हे देवि भगवति प्रसादेन प्रसन्नेन परमा उत्कृष्टा स्यौ
तर्हि लोकानां भवाय उद्भूतये संपदुद्भवाय भवति॥ संपद्यते॥

लं

वक्त्रं विलोक्य सहसा महिषासुरेण॥१२॥ ईषत्सहा
सं मंदहास्ययुक्तं अमलं निर्मलं परिपूर्णचंद्रबिंबानु
कारि पूर्णेन्दुबिंबोपमं कनकोत्तमकांतिकांतं कनकं सुवर्ण
उत्तमं कनकं तस्येव कांतिः शोभा यस्य तत्॥ कनको
त्तमकांतिभिः एव कांतं शोभाद्यं मनोहरं॥ हे देवि
ईदृग्विधं तव वक्त्रं मुखं जगन्मोहनं जनयति॥ तथा
पि तव वक्त्रं विलोक्य सहसा भगवति कितं अंतरणा
प्राप्त कोपेन महिषासुरेण प्रहृतं अत्यद्भुतमेतत्॥
अहो ईदृशं जगन्मोहनं जगत्संजीवनं वक्त्रं विलोक्य पुन
नानंदमूर्मदमाप्नुयात्॥ तत्कथं महिषासुरस्तत् दृष्ट्वा कोप
संजातकोपः प्राहार्षीदिति चित्रमेतत् इति भावः॥ अ
तर्कितेतु सहसाऽव्ययं॥ विलोकनं ऽमेयं॥ सहसा व
लेन महिषासुरेण प्रहृतं॥ सहो बलं सहो मार्गः॥

हेदेवि भगवती सदा अभ्युदयदा सती येषां प्रसन्नास्ति तेषामेव य
शांसि सत्कीर्त्तयः स्युः ॥ हे देवि भगवती सदा अभ्युदयदा सत
ती येषां प्रसन्नास्ति तेषामेव धर्मवर्गश्च नसीदति । चकाराद
नुष्ठानस्तुभूतिश्च नसीदति न कश्चिदपि दुःख्यति ॥ हे दे
वि भगवती सदा अभ्युदयदा सती येषां प्रसन्नास्ति त एव
धन्याः स्युः ॥ धन्ये पुण्याः साधवः प्रवीणाः योग्या वा स्युः
यद्वा धनानि लब्धारः प्राप्तारः धन्याः धनगणलब्धे
ति सूत्रेयत्प्रत्ययः ॥ सुकृती पुण्यवान् धन्यः ॥ हे देवि

भगवती सदा अभ्युदयदा सती येषां प्रसन्नास्ति त एव निभृ
तात्मजभृत्यदाराः धन्याश्च स्युः ॥ देव्याः सम्मतनुप्रकाडु
वं सत्ते गुणा इति भावः ॥ निभृताः विनिताः शिक्षिताः त
कुलाचाराः आत्मजाः पुत्राः सुताः भृत्याः अनुचराः दा
राः कलत्राणि यश्च येषां ते तथोक्ताः निभृतविनीतप्र
श्रिताः सन्ताः ॥ १५ ॥ धर्म्याणि देवि सकलानि स
दैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥

स्वर्गं प्रयाति च ततो भवती प्रसादाल्लोकत्रयेऽपि फलदा ननु
देवि तेन ॥ १६ ॥ ॥ हे देवि भवती प्रसादात् भवत्याः देव्याः
प्रसादात् संभाविततः सुकृती सुकृतवान् जनः प्रतिदिनं
सदैव अत्यादृतः अतितरां सादरः सन् सकलानि समे
स्तानि स्वस्वरात्र्यकालिनि अतएव धर्म्याणि धर्मेण प्रा
प्यानि धर्मादनपेतानि वा ॥ यथायथं स्मार्तानि श्रौतानि
चोचितानि वा कर्माणि ब्रह्मयज्ञादीनि करोति ज्योतिष्टो
मादीनि हि स्वर्गकामः करोति ॥ ततश्च स्वर्गं प्रयाति इदं
पुनः करोति कर्म पुनः स्वर्गं याति तेन हेतुना हे देवि लोके
त्रयेऽपि भुवि दिव्यपि त्वमेव फलदासि ॥ ननु इदानिं धर्मव
प्रश्नावधारणानुज्ञानुनयामंत्रणे ननु नौ वै यो धर्मेति
धर्मेण प्राप्याणि मर्त्यैः यः प्रत्ययः ॥ यद्वा धर्मादनपेता
नि धर्म्याणि धर्मपदार्थन्यायादनपेते यत् आदृतो
सादरः अतिशैतो ननु च भवती प्रसादात् इत्यत्र सर्व
नाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावो भवतीति

भावप्रसादादिति स्यात् ॥ उच्यते ॥ पुंवदिति योगसाध्यमि
दं पुंवत्त्वं कृत्वदेव योगविभागादिष्टसिद्धिः ॥ तत्तस्मात् प
कोऽपि भवतीसुतक्षयकरो मातः ॥ किंयतोऽयमिति वस्तुं वक्तुं ने
वाशोव ॥ क्वचिदस्येव भवतीति तुष्टाया प्रसादात्प्रस
न्नतातु भवतीकोकं हृयेऽपि फलदास्तीति पुंवत्त्वं
कानिरासपर व्याख्याने भवतीसुतक्षयकर इति प्रयो
१८ गः कदर्थितः स्यात् ॥१६॥ दुर्गे स्मृता हरसि भीतिम
शेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि । १८
दारिद्र्यदुःखभयहारिणि कात्वदन्या सर्वोपकारकर
णाय सदार्द्रचित्ता ॥१७॥ ॥ हे देवि हे दुर्गे स्मृतासि त्वं
अशेषस्य जंतोः सर्वस्य प्राणिजंतोः प्राणि
नः स्थैर्ये तेन स्मृतासती अतीव शुभां मतिं च तुर्वर्गफल ४
साधनभूतां बुद्धिं ददासि ॥ त्वमन्यत्त्वत्तो ऽनन्यत्वं ज
नपरां मतिं ददासि ॥ तादृशे हे देवि हे दारिद्र्यदुःखं
भयहारिणि सर्वोपकारकरणाय सर्वोपकारानुक

अथ चेत् भवती कोपवती स्यात्तर्हि सद्यः संपद्येव कुला
नि लोकानां कृद्धा विनाशयसीवेति पूर्वोक्तं स्पष्टी
कृतं ॥ प्रागवदुत्तरार्द्धः ॥ भवतीति भुवच्छब्दे प्रथमपुरुष
एकवचनं विनाशयतीति ॥ अस्तु सदृशीने ॥ अस्तमनुत्वादाम
कारान्तो ऽव्ययमुपलक्ष्यौ वर्तते ॥ अलक्षणपणे इत्यतो
नपुंसके भावे क्तेकृत्तुगस्ते प्रेरणं दुरीकरणं अस्तेन
क्षेपनीतं प्रापितमित्यर्थः ॥ स्यात् विनाशं नीतमित्यर्थ
स्तेन स्यात् ॥ अस्तमिति व्यवगृह्णे सिद्धासिद्धिः ॥१४॥
ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सी
दति बंधुवर्गः ॥ धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥१५॥ ॥ हे देवि त्व
वती सदाभ्युदयदासती येषां प्रसन्नास्ति त एव लो
काः जनपदेषु विनिदत्सु देशेषु संमताः पुरुषा ल
ब्धप्रतिष्ठाः स्युः ॥ हे देवि भवती सदाभ्युदयदा स
ती येषां प्रसन्नास्ति तेषामेव धनानि स्युः

दत्त्वा वधा नास्मदा द्विचिन्तास्यात्॥ किमिति तर्हि दैत्या
निहंति संग्रामे ध्रुवं तत्रोत्तरमाह॥ ७॥ ॥ एभिर्हतै
र्जगदुपैतु सुखं तथैते कुर्वंतु नाम नरकाय चिराय पा
पं॥ संग्राममृत्युमधिगम्य दिवं प्रयांतु मत्वेति नू
नमहितान्विनिहंसि देवि॥ १७॥ ॥ उपैत्विति लो
ट्तु पाठः॥ कुर्वंत्विति वत्॥ नामेत्यव्ययपाठः॥ नां
१५ बेति पाठे नां॥ अंबेति च्छेदः॥ हे देवि हे अंबे हे सर्व १५
ज्ञानी त्वं सर्वोपकारकरणाय सदा कृपार्द्रचित्ता सती
यद्यत्तत्तथैव मां सर्वथा॥ तथा हि॥ एभिर्हतैः जगत्पीडि॥
महिषासुरादिभिः दैत्यैः हतैः रणे त्वद्धतैः जगत् लोकः
सुखमुपैतु पीडकाभावात्सुखं प्राप्नोतु तथा एते अहि
ता लोकेन ये शत्रुः महिषासुरादयः दैत्याः चिराय न
रकाय नरकं गंतुं पापं पापाचरणं कुर्वंतु॥ किंतु सं

ग्राममृत्युं संग्रामे संग्रामेण वा मृत्युं मरणं अधिगम्य
मृत्युमुपेत्य दिवं स्वर्गं प्रयांतु॥ प्राप्नुवंतु॥ इति मत्वा वि
चिंत्य नु ग्रहबुद्ध्या एतान् अहितान् सर्वलोकद्रोहिणो म
हिषासुरादीन् विनिहंसि॥ विन्यवधीः॥ ततोऽन्यान
पि देवान् विनिहनिष्यसि च वर्तमानसामीप्ये वर्तम
ने वेति लट्॥ नूनमवश्यं निश्चयं द्वयं॥ चिराय चिर
रात्राय चिरस्याय चिरार्थकाः अव्ययाः स्युः॥ अं
बेति अंबार्थनद्योर्ह्रस्वः॥ नाम्ने सैव पाठे॥ न॥ आम
नरकायेति छेदः॥ आमनरकादिकुंभादि मता व्या
पि प्रयाने नरकाय पापं न कुर्वंतु इत्यर्थः॥ अथवा ना
मप्रकाशं संभाव्यक्रोधोपगमकुत्सने॥ एभिः सुरैः
हतैः जगत्सुखमुपैतु॥ तथा एते असुराः यद्यपि
पापं कृतवंतः कुर्वंतु नाम चिराय चिरकाले नर
काय पापं कुर्वंतु नाम॥ तथापि संग्राममृत्युम

मृत्युमधिगम्य तु दिवं प्रयांतु इति मत्वा नूनं ते निश्चि
त्य हे देवी त्वं तान् अहितान् असुरान् अयि निहंसि गात
स्मात्त्वं सर्वोपकारकरणाय सदार्द्रचित्तासीति प
दुक्तं तत्तथैव नान्यथा ॥१०॥ ॥दृष्ट्वैव किं न भवती प्र
करोति भस्म सर्वासुरान् अरिषु यत् प्रहिणोषि शस्त्रं
लोकान् प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भ
वति तेष्वपि तेतिसाध्वी ॥११॥ ॥हे देवि भवती सर्वा
१६ सुरान् सर्वेषाम् असवः प्राणाः तान् रांति गृह्णंति सर्वा १६
सुरास्तान् सर्वासुरान् दैत्याः तान् दृष्ट्वैव क्रूरेः दृष्ट्वैव
तस्माद्भस्मीभूतान् नु किं न करोति किं भस्मी करोति किं
तु सामर्थ्यमस्ति करोत्येव तत् अपि हे देवि त्वं अरिषु शत्रु
षु शस्त्रमायुधं प्रहिणोषि प्रक्षिपसि इति यत् तत्र
तु वा अपि अयमभिप्रायः हि निश्चयेन ॥ रिपवोपि श
त्रवोपि संग्रामे शस्त्रहताः शस्त्रहताः कृतप्रा

त्तैः सदार्द्रचित्ता कृपयार्द्रहृदया परदेवता त्वदन्या कास्ति न
कापि ॥ अस्मादितो भयं हर्तुं मातदातुं मनुजमां ॥ देवी
त्वं पदं पुरा कारात्कसर्वोपकृतिकारिणी ॥ दुःखेन गंतुं
शक्यते इति दुर्गा ॥ सुदुर्गे दुर्गरक्षणे चेति ठः ॥ बल
वत्सु दुःखं कष्टं तस्य तीर्णं निमित्ते ॥ स्वस्थैः स्मृता ॥ स्वर्ग
स्थैर्देवैः स्मृता अतीव शुभां मतिं ददासी सर्थः ॥ दारि
द्रा दुर्गतो दरिद्रा इति दुर्गलिलिनिः स्त्रीभवती निर्धनीभ
वति किंचनीभवतीति दरिद्रः दरिद्रस्य भावः कर्मं च दा
रिद्र्यं दारिद्र्यतः समुपस्थितं दुःखं दारिद्र्यदुः
खदारिद्र्यदुःखात् जन्य दारिद्र्यदुःखं भयं दारिद्र्यदुः
खभयं हरतीति तच्छीला दारिद्र्यदुःखभयहारिणी तत
स्याः संबुद्धिः हे दारिद्र्यदुःखभयहारिणि ॥ सर्वेषु
भक्तेषु अभक्तेषु उदासीनेषु शत्रुषु च उपकारो
णां करणं विधानं तस्मै यद्येषां देवी सर्वोपकारकरणाय

तथाउग्रेण शूलाग्रकांतिनिवहेन च असुराणां दृशः दृष्ट
यः विलयं विनाशं मागताः नागमन् इति यत् तदेतदस्य
देव्यास्ति कारणं किं अंशुमालिंदुखंडयोगिअननं
धां सुधांशुखंडयुक्तं तव ननं विलोकयतां इति हेतुग
र्भितं विशेषणं ॥ असुराणां यद्यमी असुराः रणे देव्याः
अंशुमालिंदुखंडयोगिअननं अंशुखंडयुक्तं आननं व
क्त्रं न विलोकयेयुः ॥ तर्हि उग्रैः खड्गप्रभानिकरविस्फु
९१ रणैः तथाउग्रेण शूलाग्रकांतिनिवहेन च विलयं ग ९१
तदृष्टयः विनाशं गतदृष्टयः संपद्येरन् इति भावः ॥ अ
त्रेक्षानितिपतितिष्ठते यथा ॥ हे देवि त्वं यानि यद्यसुरा
स्तावकं तांशुमालेंदुखंडयोगिआननं व्यलोकयिष्यन्
तर्हि उग्रैः खड्गप्रभानिकरविस्फुरणैः तथाउग्रेण
शूलाग्रकांतिनिवहेन च विलीनदृशः संपद्येत
न च तदेतत् न संपद्यते तस्मात् अंशुमालिंदुखंडयोगि

आननं न लोकयिष्यन् तस्मादसुराः विलीनदृशो गतमप
द्यत इति खड्गप्रभास्ततेः सांनिकुरुंबमः तस्या विस्फुरणा
नि संचरणानि तैः शूलस्याग्राणि त्राणि तेषां कांतयः
प्रभाः तासां निवहः समूहः तेन ॥ अंशवः किरणाः त
द्धानिंदुरेव तमस्वरः तस्य खंडः शकलः तेन योगः संबं
धोमेलनं तद्वत् ॥ अंशुमालिंदुखंडयोगि ॥ अंशुमालिंदुखंडेन
योक्तुमानं पोष्य तेन नत्रं अंशुमालिंदुखंडयोग्यानननमिति प
समासः सवर्णदीर्घः ॥ २० ॥ दुर्वृत्तवृत्तशमनं तव देवि
शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥ वीर्यं च हंतृ ह
तदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दयात्वयेत्थं ॥ २१ ॥
हे देवि तव शीलं सद्वृत्तं कर्तृ दुर्वृत्तवृत्तशमनं दुष्टवृत्तये
षां ते दुर्वृत्ताः तेषां दुष्टचरित्राणां पुंसां वृत्तस्य शमनं न्या
मयितृ निवारकं वर्तते यद्यादुष्टेन वृत्तेन वर्तनं निष्पन्नं
फलं दुर्वृत्तचेष्टितं दुष्टफलं नरकंवेदक्षणं तस्य शमनं शम

पिबन्नपि नेत्रैस्तृप्तिं न लभे ।। तथा हे देवि तव एतास्मिन सौभाग्य
सौंदर्यं भाग्यं तनूरूपं आविर्भ्यं सम्यग् मनसापि विचारयितुम् अश
क्यं अविचार्यं सतु ।। अन्येषां नोहरे रतुल्यं असदृशं असा
धारणम् असमानं वर्त्तते तथा हे देवि तव वीर्यं हतदेवपराक्र
माणां दैत्यानां हेतृ घातकं वर्त्तते ।। तथा हे देवि इदं प्रागु
क्तभाणिता चयादि व्याख्यकृ यास्याद्रूपतो वैरिष्वपि अहि
तेष्वपि प्रकटितेव ।। प्रकाशितैव ।। वृत्तपद्ये चरित्रे चात्र
१८ चरितं तद्यत्र निःसत्त्वे ।। शीलस्वभावे सद्वृत्ते ।। रूपं गुणे स्वाप्र १८
वेच ।। अचिन्त्यं संस्मर्तुम् अशक्यं ।। वीर्यं बलं प्रभावश्च वीर्ये
हन्तृ ।। हतः देवानां पराक्रमो येस्तेषां असुराणां ।। २१ ।।
केनोपमा भवतु तस्य पराक्रमस्य रूपं च शत्रुभयकार्यंति
हारि कुत्र ।। चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव
देवि वरदे भुवनत्रयेपि ।। २२ ।। हे देवि हे वरदे
भुवनत्रयेपि ते तवास्य पराक्रमस्य केन सह उप
मा भवतु न केनापि ।। उपमैव नास्ति निरुपमत्व

यश्चिता इव शमितपापफलाः सन्तः लोकान् वाञ्छितान्
स्वर्गादीन् प्रयान्ति ।। तादृक् हे देवि तव तैश्चाहितेष्व
पि सा धीर्मतिर्भवति ।। शात्रवेष्वपि किल सा धीर्मति
रनुग्रहबुद्धिर्भवति किं पुनः साधुषु स्वर्गधर्मनिर
तेषु साधीत्वमतिर्भवतीति किं ब्रूमः इति भावः ।।
भवतीशब्द प्रयोगे प्रकरोतीति प्रथमः पुरुषः भक्त
त्वस्य विधेयतादेव त्वेपि विरोधो वेदाः प्रमाणमितिव
त्प्रोहिण्णोहि ।। हन्तो स्वात्रिषु श्रोत्रः हिलुमीनाइत
ण नं लोकस्त्र भवतो जने ।। शास्त्रेणहता साध्वी ।।
वीतो गुणवचनो तद् जीपू ।। १९ ।। ।। खड्गप्रभानि
करविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृ
शोसुराणाम् ।। यन्नागता विलयमंशुमदिन्दुखण्ड
योग्याननं तव विलोकयतां तदेतत् ।। २० ।। हे
देवि रणे तव उग्रैः खड्गप्रभानिकरविस्फुरणैः

त्रैउ·पाळने॥ननुनिदोदरा ब्राक्रिज्जोऽन्यतरस्य भीति
वानिरस्तानितं॥हे देवि त्वया समरमूर्द्धनि युद्धमूर्ध्नि अरि
पुगणान् हत्वा ते दिरिपुगणाः दिवं स्वर्गं नीताः प्रा
पिताः हे देवि त्वया अस्माकं देवानां उन्मद सुरारिभ
यं भयमपि अपास्तं॥अपाक्षिप्तं दूरीकृतं॥हे देवि सर्व
जननी नमस्ते लोके हिताः गीतमे हेति॥त्रैलोक्यत्रै
१९ लोक्यं चातुर्वर्ण्यादि लोकस्वार्थे छन्दु॥अखिलं त्रैलोक्य
मिति पौनरुक्त्यशंकया नाभिधत्ते अखिलं यस्मिन्नि १९
ति क्रियाविशेषणं द्रष्टव्यं॥संभवे षष्ठि चोरनुस्याद्द्रु
शेषणमर्थवत्॥रिपूणां नाशनेन समरमूर्द्धनि समर
स्य मूर्द्धवन्मूर्द्धि युद्धप्रधान ग्रहीत्तः तत्र उच्छितमुद
पः सुरारीणा मसिंस्तो हेशोषो गवेंसाभवे नमस्ते न
मः स्वस्ति इति चतुर्थी॥२३॥ ॥शूलेन पाहि नो देवि
पाहि खड्गेन चांबिके॥घंटास्वनेन नः पाहि चाप

ज्यानिस्वनेन च॥२४॥ ॥हे देवि हे अंबिके त्वं शूलेन
अयुधेन शत्रुभ्यो नोऽस्मान् देवान् पाहि रक्ष॥पार
क्षणे॥सर्वंपित्र॥अस्त्रीशूलं रुग्णायुधं॥हे देवि अंबि
के त्वं खड्गेन च नः शत्रुतः पाहि हे देवि अंबिके त्वं घं
टास्वनेन घंटायाः स्वनेन नः शत्रुतः पापतश्च पाहि॥
हे देवि अंबिके त्वं चापज्यानिः स्वनेन चापारोपिता ह
ढमौर्वीजनितनिस्वनेन नोऽस्मान् पाहि शत्रुतः पाप
तश्चेति शेषः॥२४॥ ॥प्राच्यां रक्ष प्रतीच्यां च चंडि
के रक्ष दक्षिणे॥भ्रामणेनात्मशूलस्य उत्तरस्यां तथे
श्वरी॥२५॥ ॥हे ईश्वरि ईश्वरस्य पत्नी यद्वा हे ईश्वरि
जगद्व्यापिनि॥अत्रोते रात्रु कर्मणि वेदट चोपधायाः॥
हे चंडिके हे देवि त्वं आत्मनः शूलस्य सुधस्य भ्राम
णेन परितो भितश्चक्राकारेण परिवर्तनेन देवान् प्रा
च्यां दिशि रक्ष॥शत्रुतः हे ईश्वरि हे चंडिके त्वं प्र
तीच्यां दिशि पश्चिमायां आशायां आत्मशूलस्य

भ्रामणेन अस्मान् रक्ष शत्रुतः तथा हे ईश्वरि चंडिके त्वं आ
म्बूलस्य भ्रामणेन दक्षिणे दिग्विभागे अवाच्यां दक्षि
णस्यां दिशि आम्बूलस्य भ्रामणेन अस्मान् रक्ष शत्रु
तः॥ तथा हे ईश्वरि हे चंडिके त्वं आम्बूलस्य भ्रामणेन उ
त्तरस्यां दिशि अस्मान् रक्ष शत्रुतः॥ भ्रामणेन भ्रमण
स्य दृक्भ्रामणं प्रदक्षिणीकरणं परितो भ्रामणं उल्लीकरणं॥ अ
२० न्यथा अनस्थानमात्रं चलनमात्रं वा शूलस्य संभवेतां त्रि २०
यस्यात्॥ अतस्च प्रदक्षिणा कृति परिभ्रमणं विवक्षित
मिति सूचयितुं प्राच्यां प्रतीच्यां दक्षिणे उत्तरस्यामि
त्युक्तं॥ चकारात् विदिक्ग्रहणं॥२५॥ ॥सौम्यानि या
नि रूपाणि त्रैलोक्ये विचरंति ते॥ यानि चात्यंत घोराणि
तै रक्षास्मांस्तथा भुवं॥२६॥ ॥हे देवि त्रैलोक्ये त्रि
षु लोकेषु ते तव यानि सौम्यानि सुंदराणि प्रसन्नानि
रूपाणि विचरंति प्रसरंति विहरंति यानि चात्यंत घो
राणि भयंकराणि रूपाणि त्रैलोक्ये विचरंति तैस्तैश्च

तपराक्रमस्य॥ नन्व तु लोपमाश्यपाभिति निषेधात् तृतीया न
स्यात्॥ स्वविवक्षायां तृतीयास्त्येव॥ सूत्रं तु प्रथमार्थं सह
भावविवक्षार्थं च॥ हे देवि हे वरदे रूपं च शत्रुभयं कारि शत्रू
णां भयासादन शीलं॥ ततोन्येषां तु भीतिहरं अतिम
नोहारि तत्ते वास्ति न तु कस्यापि चित्॥ हे देवि हे वरदे त्व
दीयं चित्ते कृपा च समरनिष्ठुरता च त्वय्येव दृष्टा कुत्रान्य
त्र दृष्टा न कुत्रापि विदितेति भावः॥ भुवनत्रयेति लोकत्रये दृष्टा
इति निष्ठाहेष्टा इति क्वचित्तोपपाठः॥ कृपा समरनिष्ठुर
तेति च प्रथमानंतु द्वितीया समरे निष्ठुरता भावः॥ त्वं जे
लोकगुण न च तस्य पुनर्भाव॥२२॥ ॥त्रैलोक्यमेतद
खिलं रिपुनाशनेन त्रातं त्वया समरमूर्द्धनि तेपि हत्वा॥
ग नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मद
सुरारिभवं नमस्ते॥२३॥ ॥हे देवि त्वया एतत् त्रैलोक्यं
रिपुनाशनेन अखिलं यथा भवति तथा॥ त्रातं॥ रक्षितं॥

स्तस्थितानि॥ संसमंततस्तु परितः सर्वतो विष्वगित्यमरः
शूलश्च गदा च खड्गश्च शूलं च गदं॥ सेनांगत्वादेकत्वं॥ तद्धा
रयंतीनि तथोक्तानि धनुरादीनि॥ २०॥ ॥ऋषिरुवा
च॥ सुमेधाः सुरथं राजानं वाक्यमूचिवान्॥ ॥एवं स्तु
ता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः॥ अर्चिता जगतां धा
त्री तथा गंधानुलेपनैः॥२०॥ ॥एवमुक्ते भणिता जगतां
धात्री पोषयित्री देवी सुरैः स्तुता ततः दिव्यैर्दिव्यैः नं
२१ दनोद्भवैः नंदनं स्वः तदेव वनं ततः उद्भवैः कुसुमैः २१
तथा दिव्यैः गंधानुलेपनैश्च आर्चिता पूजिता अरा
धिता॥ गंधैरनुलेपनानि॥ गंधाः कुसुमादयः॥ कुं
कुमागरकस्तूरीकर्पूरं चंदनं तथा॥ महासुगंधमिति
के नामास्याधप्रदम॥ अनुलेपनमंगरागः॥
२१॥ ॥भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता॥
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान्॥
समस्तैरखिलैस्त्रिदशैर्देवैः दिव्यैर्भव्यादिविशेषैः

धूपैः गंधाढ्यैः धूपनार्हैः धूपिता सुपूजिता देवी प्रसा
दसुमुखी प्रसादेन प्रसन्नत्वेन सुमुखी समस्तान्प्रण
तान्समस्तान्सुरानिंद्रादीन्देवान्वाक्यं प्राह उ
वाच॥ उपसर्गप्रतिरूपकः प्रशब्दोऽव्ययाख्यः॥ आ
हेति निपातस्तिङंतप्रतिरूपकश्च॥ नखमुखात्संज्ञायामिति
ङीषो निषेधस्तु संज्ञायामेव॥ देव्युवाच॥ ॥देवी
दृगन्वाक्यमुक्तवती॥२२॥ ॥व्रियतां त्रिदशाः सर्वे यद
स्मत्तोभिवांछितं॥ ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपू
जिता॥२३॥ ॥हे सर्वे त्रिदशाः युष्माकमेतैरेभिः प्रपू
जिताहं प्रीतास्मि॥ युष्माभिः सर्वैः मत्तः मत्सकाशात्
यत् अभिवांछितं अभिलाषितं वस्तु तत्तद्वस्तु व्रियतां
प्रार्थ्यतां अहं ददामि॥ दास्यामि॥ ग्रहप्रीता प्रीत्या इ
ति पाठद्वयं अत्र आद्ये पाठे प्रीत्येति॥ द्वितीये तु प्रीता
ददामीति व्याख्येयं॥ प्रहृजिता सुरैरिति पाठ
द्वयं स्पष्टं॥ यत्नात्तोभिवांछितमिति पाठः स्पष्टः॥

यदस्मत्तोऽभिवांछितमिति पाठे अस्मत् इति अस्मात् इत्यर्थः ॥ त
त् अस्मत्तु देवीभ्यः व्रियतां ॥ अहं देवी दद्मि इति वचनं चातुर्यं
कौशलं स्याल्लु वकुले नोपक्रम्येन नोपसंहाराद्बोधकं कि
चिंतं किं सम्मतं शुद्धेनैक्षमयतीत्यर्थः ॥३१॥ ॥कृतैन्मम प
रे यं च दुष्करं तन्निवेद्यतां ॥३२॥ ॥किं च हे देवाः अपरं यु
ष्माभिः कर्तव्यं सततदुष्करं दुःसाध्यं यत् तन्मदग्रे मह्यं नि
वेद्यतां ज्ञाप्यतां लद्ध्यपरं न हि यासुरवधापेक्षया द्विती
२२ यं कार्यं साधयामीति भावः ॥३२॥ ॥इत्याकर्ण्य वचो देव्याः २२
प्रकृचु स्तुतं दिवौकसः ॥३३॥ ॥इति इत्थं देव्या वचः व्याहारं
आकर्ण्य श्रुत्वा ते सर्वे दिवौकसः इंद्रादयः सुराः प्रत्यूचुः
प्रतिवाक्यमुक्तवंतः दिव ओको निवासो येषां ते दिवौक
सः ॥ प्रीत्यादृतादित्वात् साधुः ॥ देवा ऊचुः ॥ ॥देवाः वाक्यं
देवीमाहुः ॥३४॥ ॥भगवत्या कृतं सर्वं न किंचिदव
शिष्यते ॥ यदयं निहतः शत्रुरस्माकं महिषासुरः
॥३५॥ ॥यत्र यस्मात् हे देवि त्वया पापस्य वशात् अस्माकं देवा

रूपैरुपलक्षितात्वं तैः रूपैः करणैर्वा अस्मान् देवान् रक्ष ॥ तथा
तैरेवाहवविधे रूपैः भुवं रक्ष ॥ तथा च कारात् ॥ तैरेव विवि
धैः रूपैः पाताललोकं च रक्ष ॥ सौम्यं तु सुंदरे सोमदे
वते सोमायणि सौम्यं ॥ सुंदरे रूप आश्रितः ॥ अनुग्रहना
ति वाग्देवीति यासौ नीजगन्मयी ॥ नानुग्रहनातियान्
देवितेषां योगाजगन्मयी ॥२६॥ ॥खड्गशूलगदादी
नि यानि चास्त्राणि तेऽम्बिके ॥ करपल्लवसंगीनि तैरस्मान्
रक्ष सर्वतः ॥२७॥ ॥हे अम्बिके हे देवि यानि तत्र कर
पल्लवसंगीनि खड्गशूलगदादीनि दिव्यान्यस्त्राणि संति
तैश्च त्वं सर्वतः समंततः अस्मान् त्वदेकशरणान् देवा
न् रक्ष दुःखात् पापतः शत्रुतश्च पालय ॥ हस्तिशुंडोऽश्व
चापाग्रे बली हस्तः करः कुमान् ॥ करो हस्तः पाणिः पं
च शाखः शयः पाणिः ॥ अग्रकर शाखाः करपल्लवाः
तैः संगः तद्वंति करपल्लवसंयुक्तानि ॥ करः पल्लववद्
वकरपल्लवः तेन संगः तद्वंति करपल्लवसंगीनि हे

बकृते मि मालने पद स्यथा सतीमुद ॥ अस्माकं सतिदान
प्रति प्रकाशा वासं प्रदान ता भावात् ॥ सं वे ध्येप ध्येव ॥
मातापित्रोश्च पुत्राणां बालाना कीरोपुरयिते ॥ रजकूस्वां
शुक्रे द तेस्याभिमृश सस्यं वेत नामिति रतू ॥ पक्षं तरे च
घादि च ॥ कृ ॥ ॥ पश्च महेस्तवे रेभिस्तोकोप्यहम
कान ने ॥ तस्य वित्तर्द्धि विभ वै धनदारादि संपदां ॥३४॥ पा हे
देवाः द्वितीयं वरं प्रार्थयंते ॥ हे अंबिके हे देवि अम मे त्वा
२३ न ने हे प्रसन्न वदने त्वं अस्माभिः प्रसन्ना प्रणतास्से वि २३
तासु तीव रहा भि ॥ अतः यश्च मर्त्यः एभिस्तवैर्दृषये रस्मा
भिर्देवैः कृतैः स्तवैः त्वां देवीं स्तोष्यति भक्तिमान् पठि
ष्यति तस्य मर्त्यस्य मनुष्यस्य वित्तर्द्धि विभवैः सह
धनदारादि संपदां वृद्धये समृद्धये प्रभवेथाः सर्वदा
वित्तस्य गर्भस्य कृहेः समृद्धिर्विभवैरुकवैः सह
धनस्य गो महिष्यश्वादेर्दारणां पत्नीनां आदिशब्दा
त्सेवकादीनां संपदां क्षेत्राराम धान्य पुत्र मित्रादि

संपत्तीनां च वृद्धये च ॥ आत्मने लिङ् ॥ व्यत्ययो बहुलमिति त
आत्मनेपदं वैदिकं वेदलुक् छंदे वा स्तवनं भिति देवी
स्तु वचनस्य इथि तु प्रयुक्तमभिः ॥ पद्मादि वित्तधनमिति
पर्यायो ॥ तथाप्यत्र रात्रि गृह्यादिकं धनशब्देन विवक्षितं
वित्त इयश्च विभवश्चैश्वर्यं चा णिचते ॥ सह धनेन गवादि दा
रादि पत्न्यादि ते षां संपदः तासां ॥३५॥ ॥ ऋषिरुवाच ॥ ॥
सुमेधा सुमेधाः सुरथं राजानं वाक्यमुक्तवान् ॥ ॥ इति
प्रसादिता देवैर्जगतोऽर्थे तथात्मन ॥ तथेत्युक्त्वा भद्रकाली
बभूवांतर्हिता नृप ॥३६॥ ॥ हे नृप हे सुरथ इति प्राङ्युक्त
प्रणिपाते दैवैः जगतोऽर्थे त्रैलोक्यस्य संरक्षणलक्षणयोजनाय त
थात्मनः अर्थे च स्वार्थेन विषये देवकार्यार्थे च विषये
प्रा ॥ सा ॥ इस प्रसन्नी कृता प्रसाद सुमुखीकृता प्र
सन्नीकृता भद्रकाली भद्रा सर्वमंगला काली रुद्र
पत्नी कुर्वधारयः देवि तथास्तु देववांछितं वक्त्मसिधे

विलोक्या अंतर्हिता बभूव अंतर्धानमगात् ॥ अदर्शनं बभू
वा ॥ ३७ ॥ ॥ इत्थं तत्कथितं भूप संभूता सा यथा पुरा । देवी
देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ३८ ॥ ॥ हे भूप हे सु
रथ जगत्त्रयहितैषिणी सा देवी देवशरीरेभ्यः यथा पूर्वं तेजो
रूपा संभूता ता महिषासुरवधाय प्रादुर्भूता इत्येतत्सर्वं ते
तुभ्यं सुरथाय कथितं मया सुमेधसा मुनिना ॥ तथा पुनः कै
लुक्ले तत्र तत्तेजः सर्वदेवशरीरजं ॥ एकस्थं तदभूत्ना
२४ री व्याप्तलोकत्रयं त्विषा ॥ पुनश्च गौरीदेहात्सा समुद्भू २४
ता यथाभवत् ॥ वधाय दुष्टदैत्यानां तथा शुंभनिशुं
भयोः ॥ रक्षणाय च लोकानां देवानामुपकारिणी ॥
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ४० ॥ ॥
इदं श्लोकद्वयमेकान्वयं द्रष्टव्यं ॥ शृणुष्व
इति पदद्वयं ॥ हे स्वकीय आत्मीये हे भूप हे सुरथ
सा गौरीदेहात् देवानामुपकारिणी देवी पुनश्च

नो शत्रुरयं महिषासुरो नाम निहतः । यस्मात्कृतः अतस्त्वया भ
गवत्या सर्वमस्माकं देवानां प्रयोजनं कृतमेव न किंचिद
वशिष्यते ॥ न कश्चिदपि कार्यशेषोऽवशिष्यते न कश्चि
दपि शत्रुशेषोऽवशिष्टः ॥ ३४ ॥ ॥ यदि चापि वरो देय
स्त्वयास्माकं महेश्वरि ॥ संस्मृता संस्मृता त्वं नो हिंसेथाः
परमापदः ॥ ३५ ॥ ॥ हे महेश्वरि महानीश्वरस्तस्त्री यद्वा
महती ईश्वरी ॥ अश्नोते राष्ट्रकर्मणि ॥ वरट् ङीप् यायाः
हे देवि यदि प्रसन्ना त्वं भगवत्या अस्माकं दनुजा
जीविनां देवतानां त्रैलोक्यजननीकानां वरश्चेद्देयो नुम
तः स्यात्तर्हि अयं वरः प्रार्थ्यतेऽस्माभिः कोसौ हे देवते
परमापत्सु अस्माभिः स्वेदकराण्ये देवैः संस्मृता संस्मृता
सती वारंवारं ध्याता सती नोऽस्माकं परमापदः ॥ परमाः आ
पदः यद्वा परस्मा अ समर्था ॥ आपदः ये तत्र परमापदः
ताः त्वं हन्तात् महासंकटानि हिंसीथाः हिंस्याः हिंसेहिं
सायां रुधादिः आत्मनेपदं ॥ परस्मैपदस्थाने व्यत्ययः

पुनरपिद्रु देसानांद्रुष्पानांदेवाश्पीउ कानांधूम्र
लोचनचंडमुंडरक्तबीजादीनां देत्यानां वधाय
चताभ्यं शुभनिशुंभयोर्वधायचलोकानां रक्षणा
यचप्रयोजनामेव आगेरी देहासमुद्भुतागौर्याः
देहासमुद्भूता अभवत्॥ असीत्॥ तेसर्वयथा
हंतु यथार्थयोवत्॥ हेतुष्पं राजकथयाम्यहं।
सुमेधानाम ऋषिः तत् यथावत् यावत् प्रको
शेपितंमयाकथितं श्रुत्वा आकर्णय॥ स्रणु चैतपा
हेतुस्य यो बहुल भिसालालनपदं॥ शुंभकाष्णे
हिंसा यांच श्वाश्रि॥ शुभाति रागस्ते हिनंगीस
शुंभः दं यादिहये॥ ताजप्यादि भ्यादि शुंभगं
शुभआमोनेचतुलादि शुंभति रोभलेन णेधि
तिशुपः॥ यथाप्रकारवते यथावत्॥ क्रियादिरोष
णं॥ ५॥ ॥ इति श्रीमहाआदिधिराजश्रीप्रतो
मरान्चे येश्री मेडुङ्गरणालिजश्री श्रीकांतनुक्रम

वालिनिरस्थितायाँ शां तनन्यां चंद्रिकामहात्म्यटीका
यां शाकारिसूक्तानि विध्यूपलक्षितलक्ष चतुर्थोध्या
यः॥४॥ ॥ श्रीजगदंबार्पणमस्तु ॥

शुंभति भाषते हि नस्ति शुंभः दंभादिः निरहूमो निशुं
भः॥ ताभ्यामित्यादि पाठे शुंभः शुंभपरो नाथ तुराटिः शु
भितन्नाभलेरणेषु शुंभः॥१॥ ॥तावेव सूर्यतां तद्व
दधिकारं तथैंदवं॥ कौबेरमथ याम्यं च चक्राते व
रुणस्य च॥२॥ ॥तावेव शुंभनिशुंभावेव काम
रूपत्वात् सूर्यतां सूर्यरूपतां सूर्यभावं च चक्राते अधि
दे ष्ठितवंतौ अधिकार इत्यनेन सूर्यभावमिव ऐंदवं
३ इंदुसंबंधिनमधिकारं आधिपत्यं तावेवासुरौ च ३
क्राते॥ तथा तावेव कौबेरं कुबेरसंबंधिनमधिका
रं कुबेरपदं च चक्राते॥ अथ च तावेव याम्यं यम
देवताकं अधिकारं यमपदं च चक्राते तथा तावेव
शुंभनिशुंभौ वरुणस्य अधिकारं चक्राते [illegible]॥ या
म्यमिति दिक्सारिर्वांहि हस नवकेशर पुंडरीपण्डू इत्य
प्रादिष्यतो येषां पुं॥ ... ति नाम्यो मितिस्थाः॥१

सूर्येंदुकुबेरयमवरुणाधिकारान् तावेवासुरौ चक्रा व
प्यगृह्णीतामितिभावः॥२॥ ॥तावेव पवनर्द्धिं च चक्र
तुर्वह्निकर्म च॥३॥ ॥तावेवासुरौ पवनस्य वायोः ऋद्धिं
अधिकृतिं ऐश्वर्यं च चक्रतुः॥ तथा तावेवासुरौ वह्नेः क
र्म च अग्निव्यापारं चक्रतुः॥ अन्येषां चाप्यहीष्टां तावधिका
रान्दिवौकसां॥४॥ तावेवासुरौ अन्येषां च दिवौकसां देवा
नाम धिकारान् अग्रहीष्टां॥ इदमर्द्धकाप्येवं दृश्यते॥४॥
नि ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः॥५॥ ततस्ताभ्या
मसुराभ्यां सकाशात् पराजिताः प्राप्तपराभवाः अतएव
भ्रष्टराज्याः भ्रष्टाधिकाराः देवा विनिर्धूताः स्वर्गान् दूरीकृताः नि
आसन्॥ ताभ्यामसुराभ्यां विनिर्धूताः समुत्सिताः स्वर्गात् इ
तिभावः॥५॥ ॥हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निरा
कृताः॥ महासुराभ्यां तां देवीं संस्मरंत्यपराजितां॥६॥ ॥
ताभ्यां शुंभनिशुंभाभ्यां महासुराभ्यां सर्वे हृताधिकाराः अ

पहृतराज्याः निराकृताः निरस्ताः सर्वे त्रिदशाः देवाः तां प्रसि
द्धां अपराजितां कैरप्यपराजितां अपरानूतां अपरैरजितां
अपरैरनभिभूतां देवीं स्मरंति स्म। स्मातीत्यव्ययः स्मृतवंतः
संस्मरंतीति पाठे स्मे इत्यध्याहृत्य लट्। स्मरंति भूते लट् प्र
योगो ज्ञेयः। प्रत्यादिष्टो निरस्ताः स्योत्थस्याख्यातो निरा
कृतः अपराजिता नाम देवी तया निराकृता देवाः कां
बुद्धिमुपेत्य कं देशं गता इत्यत आह ॥६॥ ॥तयास्माकं
२ वरो दत्तो यथापत्सु स्मृताखिलाः॥ भवतां नाशयिष्या २
मि तत्क्षणात्परमापदः॥७॥ ॥इति कृत्वा मतिं देवा हि
मवंतं नगेश्वरं॥ जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टु [illegible]
वुः॥८॥ ॥यथा प्रागुक्तप्रकारेण आपत्सु परमापत्सु स्मृ
ता सती तत्क्षणाद्देव भवतां देवानां अखिलाः परमा
पदः नाशयिष्यामि इति तयास्माकं देवानां च वरो दत्तो इ
ति मतिं मनसि कृत्वा चेतसि निधाय देवाः हिमवंतं नगेश्वरं

श्रीमन्त्रेराटपस्तनुस्वरवसुनवेनमः॥ ऋषिरुवाच॥
ऋषिः सुमेधाः सुरथं राजानं वाक्यमब्रवीत्॥ पु
रा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः॥ त्रैलो
क्यं यज्ञभागाश्च हृता मदबलाश्रयात्॥१॥
हे राजन् पूर्वस्मिन् शुंभनिशुंभाभ्यामसुराभ्यां द्वाभ्यां
कर्तृभ्यां मदबलाश्रयात् मदेन बलेन सहितं बलं सा
मर्थ्यं मदबलं तस्याश्रयः संश्रयणं तस्मात् हेतोः
मदबलान्वितत्वात् शचीपतेः इंद्रस्य इंद्रत्वं सका
शात् त्रैलोक्यं हृतं अपहृतं ॥ च पुनः यज्ञभागाश्च
हृताः यज्ञसंबंधिविभागा अपि इंद्र
स्य विहृताः त्रयो लोकास्त्रैलोक्यं यज्ञभागानां भा
गा नाशिताः॥ हर्षेणार्थे मुड्डः क्षेप्ये गजदानेन्द्र कीर्ति
ताः॥ स्को ज्वसा मर्थ्ये स्थे न्येषु बलं नाक केसीदिणाः॥
शुंभ वाषण्णे हिंसायां चस्योर्दिः परस्मैपदी॥ दं सा

प्रकृतिः पार्वती साक्षात् प्रत्ययस्तु महेश्वरः । अर्द्धना
रीश्वरः शब्दः कामधुग्वः प्रसीदत्विति ॥ तस्यै नमः भद्द
कायै नमः । भद्रा सर्वमंगला भद्ररूपे स्वर्थः ॥१०॥ ॥
नियताः प्रणताः स्मतां ॥११॥ ॥ तां प्रसिद्धामस्मद्दर्श
ने विको नियताः जितेंद्रियाः प्रणताः नम्रीभवामः
स्मशब्दः पूरणेऽव्ययं । नियति प्रणतास्म नां इति पाठे भ
क्ति प्रह्वभावानां पुंसां नियत्यै दिष्ट्यै च नमः भाग्यरूपा ३
३ यै नमः स्वर्थः । दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्वि
धिः ॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥११॥ ॥
रुद्रस्येदं रौद्रं रूपमुग्रमस्त्यस्यां रौद्रा रौद्रायै नमः ॥
रौद्रशब्दः आदित्वादच् । नैध्रुवे त्यफ नित्यायै कालत्र
यावस्थितायै नमः । उरी उघोषो रुदादिरनुदात्त इगुरते
गौरं पंचाघच् । इगुपधत्वात् कोवा । गुरुः गौरव एव वा गौ
रः प्रज्ञादिन्य श्रेति स्वार्थेऽण् ष्याणितिस्त्रिया ङीप् । प

द्मवर्णवाचित्वेन रूढत्वात् षिद्गौरादिभ्यश्चेति निपातना
त्साधुत्वे ङीप् । गौर्यै पार्वत्यै नमः । गौरी गौरवर्णा गौर
वर्णयोगात् । पवागुङः व्यक्ते शब्दे अनउणादौ रिङ्गादि
सूत्रेण रनिवृद्धौ निपातितायां गवतेगौरः गौरोऽरुणे सि
ते पीते च । धात्र्यै धरण्यै नमोऽस्तु धात्र्यै उपमात्रे च नमः ।
धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि ॥११॥ ॥
ज्योत्स्नायै चंद्ररूपिण्यै सुखायै सततं नमः ॥१२॥ ॥
ज्योतिः शास्त्रविशेषस्याज्ज्योतिर्नक्षत्रतेजसोः ।
ज्योतिर्नाभास्करे क्लीबमग्निखद्योतं दृष्टिषु ॥ ज्यो
तिरस्त्यस्यां ज्योत्स्ना तस्यै ज्योत्स्नायै सततं नमः ।
चंदि आह्लादने । चंदतीति चंद्रः रूपरूप क्रियायां रूप
रूपदर्शने च चुरादिः । चंद्रं रूपयतीति तच्छीला चंद्ररू
पिणी तस्यै चंद्ररूपिण्यै सततं नमः ॥ चंद्रस्य रूपं क
रोति चंद्ररूपिणीति च व्युत्पत्तिः । सुखं डः खनक्रियां

यां सुखनं दुःखनं च तत्क्रिया ॥ सुखयतीति सुखाप
त्या यच्च । सुखायै सुखकारिण्यै सततं नमोऽस्तु ॥१२॥
॥ कल्याण्यै प्रणतां वृध्यै सिध्यै कूर्म्यै नमो नमः
॥१३॥ ॥ कलासु साधुः कल्या शुभात्मिका वाणी
ण. कल्यमैतिकल्य निरुक्तेर्वा अणतिकथयति क
ल्याणी तस्यै कल्याण्यै नमः । अणशब्दार्थः कर्म ४
४ व्यणु । किंच जगद्भिः वृध्यै सिध्यै च प्रणतां वंदितां
जगज्जननीं तां देवीं प्रतिनमः । नतिं कूर्मः । कूर्म्यै
इति पाठे कूर्म्यै कूर्मजातिशक्त्यै भूभारोद्धरण समर्थ
कर्मशक्त्यै नमः । कौर्म्यै इतिपाठेपि कर्म संबंधिन्यै
शक्त्यै नमः ॥१३॥ ॥ नैऋत्यै भूभृतां लक्ष्म्यै शर्वा
ते ण्यै नमो नमः ॥१४॥ ॥ निःक्रांता ऋतेः सन्मार्गान्नि
ऋतिः अलक्ष्मीः अन्यायोपार्जिता लक्ष्मीः अलक्ष्मीः

नगाधिराजं जग्मुः प्रयुः । ततस्तत्र विष्णुमायां देवीं प्रतु
ष्टुवुः । प्रहर्षेण भक्तिपूर्वकं स्तुतवंतः । विष्णुमाया महा
माया इति पर्यायौ । अथवा वेवेष्टि विष्णुः मानं माया विष्णु
र्माया मानं परिमाणं यस्याः सा तथोक्ता सर्वव्यापिके
त्यर्थः प्रतुष्टुवुरिति प्रः आरंभे । स्तोतुमारब्धवंत इ
त्यर्थः ॥ देवा ऊचुः । स्तुत्युपयोग्यानि वाक्यान्यूचिरे ॥ ८
नमो देव्यै महादेव्यै शिवायै सततं नमः ॥९॥ दिव्यति वि
जिगीषते देवी तस्यै देव्यै सततं नमोऽस्तु ॥ महान् देवो म
हादेवः तस्य स्त्री महादेवी महती वा देवी महादेवी तस्यै
महादेव्यै सततं नमः शिवायै मंगलहेतवे भवान्यै सत
तं नमः पुंयोगेतु शिवस्य स्त्री शिवा ॥९॥ ॥ नमः प्रकृत्यै
भद्रायै ॥१०॥ प्रकृतिर्जगत्कारणं सत्वरजस्तमसां सा
म्यावस्था ॥ यद्वा जंगमं त्रापेक्षया मूलमंत्रमात्रालि
कादेवता प्रकृतिः । यद्वा प्रत्ययात्पूर्वा प्रकृतिः । यदाहुः ।

सप्तशती हे सर्वकारिणि देवि तेतुभ्यं दुर्गायै सततं नमः ॥ दुःखे टिकापं०५
न गम्यते दुर्गा । यद्वा दुःखेन गच्छत्यस्यां दुर्गा । सुदु
रारधिकरणे इति वक्तव्यात् । गमेर्डः । तथा हि स
र्वकारिणि देवि तुभ्यं दुर्गपारायै सततं नमः । दुर्गपा
रं यस्याः सा महामाया स्व सिंधोः सा दुर्गपारा य
द्वा पारं तीरं कर्म समाप्तौ । पारयति पारा दुर्गाणां का
५ र्याणां पारा दुर्गपारा । यद्वापि पर्त्ति पारा । दृ पालन ५
पूरणयोः । दुर्गाणां पारा दुर्गपारा । यद्वा दुर्गाः पाराः
पारायतो गणाः यस्याः सा दुर्गपारा नाम देवी ।
हे सर्वकारिणि हे देवि तुभ्यं सारायै संसारसारा
यै धनायै श्रेष्ठायै सततं नमोस्तु ॥ हे सर्वकारिणि
हे देवि तुभ्यं ख्यात्यै विख्यातिरूपायै सततं नमः
हे सर्वकारिणि हे देवि तुभ्यं कृष्णायै कृष्णवर्णायै

कालरात्र्यै सततं नमः ॥ तथैव हे कारिणि देवि तुभ्यं
धूम्रायै धूम्रवर्णायै सततं नमः । सर्वं करोतीति स
र्वकारिणी तत्र संबुद्धिः हे सर्वकारिणि । सर्वकारि
ण्यै इति पाठे सर्वकारिण्यै दुर्गायै देव्यै सततं नम
इत्यनुसंधेयं ॥१५॥ ॥ अति सौम्याति रौद्रायै नम
स्तस्यै नमो नमः ॥१६॥ ॥ सामाद्यण् ॥ सौम्यं सो
मदेवताकं सुंदरं च मनोहरं रूपं अस्यर्थं सौम्यं य
स्याः सा अति सौम्या । रुद्रदेवताकं रुद्रसंबंधि वा
रूपं रौद्रं यस्याः सा अति रौद्रा । तत्र भजता
मभजतां च यथाक्रमात् सौम्या चासावतिरौ
द्रा चेति कर्मधारयः ॥ तस्यै अति सौम्याति रौद्रायै
वा सौम्या रूपायै त्रिशक्त्यात्मिकायै देव्यै नमो नमः
इति त्रयोपदं नमस्त्रयं । सोमस्य भावः सौम्यं सौ

वेष्यत्र॥ रुद्रस्य भावः रौद्रं इत्यादि त्वाभावे ष्यः॥
अतिक्रांतं सौम्यं यस्याः सा अतिसौम्या। अतिक्रां
तं रौद्रं यस्याः सा अतिरौद्रा ततः कर्मधारयेस
इत्यप्य तितस्यै नमः॥ नुसंधयं॥१६॥ ॥ नमो जगत्प्रतिष्ठा
यै देव्यै कृत्स्यै नमो नमः॥१७॥ ॥ जगतां प्राणभृ
तां प्रतिष्ठां आस्पदं आधारशक्ति स्थानं मूलाधा
र संज्ञं न त्प्रतिष्ठेत्युच्यते॥ आस्पदं प्रतिष्ठायामित्या
स्पद शब्दपर्यायः॥ प्रतिष्ठाशब्दः॥ दिवू क्रिडादौ
दिव्यति देवी तस्यै। क्रीडा विजिगीषाद्यर्थ क्रियाका ६
५५ रिण्यै देव्यै नमः॥ करणं कृतिः प्रयत्नः सर्गस्थि
ति प्रत्यवहारविषयः प्रयत्नो यत्र विवक्षितः॥
तस्यै कृत्स्यै कृतरूपायै प्रयत्नरूपायै नमः नम
स्यानां त्रित्वादिह न क्षिप्तं। कृत्स्यै इति पाठे त्वनं

स्याद् लक्ष्मी रुक्तः निर्ऋतिः निर्ऋतिरियमाहृतिनैर्ऋ
ती तस्यै नैर्ऋत्यै अलक्ष्मी रूपायै ते तुभ्यं। शर्वाण्यै शं
भुपत्न्यै नमो नमः यद्वा निश्चिता ऋतिः सत्यं नीय
न सत्य निर्ऋतिः नैर्ऋते र्दिस्वाल्लस्येयं नैर्ऋती तस्यै
नैर्ऋत्यै नैर्ऋत्युपार्जित लक्ष्मी रूपायै ते तुभ्यं
शर्वाण्यै शंभुपत्न्यै नमो नमः। अथ च भुवं बिभ्रति
भूभृतः आदि मेदुकादि कूर्मादि नागादि कुलपर्वता
दि मनु प्रभृति राजानः तेषां भूभृतां लक्ष्म्यै ल
क्ष्मी रूपायै ते तुभ्यं शर्वाण्यै शंभुपत्न्यै नमो नमः।
शर्वस्य स्त्री शर्वाणी इंद्रवरुणेत्यादिना पुंयोगे ङीधा
तुकौ॥१८॥ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारि
ण्यै॥ ख्यात्यै तथैव कृष्णायै धुम्रायै सततं नमः॥१९॥

सप्तशती

टीकाप०६

नपौनरुक्त्यं दोषावहं यदुक्तं। प्रकर्षहर्षकोपेषु स्व
प्रदैन्यभयेषु च। स्त्र स्यांभासानुवादेषु पौनरु
क्त्यं नदुष्यति। सर्वाणि पृथिव्यादीनि भूतानि एषा
मारं१२ कत्वेन संततानि सर्वभूतानि देहानि इ
ति प्रथमा देवी विष्णुमाया।।१८।। यादेवी सर्वभूते
षु चेतनेत्यभिधीयते।। नमस्तस्यै०।।१९।। ।।
अभिधीयते कथ्यते। चुरादावात्मनेपदी चित
७ संचेतने संवेदने वा चेतनं चेतना ननु चेयं बुद्धि ७
रेवेति कथं पौनरुक्त्यं। सत्यं। यद्यपि वैशेषिका
दौ दर्शने चेतना बुद्धिरेव तथापि सांख्ये बुद्धिध
र्माश्रित वृत्तिविशेषविजृंभित शक्तिश्चेतने त्या
श्रयणाद पौनरुक्त्यं। अन्ये तु चेतना चित्तवृत्ति

विशेषशक्तिः संज्ञानं वा। बुद्धिस्तु स्वप्रकाशज्ञान ज्ञान
स्वभावेत्याहुः।। अन्ये तु निर्विकल्पज्ञानं चेतना बु
द्धिस्तु स्वशेष विशेषावगतिः सविकल्पज्ञानमित्य
स्थितयोर्भिदेत्याहुः।। इति द्वितीया देवी चेतना।।१९।।
।। यादेवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।। नम
स्तस्यै।।२०।। ।। बुद्धिरित्येवरूपेण संस्थिता स
म्यगवस्थिता। यदस्य धुः। संस्थाराधे स्थितो मृ
तौ।। इति तृतीया देवी बुद्धिः।।२०।। ।। यादेवी सर्व
भूतेषु निद्रारूपेण संस्थिता।। नमस्तस्यै०।।२१।।
।। निद्रा तिरूपं तेन। द्राकुत्सायां। नियते द्रास्य
स्यां निद्रा संनिवेशः भुक्तान्नादिपरिपाकादिहे
तुर्निरीन्द्रियप्रवेशो मलकोशो मनसोवस्थानं नि
द्रा सर्वैन्द्रियव्यापारविरतप्राणनं सुखं निद्रस्य

न्यै इति चतुर्थी देवी निद्रा ॥२१॥ ॥ या देवी सर्वभूतेषु टिका प० ६
सप्तशती क्षुधारूपेण संस्थिता ॥ नमस्तस्यै ॥२२॥ क्षुध बुभु-
क्षायां । संपदादित्वात् भावे स्त्रियां क्विप् ॥ क्षुधा प्राति-
पदिकं क्रुमिष्टा क्षुत् ॥ अशनाया बुभुक्षा या क्षुत् त-
या क्षुधा । रूपेण ति एयक् पदं ॥ यद्वा वष्टि भागुरि-
र् ल्लोपमवाप्योरुपसर्गयोः । हलंताद पिटापवा
यथा वाचा निशा दिशा ॥ ततश्च क्षुधेति रूपं स्वरूपं
तेन क्षुधारूपेण क्षुधां विना प्राणिनां शरीरस्थितां
सुखं नास्ति इति पंचमी देवी क्षुधा ॥२२॥ ॥
या देवी सर्वभूतेषु छायारूपेण सं।स्थिता ॥ नमस्तस्यै
॥२३॥ ॥ छाया प्रतिबिंबरूपा सर्वभूतेषु तिष्ठ-
ति । नष्टछायो मध्याह्न इसंत्रतु आतपाभावाभावो
विवक्षितः ॥ छाया सूर्यप्रिया कांतिः प्रतिबिंबम

त स्यात् जगदिति कर्म विवक्षितं । जगत्कारणशीलायै देव्यै
नमइत्यर्थः ॥१७॥ ॥ या देवी सर्वभूतेषु विष्णुमायेति
शब्दिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
॥१८॥ ॥ या देवी वा ज्ञो मात्मिका सर्वभूतेषु काल-
त्रयात्मिका सर्वेषु भूतेषु भूतात्मिका अनात्मन्या-
त्मबुद्धिं जनयंती आत्मनि चानात्मबुद्धिं जनयंती
सती ममतावशात् येतान् लोकान् प्रसुयमाना स-
र्वजननी महामाया भगवती विष्णुमायेति शब्दि-
ता कथिता । तस्यै त्रिरूपायै साक्षिकायै शानस्यै ता-
मस्यै च प्रत्येकं कायवाङ्मनोभिः एकस्यै वैकस्या
देव्यै भक्तिश्रद्धातिशयद्योतनाय नमः शब्दो नम-
स्यै न च सहाम्रेडितः ॥ आम्रेडितं द्वित्रिरुक्तं ॥
चापले द्विवचनं संभ्रमेण प्रवृत्तिश्चापलं । इत्यंहि

मारंभकत्वेन संजिता निपूर्वभूता निरूहानितेन
त्रितृषा पिपासायां तृषि न्धे। सिरसि त्यः किचनः
तृष्णा। उपभोग निमित्त को भिलाषः। तृष्णा भिल
षणं भोगे तृष्णा वन पिशाचिका॥ तल्लेस्पृहापि
पासे द्वे तद्रूपे हां विकाम्भतः॥ तर्षणं तृष्णा स्पृहा
निरूढलक्षणं चात्। इत्यष्टमी देवी तृष्णा॥२५॥
१ यादेवी सर्वभूतेषु क्षांतिरूपेण संस्थिता॥ नमस्त २
स्यै०॥२६॥ ॥क्षमूष् प्रहसने षित्वात् स्त्रियांष्
माबाहुलकांनु भुक्तिति क्षांतिः अनुनासिक
स्य किं कलोः क्तिति दीर्घः। क्षांतिः क्षमति तिक्षा
चमर्षः सहनार्थकाः क्षांतिस्तृष्णा विरोधिनी तृ
ष्णा परिपंथिनी परप्रयुक्ता पकारं प्रत्यपेक्षाप्र
तिकूलवेदनां प्रत्यपेक्षत्वा। इति नवमी देवी क्षां

तिः॥२६॥ ॥यादेवी सर्वभूतेषु जातिरूपेण संस्थिता॥ न
मस्तस्यै०॥२७॥ ॥नित्यैकानुगतप्रत्ययहेतुरनेक
समवायिनी जातिः। तथा मनुष्येषु मनुष्यत्वं गोषु गो
त्वं जातिः समान्य जन्मनोः जायतेनया भिन्नेष्वभि
न्नो भिधान प्रत्ययो जातिः इति दशमी देवी जातिः॥२७॥
॥यादेवी सर्वभूतेषु लज्जारूपेण संस्थिता॥ न
मस्तस्यै०॥२८॥ ॥ॐ लस्जी व्रीडे। स्त्रियां गुरो
श्च हलः इत्यः प्रत्ययः। हलोजशब्दः श्चुत्वं। स्त्रिया
म जापतष्टाप्। कर्त्तव्याकरणनिमित्तं अकार्यकु
रन निमित्तमन्यतः स्वतो वाजनितं लज्जनं संको
चनं मनुष्यादिचितेषु लज्जेत्युच्यते॥ इत्येकाद
शी देवी लज्जा॥२८॥ ॥यादेवी सर्वभूतेषु शांति
रूपेण संस्थिता॥ नमस्तस्यै॥२९॥ शम् उपशमे।
स्त्रियां क्तिन् शांतिवेति दीर्घः॥ शामयस्ते शामं क्रां

तिः कामक्रोधाद्यभावः। शांतिर्विहितेंद्रियनिवृत्ति
शांतिरित्यन्ये विषयव्यावृत्ता स्वतां शांतिरित्यपरे। इ
ति द्वादशी देवी शांतिः॥१९॥ ॥ यादेवी सर्वभूतेषु श्र
द्धारूपेण संस्थिता॥ नमस्तस्यै॥२०॥ ॥ डुधाञ्
धारणे पोषणयोः। सम्पदादिस्योपसंख्यानमिति रूप
सर्गे संज्ञा आतश्चोपसर्ग इति स्त्रियामङ्। श्रद्धा
नं श्रद्धा श्रद्धा संप्रत्ययः स्पृहा सत्यं तपो भक्त्यति
१० शायः। श्रद्धापरयोपेत इति वत्। शास्त्रोक्तेर्थे विप १०
रीते बुद्धिः श्रद्धेत्यन्ये। आदरेणानुसरणं भक्तिः
श्रद्धा सात्त्विकबुद्धिरित्यपरे इति त्रयोदशी देवी श्र
द्धा॥२०॥ ॥ यादेवी सर्वभूतेषु कांतिरूपेण संस्थि
ता॥ नमस्तस्यै॥२१॥ कामुकांतौ। कान्तेणिङ्। अ
धादयः अर्द्धधातुके वा स्त्रियां क्तिन्। अनुनासिकस्य

नातपः॥ प्रतिबिंबे यथासे क्रांति छाय आदर्शः। छ
ति छिन्नत्ति संतापं छाया। इति षष्ठी देवी छाया॥२५॥
॥ यादेवी सर्वभूतेषु शक्तिरूपेण संस्थिता॥ न
मस्तस्यै॥२६॥ ॥ शक्लृ शक्तौ। शकनं शक्तिः
सामर्थ्यं वस्तुगतः स्वभावसिद्धो धर्मः शक्तिरि
ति रूढं तेन शक्तिः प्रतिवस्तु प्रतिनियतार्थक्रि
याकारित्वं वस्तुधर्म इत्येके। वस्तुस्वरूपमेव
शक्तिः ननु वस्तुनोन्यो धर्मः शक्तिरित्यन्ये अभ्यु
पजग्मुः॥ इह तु सर्वभूतेषु स्थाधाराधेयभावा
नुवादाच्छक्तिः॥ वस्तुधर्म इत्येष पक्षोऽभ्युपगतः।
इति सप्तमी देवी शक्तिः॥२७॥ ॥ यादेवी सर्वभू
तेषु तृष्णारूपेण संस्थिता॥ नमस्तस्यै॥२८॥
॥ सर्वाणि भूतानि पृथिव्यादीनि। येषां देहानां

संस्थिता॥नमस्तस्यै०॥२४॥ ॥वृतु वर्त्तने स्त्रियां क्ति
न्॥वर्त्तनं वृत्तिः यद्वा वर्त्तते नया वृत्तिः आजीवो जीवि
का वार्त्ता वृत्तिर्वर्त्तन जीवने॥वृत्तिर्जीवनोपायः॥यु
क्ते क्ष्मादावृत्ते भूतं प्राप्त्यतीतं समे त्रिषु॥भूतं क्ली
बे ग्रहे युक्ते पृथिव्यादध्वतेपिच॥त्रिषु प्राप्तावती
तेव प्राणिस्वपि समे पिच॥सर्वे भूताः प्राणिनः सर्व
भूताः तेषु। इति सप्तदशी देवी वृत्तिः॥२४॥ ॥या
 देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता॥नमस्तस्यै
०॥२५॥ ॥या चिंता स्मृतिराध्यानं॥अनुभूतभा
वनाख्य संस्कारहेतुको ज्ञानविशेषः स्मृतिः इत्यष्टा
दशी देवी स्मृतिः॥२५॥ या देवी सर्वभूतेषु दयारूपेण
संस्थिता॥नमस्तस्यै०॥२६॥ ॥दय रक्षणे॥षि
द्भिदादिभ्योऽङ् दयंते नेन॥दया कृपानुकंपा स्यात्॥पर

दुःखप्रहरणेच्छा परदुःखसमभाक्कं वा दया॥ इत्येको
नविंशी देवी दया॥२६॥ ॥या देवी सर्वभूतेषु नीति
रूपेण संस्थिता॥नमस्तस्यै॥०॥२७॥ ॥नीतिर्नयः
इति विंशती देवी नीतिः॥नीतिप्रक्षिप्सा इति केचित्॥
२७॥ ॥या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता॥
नमस्तस्यै०॥२८॥ ॥तुष प्रीतौ॥तुष्टिः प्रीतिरानंदः
विषयोपभोगमवाप्य तदभिलाषादुपरमस्तुष्टि
रित्यपरे। अन्ये तु तुष्टिं विषयोपभोगं प्राप्य पुन
स्तदभिलाषाधृत्तदवाप्या वामं परं सुखमित्याहुः।
इत्येकविंशी देवी तुष्टिः॥२८॥ ॥या देवी सर्वभू
तेषु पुष्टिरूपेण संस्थिता॥नमस्तस्यै०॥२९॥ ॥पु
ष पुष्टौ॥पुष्टिरवयवोपचयः॥पुष्टिरवयवोपनिर्मिति
इति अपरे॥इति द्वाविंशी देवी पुष्टिः॥२९॥ ॥या दे

सप्तशती वी सर्वभूतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै० ॥ २० ॥ टिकापं०८
॥ सर्वेषु भूतेषु जनयितव्येषु जनयितुं योग्येषु वि
षयेषु या देवी मातृरूपेण कारणरूपेण प्रकृतिरूपे
ण सम्यगव तिष्ठते ॥ नमस्तस्यै ॥ मात्यं मास्यस्यां गर्भ
इति माता ॥ जनयित्री प्रसूर्माता । यद्वा मान पूजायां ।
मान्यते पूज्यते माता । उणादौ तं इति सूत्रेण निपात्य
ते यद्वा । अष्टौ मातृनाम्नः । आद्याः शक्तयो वा श्र ९२
विना भूत स्तुष्टिरेव न दृश्यते ॥ ब्राह्मी माहेश्वरी चैं
९२ द्री वाराही वैष्णवी तथा ॥ कौमारी चर्ममुंडा च काल
संकर्षणी तथा ॥ इति त्रयोविंशी देवी माता ॥ ४० ॥
॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥
नमस्तस्यै० ॥ ४१ ॥ भ्रांति मिथ्यामतिर्भ्रमः अतत
स्मिंस्तदिति ज्ञानं भ्रांतिः तद्रूपेण । इति चतुर्विंशी
देवी भ्रांतिः ॥ तदिति विष्णुमायादि भूत-भूतयोर्व्यास

क्विकलोः क्तिर्दीर्घः । शोभा कांतिर्द्युतिश्छविः कमनं कांतिः
काम्यते वा कांतिः । कांतिः शुभेच्छया स्त्रियां । अन्ये तु कां
तिर्ज्योतिः स्वरूपा ज्वलते त्याहुः ॥ इति चतुर्दशी देवी
कांतिः ॥ ३१ ॥ ॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण सं
स्थिता ॥ नमस्तस्यै ॥ ३२ ॥ ॥ सर्वाणि भूतानि या
निरूपाणि तेनु लक्ष्यं दर्शनांकनयोः चुरादिः ॥ लक्षेर्नु
ट्च इति ईः तस्य मुडागमः । नेड्वशी ति करणे रनिटि
ति लोपः ॥ लक्ष्मीः पद्मा विभूति श्री कायशोभा च की
र्तिता ॥ इति पंचदशी देवी लक्ष्मीः ॥ ३२ ॥ ॥ या
देवी सर्वभूतेषु धृतिरूपेण संस्थिता ॥ नमस्तस्यै० ३२
॥ ॥ धृञ् धारणे धात्वादिः स्त्रियां क्तिन् । धृतिः
स्याद्धारणे धैर्ये सौख्यसंतोषयोरपि । इति षोडशी
देवी धृतिः ॥ ३२ ॥ ॥ या देवी सर्वभूतेषु धृतिरूपेण

इतिरूकप्रत्ययः॥ ● चेतनं चितिः संज्ञानरूपेणया
देवी एतत्सकलं अखिलं जगत् व्याप्य स्थिता अवि टिकापं०८
चलिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः॥
रसस्प्राशी पुनः पुनर्नतेरनेककर्तृकत्वाद्धनेकस्तोतृकत्वाच्च
नपौनरुक्त्यमार्थं शाब्दं वाप्रकनीयं॥५७॥ ॥
स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिने
षु सेविता॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि
भद्राण्यभिहंतु चापदः॥५८॥ ॥ पूर्वं पूराकल्पे १२
१३ सुरैः स्तुता तथा अभीष्टसंश्रयात् अभीष्टस्यव
स्तुनः संश्रयात् सुरेंद्रेश दिनेषु सेविता सुरेंद्रः
शक्रः ईशः शंकरः दिनेशः सूर्यः तैः सेविता आ
हिता अतएव भद्रमणतिभद्राणी अस्तु भद्रमिति
कथयंती अतएव शुभहेतुः साईश्वरी ईश्वरस्य प

त्नी नः अस्माकं देवानां शुभानि मंगलानि करोतु
किंचनः अस्माकं आपदश्च विरोधिजनितदुःखा
नि चाभिहंतु विहंतु। सुरेंद्रेण दिनेषु सेवितेति
पाठे। सुरेंद्रेण शक्रेण दिनेषु प्रसह्य अभीष्टसंश्र
याद्धेतोः सेविते सर्थः शुभानि भद्राणि इतिच्छे
पानि नः शुभानि जगद्धितानि कर्माणि प्रार्थनीया
नि तानि च भद्राणि अनुकूलानि अबाधानि अवि
घ्नानि करोत्वित्यर्थः॥ ईश्वरीति अभ्यो नेराशुक
र्मणि वरेट्ट्चोपधायाः इत्यपि व्युत्पत्तेरमनु
संधेयं। अभीष्टसंश्रयेति पाठे अभिष्टः वांछि
तः संश्रीयमाणः संश्रयो यस्याः सकाशात् भव
ति सा अभीष्टसंश्रया देवी॥५९॥ ॥ या सां
प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्न

ससप्तमी मस्यते॥ याच स्मृता तत्क्षणमेव हंति नः सर्वापदो भ
क्ति विनम्रमूर्त्तिभिः ॥८२॥ ॥ सुरैः स्तुता सा देवी टिकापं०८
३ नः शुभहेतुरिस्यत्कं साकां[?] यां ह। यादेवी सांप्रतं
इदानीं उद्धतदैत्यतापितैः उद्धतैर्निर्मर्यादैर्बला
ढ्यैर्दैत्यैः शुंभनिशुंभाद्यैस्तापिताः संतापिताः
वयं सुराः तैरस्माभिः सुरैः ईशा स्वामिनी नमस्य
ते॥ सेव्यते। याच देवी भक्ति विनम्रमूर्त्तिभिः स्मृ
ताच स्मृतैव सती तत्क्षणमेव स्मृतिकाल एव नोस्मा
कं सुराणां सर्वापदो हंति। सर्वाः आपदः ताः यद्वा
सर्वाः आपदो येतः स्युः ते सर्वापदः शत्रवः तान्
सांप्रतं अव्ययं। इष्टे ईशा पचाद्यच्। इगुपधज्ञाप्री
करः कः। भक्त्या विनम्राः मूर्तयः कायाः येषां ते
तथोक्ताः तैर्नमस्यते इति नमो चरिवचित्रङ् दुःख

र्वं भूतेषु वर्त्तमाना भ्रांत्यंता अष्टचतुर्विंशति प्रदर्शिताः
॥७०॥ ॥ इंद्रियाणामधिष्ठात्री भूतानामखिलेषु या। मूला
भूतेषु सततं व्याप्त्यै देव्यै तस्यै नमोनमः ॥७१॥ ॥ या
देवी भूतानां पृथिव्यादीनां पंचानां अधिष्ठात्री आधा
रशक्तिः स्वामिनी ईश्वरी व्यापिनी या च देवी अपरेषु
अखिलेषु भूतेषु विशिष्टेषु प्राणिषु वर्त्तमानानां भूतानां
प्राणिनामिंद्रियाणां मनोनेत्ररसनघ्राणत्वक्
कर्णानां च अधिष्ठात्री आधारशक्तिः स्वामिनी
ईश्वरी व्यापिनी प्रवर्त्तयंती तस्यै व्याप्त्यै व्याप्तिरू
पायै सततं नमोनमः॥ एतेषु सर्वगतत्वमुक्तं देव्याः
॥७२॥ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता ज
गत्॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥७३॥
॥ चिन्त्यते च यतेच यनं चितिः अविकारः कूटस्थ
ता तद्रूपेण। यद्वा चिति संज्ञाने स्त्रियां क्तिन् कुधादित्य

 सुराः अत्र हिमवति पर्वते भवद्भिः का स्तूयते। इति।
शोभने भ्रुवौ यस्याः सा सुभ्रूः हे सुभ्रु भवद्भिः कादेव
ता स्तूयते नाम इति देवान् पृष्टवती पार्वती ततस्तां
पार्वतीं प्रति। न तावद्देवैरेवोत्तरं दातुं सूचितं किंतु
ततः प्रागेव किंतु तस्याः पार्वत्याः शरीरस्य कोशा
त् विनिर्गत्य शिवानाम्नी देवी पार्वतीं प्रति प्रतिवा
क्यम् अब्रवीत्। इयं हि सा मत्तेजसा शिवा इति वच
नात्॥ ब्रह्मविष्णुमहेश्वरादिसर्वदेवतेजोमयी
शिवानाम्नी ख्या शक्तिरवसेया। एतदेव दर्शयति॥८५॥
॥शरीरकोशात्तस्याः समुद्भूताब्रवीच्छिवा।
स्तोत्रं ममैतत्क्रियते शुंभदैत्यनिराकृतैः॥देवैः
समस्तैः समरे निशुंभेन पराजितैः॥८६॥ ॥
अस्याः पार्वत्याः शरीरकोशात् शरीरं कोश इव

शरीरकोशः कोशोऽस्त्री कुड्मले खड्गपिधाने र्थौघदि
व्ययोः॥ ततः शरीरकोशात् त्राणार्थं निधित्वेन स
र्वजगन्निधित्वेन च पार्वतीशरीरं कोशेनोपमीयते।
परमानंदनिधिरूपत्वेन न कोशः ततउद्भूता शिवा दे
वी पार्वतीं प्रति अब्रवीत्। किम् अब्रवीत्। तदाह॥ समरे
निशुंभेन पराजितैरभिभूतैः शुंभदैत्यनिराकृतैः
शुंभेन प्रत्यादिष्टैः समस्तैर्देवैः मम शिवायाः सर्व
देवतेजोमय्याः एतत्स्तोत्रं क्रियते विधीयते इत्यब्रवी
त्॥८६॥ ॥शरीरकोशाद्यत्तस्याः पार्वत्या निःसृ
ताम्बिका॥ कौशिकीति समस्तेषु ततो लोकेषु गीयते
॥८७॥ ॥यद्यस्मात्तस्याः पार्वत्याः शरीरकोशा
त् शरीरात् अंबिका निःसृता निर्गता निर्वृत्ता ततः
कारणात् सा समस्तेषु लोकेषु कौशिकी निगीयते

सप्तशती कथ्यते। पार्वत्याः शरीरकोशतः निःसृता सती शिवा कौ टिकापं॥८
शिकीति प्रख्यायते। केशेन दिव्यति कोशतो निर्गमनात्
कौशिकीति न दिव्यतीति ठकू॥ यद्वा कोशाख्या निर्गता
स्या कोशेन निवृत्तैवेति निवृषेक्ष घुनादिव्य इतिठ
कू॥८७॥ ॥तस्यां विनिर्गतायां तु कृष्णाभूत्सापि
पार्वती॥ कालिकेति समाख्याता हिमाचलकृताश्र
१६ या॥८८॥ ॥सा नवावती पार्वत्यपि स्यात् शरीर १८
कोशात्तस्यां सर्वदेवतेजोमय्यां कौशिक्यां वि
निर्गतायां सत्यां कृष्णा अभूत्॥ कृष्णवर्णा सम
जनिष्ट ततश्च सा पार्वती कालिकेति समाख्याता हि
माचलकृताश्रया हिमाद्रौ कृतनिलया भूत्॥ कृष्ण
वर्णार्थात् कालशब्दात् तद्यास्ति वर्त्तमाना कृता यांज्ञा
नपदसूत्रेण ङीपू संज्ञायां कन्। केणइति ह्रस्वः।

चनमः सः पूजायां भावकर्मणोः सार्वधातुके च अ
यस्य हलः क्यस्य विभाषेति च लोपः ऋषिरुवाच।
ऋषिः सुमेधाः सुरथमुवाच॥८३॥ ॥एवं स्त
वाभियुक्तानां देवानां तत्र पार्वती॥ स्नातुमभ्या
ययौ तोये जाह्नव्या नृपनन्दन॥८४॥ ॥हे नृपनं
दन हे सुरथ एवं इत्थं देव्याः स्तवाभियुक्तानां स्तुति
पराणां स्तुतिप्रवणचित्तानां च देवानां अग्रतः
तत्र हिमाद्रौ पार्वती गौरी देवी जाह्नव्याः गंगायाः
तोये पाथसि स्नातुं जलक्रीडां कर्त्तुं अभ्याययौ देवा
नामग्रतोऽभ्यागमत् सा देवानामग्रतः किं कृतवतीत्या
ह॥८५॥ ॥साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तू
यतेऽत्र का॥८५॥ ॥सुभ्रूः पार्वती तान् देवान् स्तुत्य
भियुक्तान् सुरान् अब्रवीत् पृष्टवती किमिति॥ हे

सप्तशती

रा ॥ काप्यास्ते स्त्री महाराजन्नुभासयंती हिमाचलं ॥ ५९ ॥ टि०का०पं०४
॥ सा रूपवती कालिका देवी तां च चंडमुंडाभ्यां
शुंभाय महासुराय आख्याता च शुंभस्य समक्षमु
क्ता किमिति ॥ हे महाराज हे शुंभ दैत्येश्वर समधिग
त सर्वैश्वर्य सावधानो भव अतीव सुमनोहरा स्त्री
काप्यास्ते किं कुर्वती । हिमाचलं हिमाद्रिं भासयंती
स्वयं श्यामाश्यामाभिः शोभाभिरद्य शुभ्रशोभा
ढ्यं हिमाद्रिं भासतो निर्भासयंती आस्ते आख्याता । अ
तीवेत्यत्र वाक्ये दैवसिकं संधिकार्यं शुंभायेति क्रि
याग्रहणे कर्त्तव्यमिति संप्रदानत्वं । पत्नेशतरतिव
त । वलवत्सुष्टु कि मृतास्व स्यतीव च निर्भरे ॥ अती
वेति छेदः । सुष्ठुमनोहरेति सुमनोहरा । हरतेरनुद्य
मने च । यथाइकामः वसुधनं येषां ते इव सवः काम
यनाः कामुकाः तेषां मनः इव सुमनः तत्हरतीति इव सुम
नोहरा अस्यर्थ इव सुमनोहरा । इत्यं विकल्पस्य निषे
धावर्ष ॥ तस्याः पातिव्रत्यस्य भंगप्रसंगात् इष्टोर्थ स्ते
षः शोभनं मनो यस्यासः सुमनाः शंभुः तं हरस्य वीग
हरत्वा सुमनोहरा अतितरां सुमनोहरा अतीव सु
मनोहरा । यद्वापि लव्वेशोषणे । इंकामं वायति शोष
यति इवः शिवः । यद्वा इंकामं वा निगच्छति इवः शिवः
अतोनुपसर्गे कः इवस्य सुमनोहरा इव सुमनोहरा ।
अत्यधिकं इव सुमनोहरा अतीव सुमनोहरा । यद्वा
इभ्य कामः ई च लक्ष्मीः व सवश्चाद्वै प्रसिद्धाः । ध्रुवा
दयः इव सवः अति क्रांतः इव सूनू । अतीव सुः शंभुः
अतीवसोः शंभोः मनोहरा अतिवसुमनोहरा । भु
वो ध्वरश्च सामश्च स्वापश्चैवानिलोनलः ॥ प्र

सप्तशती।

१८

त्यूषश्च प्रभासश्च वसवोष्टौ धवादयः॥५०॥ ॥
नैवतां दृष्ट्वा चिद्रूपं दृष्टं केनचिदुत्तमम्। ज्ञायतां काप्यसौ देवी गृह्य
तां चासुरेश्वर॥५२॥ ॥ हे असुरेश्वर शुंभ कुचिदपि भुव
ने केनचिदपि पुंसा तादृक् तादृशं उत्तमं अतिसुंदरं रूपं रा
आकारः नैव दृष्टं नैवावलोकितं हे शुंभ असौ कापि दे
वस्त्री यद्वा कापि यत्तामिषका राज्ञी इति त्वया ज्ञायतां
अवगम्यतां अथ त्वयासौ गृह्यतां उपादीयतां च इति शुं
बीकां प्रति अनिष्ठोन्वयः इत्थं शेषः हे सुरेश्वर हे शुं
भ तादृक् उत्तमं चिद्रूपं ज्ञानरूपं कापि केनचिदपि न दृ
ष्टं न कापि न कृतं नापि तस्मादसौ देवी कापि परदेवता
इति ज्ञायतां असौ काप्येका स्त्री अबला रतीति नैव स्त्री
यतां अपि त्वस्या देवी गृह्यतां चास्य संरक्षणार्थं मान्त्री
यतामिति हितोपदेशः शुंभं प्रति लाटस्ययेन॥५२॥
स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्विषा॥ सा तु

१८

कालिका हैमवतीश्वरी। इह महामाया देवकार्यार्थं विष्णु
योगनिद्राभूत्। ततः सर्वदेवतेजोमयी शिवाभूत्।
ततः पार्वत्यभूत्। ततः कौशिक्यभूत्। देवस्तुतिसंगीक
र्त्री ततः कालिकाभूत् शिवांबिकानाम स्याहः॥ ४९॥
॥ ततोंबिकां परं रूपं बिभ्राणां सुमनोहरं॥ ददर्श
चंडो मुंडश्च भृत्यौ शुंभनिशुंभयोः॥५०॥ ॥ ततोनं
तरं पश्चात्ततस्तत्र हिमवति गिरौ। आद्यादिलात्तसिः
शुंभनिशुंभयोः भृत्यौ सेवकौ चंडमुंडश्च परमतित
रां मनोहरं रूपं बिभ्राणां दधानां अंबिकां कालिका
ख्यां पार्वतीं ददर्श अपश्यत्। सुमनोहरामिति पाठे
प्रयुंजनेर इति हेतु मतिवेति णिच्॥ तत: क्विप्॥ णेर् नि
चरेप्रकस्य च लोप: प्राप्य लक्षणेन गुण: चेत: देव
ब्राह्मणादय: तेषु चेतसु॥ बोधयितृषु वैदिकधर्मप्रवर्त
यितृषु देवब्राह्मणादिषु विद्वत्सु प्रीतिस्नेह: चेत्रीति:
नद्दीतिनत्वाम्येव॥ निषेधार्थो विपाठ: नविद्यमा
ना चेतृप्रीतिर्यस्या देवानां न चेत्रीया तयो देवा:
न लोपो न जएनास्ति॥ नलुशब्दस्यापपनत्वं
पकस्या॥ उज्जउत्सर्गो न चेत्रीतीन अविद्य

कोपाविष्टं असुराणां महासैन्यं कर्तृ तीक्ष्णैः सायकैः
शरैः तथा शक्तिपरश्वधैः शक्तिसहितैः परश्वभिः रा
युधैः कुठारैः अंबिकां देवीं ववर्ष ॥ शरसंपातेन शक्ति
संपातेन परशुपातेन च देवीं संछादयामास असु
रसैन्यमर्थः ॥ शक्तिपरश्वधैरिति ॥ मध्यमपदलोपी
समासः ॥ द्वंद्वे तु सेनांगत्वादेकवद्भावः स्यात् ॥ परशु
९ श्च परश्वधः ॥ इह असुरमहासैन्यकर्तृ अंबिकामायु
धैर्ववर्ष ॥ संछादयामास ॥ ततोऽनंतरं सिंहरवं असु ९
रसेनया सह युयुधे नांबिकेति ॥ कस्यचिदाशंका
स्यात् ॥ किमंबिका असुरशरसंपाततो मृता न जी
वतीसेति ॥ यद्यप्युत्तरत्रैस्सा समानीयतां लघ्वीति
लक्ष्मभूतोपरस्पते ॥ तथापि सा महासुरशरसं
पाततः संमूर्छिता सती पुनरुत्थाय कोऽहमक्षमाः
नद्यन्यथा युध्यते नाकिंनेति ॥ वीरकर्मस्वोपकृष्ट

स्यात् ॥ अतः सापि युयुधे ॥ तद्यथा ॥ तत्रैव श्लोके अंबि
कामाम् इति पदच्छेदः ॥ अंबिका कर्त्री ॥ महासैन्यं कर्म
प्रश्नंगीकृतो शेष आम् ॥ स्मृतो वा वधारणे ॥ अथ ध
र्मतोऽन्यः संग्रामेऽस्या लक्ष्मीकृत इति ॥ आम् इति
मनस्यास्मृत्य सा हत्वं कोपाविष्टं असुराणां महासैन्यं
कर्म अंबिका पितथा तदेत तत्कृत्वा स्वती तथा तद्वदेव
तीक्ष्णैः शरैः सायकैः शक्तिपरश्वधैश्च शक्तिभिः सहितैः
कुठारैश्च ववर्ष ॥ असुरसेनां छादयामास ॥ यद्वा ॥
अंभिस्वधारणे ॥ अतथा कृत्वा असुराणां महासैन्यं
कर्म ॥ अंबिका आम् ॥ अंबिकैव दृश्यैव तीक्ष्णैः सा
यकैः तथा शक्तिपरश्वधैश्च ववर्ष ॥ ननु असुरम
हासैन्यं अंबिका भिति ॥ अंबिकाया अवधीरकर्म
ण्युत्कर्षः ॥११॥ ॥ ततो धुतसटः कोपात् कृत्वा नादं
सुभैरवं ॥ पपातासुरसेनायां सिंहो देव्याः स्ववाह
नं ॥१२॥ ॥ ततः कोपात् धुतसटः कंपितस्कंध

केसरः ससिंहो देव्या वाहनं वाहनीभूतो देव्याः सिंहः सु
घोरं अतिभयंकरं नादं सिंहनादं कंठे गर्जनं कृत्वा अ
सुरसेनायां हि सिलुपपात ॥ उत्प्लुत्य निपपात ॥ स्व
वाहनमिति पाठे ॥ अनन्यसाधारणं वाहनं देव्या एव
सिंहो वाहनं नान्यस्य सइति पाठे स प्रसिद्धो सिंहः घो
रंवंन्नास कादीरवुः विलिंगः ॥ वाहनमाहितादिति
निर्देशाद्वाहनशब्दो नपुंसकलिंगः ॥ असुरसेनायां
निपत्य ससिंहः किमकार्षीदित्यत आह ॥१२॥ ॥
कांश्चित्करप्रहारेण देहानास्ये तथापरान् ॥ आक्रम्य
चरणेनान्यान् जघान महासुरान् ॥१३॥ कश्चि
त्पाठः ॥ स महासुरान् इति वा ॥ ससिंहः पंचास्यः
करप्रहारेण कांश्चिद्दैत्यान् जघान ॥ जिहीसः सिंहः
स्वकुपं चास्यः एकं अस्य व अस्यवत् घातकत्वा
करद्वयं चरणद्वयं वास्य चतुष्टयं ॥ पंचास्यानि
युद्धसाधनानि यस्य स पंचास्यः आक्रम्य चाधा
रणान्याभि सधिपाठे ॥ अधरेण चरणेनाभाग
न

त: ॥१०॥ ॥ इत्येवं देव्या उक्तः स धूम्रलोचनः असुरः
तां देवीं अभ्यधावत वेगेनभ्यद्रवत् ॥ स्त्रगतो ॥ स
र्वे विगितायां गतो धावादेशो वक्तव्य आय द्धावाग
तिश्चभ्यो ॥ उभयपदी ॥ ततोनंतरं सांबिका देवी धूम्र
लोचनं क्रोधानलज्वालागर्भेण हुंकारेणैव भस्म चकार ॥
कुं वितर्कपरिप्रश्ने निलायां भर्त्सने भये ॥ को दुः
खप्रकोरपि मंत्रभेदेपि चाव्ययं ॥ क्वचित्तु भस्मसा
त्कारेति पाठः ॥ विभाषासातिकात्स्न्ये नभस्मसा
त्चकार ॥ धूम्रलोचनमारीतं कृत्स्नमभिप्लस्तीच
कोरेत्यर्थः ॥ अतवत्तिविभक्त्याश्रितेनेपदत्वेन लोपव
त्पादांतय तिलंपसेनच ॥ तासावाभिता ॥ हुं इत्य
स्य कारणं हुंकारः हुं इति तरिचर्थः ॥१०॥ ॥ अ
थक्रुद्धं महासैन्यं असुराणां तथांबिका ॥ ववर्ष सा
यकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥११॥ ॥ अति
अथधूम्रलोचनेभस्मीकृते ॥ तथा कृद्धं अति

सरी॥ तथा तलप्रहारेण सिरांसि हृतवान् पृथक्॥१२॥
केसरीसिंहः केषांचित् दैत्यानां कोष्ठान् जठरेभ्यंत
रप्रदेशान् नखैः नखरैः पाटयामास विदारया
मास॥ पट भाषार्थ चुरादिः॥ पालने के कार्ये त्वे न
प्रयोगतो विदारणार्थः॥ आत्मकल्पेतु चिंत्यन॥ पुंसि
कोष्ठं तु जठरं कुसूलोऽप्यगृहं तथा॥ कोष्ठानि केस
११ रीति॥ तु पाठे त्वयं छांदसं नपुंसकत्वं॥ यद्वा ४१
कोष्ठान् जठरान् इत्य केसरीति छेदः॥ ईः कामः ईना
कामेन चरति॥ इत्यादि कामचारी केसरी अनिवारि
तप्रसरः केसरी इत्यर्थः॥ मध्यमपदलोपी समासः॥
तथा तलप्रहारेण हस्ततलघातेन चपेटेन चपे
टया चपेटघातेन केषांचिद्दैत्यानां शरीरेभ्यः शि
रांसि मस्तकानि पृथक् पृथक् हृतानि हृतवान्॥
करनखपंजरेण शिरांसि छित्वा भुवि पातया

मास इत्यर्थः॥ पाणौ चपेटप्रतलौ प्रहस्तो विस्तृतांगुलौ॥
के चित्तु॥ तलाभ्यां प्रतलाभ्यां हस्ताभ्यां प्रवर्तिते न
प्रहारेण शिरांसि पृथक् हृतवानिति व्युत्क्रमेण त
पदव्याख्युः॥ द्वौ सहतौ। संहतलौ प्रतलौ वामदक्षि
णौ द्वौ प्रतलौ॥ असंहतलौ संहतौ वामदक्षिणौ मिलि
तौ संहततलौ संहततलाख्यौ कथ्यते॥ संहतौ मिलिता
भ्यां चपेटाभ्यां हसि॥१३॥ ॥ विच्छिन्नबाहुशिरसः
कृतास्तेन तथा परे॥ पपौ च रुधिरं कोष्ठादन्येषां धुत
केसरः॥ ॥ तथा शौर्यभाजनेन सिंहेन अपरे
परे शात्रवः महासुराः विच्छिन्नबाहुशिरसः कृताः
बाहवश्च शिरांसि च मस्तकानि बाहुशिरः प्राण्यं
गत्वादेकवद्भावः॥ विच्छिन्ना बाहुशिरो येषां ते विच्छि
न्नबाहुशिरसः कृताः तथा शौर्यशाली धुतकेसरः
सन् केसरी सिंहः अन्येषां महासुराणां कोष्ठात् अंतजे

ठरात्तज्जठरात्स्पंतदेशात् ॥ कोष्ठं अंतरं जठरं विदार्येक
र्मण्य कोपे पंचमी ॥ रुधिरं पपौ ॥ पपाने ॥ एते नसिंह
स्यापि वीरपानोचितः सूचिता ॥ वीरपानं तु युद्धानं
वृत्ते भावि निवारणे ॥ पुंसि कोष्ठोंतर्जठरं कुक्षिरलोतगं
हं तथा ॥ २४ ॥ ॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्म
ना ॥ तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ २५ ॥
२२ तेन केसरिणा सिंहेन देव्याः वाहनेन अतिकोपिना अ २२
तएव क्षणेनैव तत्प्रसिद्धं बलं सैन्यं ॥ यद्वा तस्य धूम्र
लोचनस्य बलं सैन्यं क्षयं नाशं नीतं प्रापितं ॥ निर्व्या
पारस्थितो कालविशेषास्तवयोः क्षणः ॥ निलयाप
चयौ क्षयो ॥ आलयश्चयो धूतिर्बुद्धिः स्वभावो ब्रह्म
वर्ष्म च ॥ अतितरां कोपिना ॥ २५ ॥ ॥ श्रुत्वा तमसुरं दे
व्या निहतं धूम्रलोचनं ॥ बलं च क्षपितं कृत्स्नं देवी
केसरिणा ततः ॥ २६ ॥ चुकोप दैत्याधिपतिः शुंभः प्र
स्फुरिताधरः ॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ ॥ २७ ॥

नाक्रम्यान्यान् महासुरान् जघानेसेवार्थे ॥ अन्य
था अधरेण वौष्ठेन महासुरगणा माक्रमणं न संभव
ती ॥ अथ देवी प्रभावात् संभवेतु ॥ अथवा स्येन चा
परान् गणने अवार्थे ॥ अन्यथा अधरेण वोष्ठेन म
हासुरगणाक्रमणं न संभवति ॥ अथ देवीप्रभावा
त् संभवेत् ॥ अथवास्येन चापरान् जघाने ग्रासस्य
ग्रहणे नैवाधरस्यापि युद्धसाधनत्वेन ग्रहणं स्व
सिद्धं स्यात् पुनरधरेणेति कथं वाच्यो युक्तिरुक्तिमतां ॥
यद्वा ॥ अधरेण वोष्ठेन स्फुरितेन प्रकटितः कोपो
धरेरूप वर्ण्यते ॥ अधरेण कोपेन आक्रम्य ॥ यद्वा
अधस्तादपि चाधरः शरीरस्याधस्ताद्धोभागेन
उरोदेशाद्वाक्रम्य यद्वा ॥ अविद्यमानाधराधरः
यत्र साधरः ओंकारादेशः तेन अंतरिक्षेणाक्रम्य
निरूप्योगैकेषांचित्पाठ्यामास नरवैः कोष्ठान्के स

संबंधिनी सेना सैन्यं लघु शीघ्रं आसं क्षेपं न्य क्रो
श विनाशं । नियतां योऽन्यता भिति ॥ स दृष्टीन गौरी
य देव्यन कृ ओ धूम्र धिक जं तव्य : ॥१८॥ ॥ के शेष्वा
कृष्य बध्वा वा यदि वः संशयो युधि । तदाशेषा
युधैः सर्वैरसुरैर्विनिहन्यतां ॥१९॥ ॥ हे चं
डमुंड बलानि युष्माभिः सा देवी केशेषु मूर्धजे
षु आकृष्य अथ च सा बध्यावा ॥ युष्माभिः सा
१८ समानीयतां ॥ केशाकर्षणे बंधने च वा वः १८
युष्माकं यदि पक्षांतरे संशयः स्यात् ॥ तदा यु
धि संग्रामे अशेषायुधैः साधनैः तद्युक्तैर्वा
सर्वैरसुरैः युष्माभिः सा देवी विनिहन्यतां
विध्वस्ता ॥ निजसामर्थ्यात् कर्तव्या ॥ यद्वा विशे
षेण निहंतव्या ॥ निघ्ना आपन्ना कर्तव्या

इत्यश्रवणकोपनाशापनक्रियात्रयोपेक्षैकैकृते २
श्लोकचतुष्टयस्यैकान्वयो ज्ञेयः ॥ दैत्याप्त धूम्रलोचने
प्रासि हुंकृतं सुरे निहते भस्मितं कृतेला ॥ ततः देवीके
सरिणा देव्याः सिंहेन तस्य धूम्रलोचनस्य कृ
त्स्नं सर्वं बलं सैन्यं क्षपितं ॥ श्रोतिं नाशितं च श्रुत्वा
आकर्ण्य दैत्याधिपतिः शुंभः कोपतः प्रस्फु
रिताधरः संरंभकंपितोष्ठः स च कोपात् चु
कोप अथ तौ प्रसिद्धौ ॥ आगदृष्टि देवीकौ चंडमुं
डौ महासुरौ कर्मकरौ तौ ॥ आज्ञापयामास च हीन
जाहत्यौ नियुक्ते क्षपितं मितिक्षपणेरणे ॥ चुरादिः
अदंतः श्रोतिं ॥ द्विरिति हृतं वितारितं भिति यावत् ॥ क्ष
पितं भिति पाठे क्षयः संजातोऽस्येति तारकादित्वादि
तत् ॥ आज्ञापयामास ॥ ज्ञानियोजने चुरादिः ॥ स्या

ध्येनिच॥१७॥ ॥हे चंड हे मुंड बलैर्बहुभिः परिवारितौ॥
गच्छतं तत्र गत्वा च सा समानीयतां लघु॥१८॥
हे चंडमुंड युवां बहुबलैः सैन्यैः परिवारितौ परिवेष्टि
तौ तत्र गच्छतं कुत्र यत्र सा देवी वर्त्तते गत्वा च गत्वा
तु ग्लैव क्षिप्रं लघु आशु सा देवी समानीयतां युवा
भ्यामिति॥ शेषः॥ गच्छतमिति लिङ्गे लोण्मध्यमपु
रुषस्य द्विवचनम् अप्पास्तं॥ कोपो बहुः इति रेफांत॥
१२ गच्छतेति पादे तु चंडमुंड लब्धलेषु बलं क्षिप्तेषु बहुव ९३
चनस्य पूर्ववदतिदेशात्॥ काव्यं तु॥ हे चंडमुंड युवां
बहुबलपरिवारितौ मुख्यो द्वौ बहुभिर्बलानि च ते
सर्वे यं अभिलिलाय यत्र सा देवी स्यात् तत्र गच्छतम्॥
तत्र गत्वा तु लघु शीघ्रं सा समानीयतां॥ सा इहानीहि
ते कर्म्म आप्नुमिति द्वितीयम् अनभिहितं॥ आज्ञा प्रामंनी

यत्वामिति वदनुसंधेयं॥ प्रधानं कर्म्मभिहितं तां
प्रधानं गच्छतेति वर्गाक्षेपया बहुवचनं॥ अत एव ना
ऽत्रेवक्ष्यति॥ बहुवचनं॥ यादवः संशयो युधीति॥ अ
भानुकूलो यमर्थः॥ देव्यनेकूलोर्थस्त्वेष॥ तथा
हि॥ गच्छतं तत्र गत्वा तु॥ सा॥ आसं॥ आनीयतां
लघु॥ इति पदच्छेदः॥ अमु उपेक्षणे भावे घञ्॥ आस
नमासः क्षेपोऽपः कारो न्यकारः॥ आस्तु स्यात्को
पपीडयोः॥ ततश्चंडमुंडाभ्यां गमनं दृष्ट्वा सरस्व
त्यौ देवीमाचष्ट॥ हे देवि त्वं आः कोपेन तत्र गच्छ
कुत्र यत्र चंडो मुंडश्च बहुभिर्बलैः सैन्यैः परि
वारितौस्तः॥ गत्वा तु पुनः तं चंडमुंडं च आक्रम्य
स्व॥ हे चंडमुंडयो मा गच्छेति स्यके यातीमना
कारय॥ किं च तु पुनः त्वमा देव्याः सा चंडमुंड

इति पदच्छेदः॥ कथ्य ब्रह्मा अच्युत विष्णुः ईशानश्च रुद्रः
केशाः केशाइव इषवः बाणाः यस्याः सा केशेषुः
तया केशेष्वा देव्या आपूष्य वध्वा दैत्यान्॥ अवर
क्षत्कान् अयदिवः अयेन लब्धा द्यौर्यैस्ते अयदिवो
देवाः तान् अयद्दिवः संभृताः अभरणी हृताः रा
वयः चक्रमंड आक्षाः सर्पाः यया सा संशायुः का
 लिकादेवी तत्संबुद्धौ हे संशायो तस्या युधस्य सं
बंधिन्यः अशाः दिशाः तदाशाः तदा शासु युक्ता
शासु अयुक्ता तिईषाः लांगलदंडा एवायुधानि
यैस्तदाशेषायुधाः दैत्याः तैः॥ अस्य विग्रहं तरे
ये वक्ष्यंते इति तरूपपद विवक्षित्व विग्रहाः अन्वा
न्वयः॥ सरस्वती शिः देवी आर्थ्य ले॥ हे संशायो हे सं
भृत सा नु हे संभृत चक्रमंडआक्षसर्पाभरणे
हे कालिके देवी त्वं अयदिवः अयेन ल ध्यं
स्वर्ग नू देवान् अवरक्ष हे देवी केशेष्वा ततीया

तमेतत्॥ ब्रह्मविष्णुसहरूबाणया त्वया देव्यापारो
न देशानू आहूष्य अधिसाबध्वा च युधियुद्धे तदा
शेषायुधैः पुरीदक्रमयुक्तैर्वायुधैः सर्वैरसुरैः सह
सचंडमुंडश्चदैत्यौ विनिहन्यतां हिंस्यतां इति देव्य
भिप्रायो द्वितीयः॥ इषुवर्णाः केशेष्वा देव्या अवर
क्षी अयदिवः देवान् हे संशायो हे संभृत सर्पाभरणे
तदाशेषायुधैः तेषां विपि विषये आसमंतात् आ
शाअभुवाना ईषाः लांगलदंडाः अयुधानि येषां
ते तदाशेषायुधाः दैत्याः तैः सह विनिहन्यतां
चंडमुंडश्च महृके देव्या अपि विनिहन्तव्या इत्थं व
गम्यते यथा पुत्रेण सह पिता भुंक्ते इत्यत्र पुत्रोपि
भुंक्त इत्यपि गम्यते॥१९॥ ॥तस्याः हतायां दुष्टा
यां सिंहेन विनिपातिते॥ श्रीभगम्यतां बद्धा
गृहीत्वा तामथांबिकां॥२०॥ ॥हे चंडमुंडबल

नीच युष्माभिः सर्वैः दैत्यैः दुष्टायां देसद्रूषिण्यां त
स्यां देव्यां हतायां तदुदितायां सत्यां परासुहृत्तायां
वा तद्दोये ऽस्मिं हे च मम सौख्य स्वादिति निर्विविनि
पातितेभु विपातितेसतिपरा सुहृत्ते वाऽरीभ्रमा
गम्यतां निजस्थानं प्राप्यतां ॥ अथ सा जीवंतीभ
नेतुं शक्या चेत् तर्हि तामं विकां गृहीत्वा वध्वाशी
घ्रमागम्यतां तद्दर्शने मम रुचिरुत्कापोऽस्तीत्यभिप्रा
५६ यः ॥ तस्यां हतायां इति कोपेन ज्वलिता सनाभ्र ५८
ति कोपिना पुंसा प्रबलशाचोऽर्स्य घेम तेपि दुष्ट
मिष्यतां ॥ अथवा कोपज्वलितेन व्याकुलेन चे
तसा तस्यां हतायां समागम्यतामिति तावदुक्तं
ततः पुनरप्युक्तं ॥ बध्वानु जीवंतिमेव तामं वि
कांशीघ्रं गृहीत्वा युष्माभि रागम्यतां इत्युक्तं ॥
ननु च अंबिका शब्दो मातृवाचीति शुंभः कथं

नाशवाचिनी कर्तव्या इति शुंभस्तु कृतोऽर्थः ॥
दैव्यनुकृतोऽर्थ स्य हेषः ॥ दैवीस्ववर्गनादिष्टेन ॥ हे मदी
या गणाः युष्माभिः स चंडो मुंडश्च केशेषु मूर्द्ध
जेषु आकृष्य अथिल्वा बध्वा वा विनिहन्यतां ॥ हे
मदीयाः गुणाः यदि वः युष्माकं केशाकर्षणे व
धने च नासंशयः स्यात् तदा युधि संग्रामे अ
शेषायुध्यैः सर्वैर्युष्माभिः स चंडमुंडश्च विनि
हन्यतां ॥ किंविशिष्टैः युष्माभिः असुरैः ॥
असून् देह प्राणान् रांति गृह्णंति असुराः आ
तोनुपसर्गे कः ॥ ते देहप्राणहारिभिः ॥ इति दे
व्याभिप्रायार्थः ॥ अन्यथा देव्याः पराभव वचः श्र
वणाद पकर्षः शंकितस्यात् ॥ अथवा ॥ केशेष्वा
कृष्य बध्वा ॥ अथ संशय यदि वः ॥ संशयो युधि
तदाऽशेषायुध्यैः सर्वैः असुरैः विनिहन्यतां ॥

७ संबुद्ध्य ॥ के आर्तिर्हे देवी ॥ अंबिकेति अंबिका
शब्देन देवी हनविवक्षिता का हिता हि अविरथिला । दे
अरस्मसनः इष्टा तः कर्तरि पु लिवोर कारादे
शोइलेव ॥ अंबिले रा त्रुणा गा ले षिति अंबिका प
रत्वकनुर्विविक्षिताइति विवक्षितपदविग्रहः ॥
अत्रार्थे दिव्यनुकूलो न्वयः ॥ उच्यते हे सिंहे च अ
न्यत्रेच आर्तिते ॥ हे जगद्रक्षणा सज्जात सतत ग
मने हे देवी तस्यां दुष्टानां देवद्वेषिणां देहसेना ७
यां हतायां गतायां उपस्थितायां सत्यां ॥ अथानं
तरं विलो[illegible]नित रां पायर्यं साशत्रु न शोषयं
सात्वयाद्य्या अंबिकाशत्रु गलेषु लेविकां पा
शरत्तुं गच्छ चातं तो देहसेनां वे धा शीघ्रमाग
म्यतामिति सखीभिर्देवी निगदितेति देव्यपि
प्रार्थे सिद्धिः ॥ २० ॥ ॥ इति श्री शंतनुचक्रवर्ति

विरचितायां चंडिकामहात्म्यटीकायां धूम्र
लोचनवधविध्युपलक्षितायां षष्ठोध्यायः ॥
॥ ६ ॥ ॥ श्री जगदंबार्पणमस्तु ॥

अथाहं विकामिति तामेवाभिगंतु कामः ॥ अत्रा कु-
शुभाद्न्येषां भातेयां विक्रेवेति तस्यां चं उमुडाद्दी
नो रमणाभिलाषो न कर्तव्यः ॥ इयं हि युष्मानि
कमैवेति स्वचयितुं अं विकामि युक्तं ॥ मात्
गमनं हि पशुपक्षां तरेषु स्वत एव गर्हितं इति
शुभानुकूलोर्थः ॥ देव्यनुकूलोर्थस्तेबः ॥ तस्यां
हतायां दुष्टायां ॥ सिंहे च ॥ विनिपा ॥ ओतिते ॥
शीघ्रं ॥ आगम्यतां ॥ बध्वा ॥ गृहीत्वा ॥ ना ॥ अथो
अंबिकां ॥ इतिपदच्छेदः ॥ हतायामिति हतेर्ग
[illegible] कर्तरि क्तः ॥ विनिपा इतिपातशोषणे ऋ
तेरिश्छूपू ॥ विशेषेण निरंतरं पातयति शत्रू
न् शोषयतीति विनिपूतया विनिपादय्यो
ओतितेइति अत सातत्यगमने ॥ अतनं अतः
भावे घञ् ॥ आतः सं ओ तो स्यां ओतितात

दद्दृशुस्ते ततो देवी मीषद्धासां व्यवस्थितां ॥ सिंह
स्योपरि शैलेंद्रशृंगे महति कांचने ॥२॥ ॥ ततः
आगतास्ते चंडादयो दैत्याः महति उच्चे कांचने कांच
व नमये सौवर्णे शैलेंद्रशृंगे हिमाद्रिशिखरे स्थित
स्य सिंहस्य उपरि व्यवस्थितां विशेषेण अवस्थि
तां सिंहमारूढेवेती ईषद् अल्पो हासो यस्याः सा
१ ईषद्धासा तां देवीं दद्दृशुः ॥ अयं भावः ॥ कश्चिद्दीप्तवं १
धनयोः भाव स्पष्टः ॥ कंचनस्य पीतदीप्तिरूपस्य
दमधिकरणत्वेन कांचनं शृंगं ॥ तस्मिन्नुत्तिष्ठप्रा
प्ते तत्रूपं अतिशुभ्रो हिमाद्रिः तस्यापि सोव शृं
गं ॥ तदतिपीतवर्णं ॥ तस्योपरि स्थितो यः सिंहः
सोपि दत्त शुभ्रः तस्योपरि भ्राजमाना या देवी
सा काचित्कादेव्यतिकालिमेति विविधवर्ण
संनिधानाद्धर्मो क्रूपो देव्या वर्णितः शत्रूणां तु

निरुद्धवर्णे दर्शनाद्विवर्णमुखता सूच्यते ॥ देवीनि
षद्धासाम ईषत्स्मितं इति यत्तेन यथा प्राग्धूम्रलोचन
स्तद्दर्शनस्य फले सैन्यः प्राप्तस्तथा सोपि चं
डादिरपि प्राप्ताति देव्या हसोस्त्यासोहा सो वर्णि
तः ॥२॥ ॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरु
द्यताः ॥ आकृष्टचापासिधरास्तथान्ये तत्समी
पगाः ॥३॥ ॥ ततः उद्यताः उद्युक्तास्ते चंडादयो
महासुराः तां देवीं दृष्ट्वा समादातुमुद्यमं चक्रुः ॥
हंतुं वा तत्समीपगाः तयोश्चंडमुंडयोः समीपव
र्तिनः आकृष्टचापासिधराः संतः तां समा
दातुमुद्यमं चक्रुः ॥ हंतुं वा तत्समीपगाः आसन्न
तस्याः देव्याः समीपभागमेनः अकृष्ट आ
स्फालिता चापास्तेन अस्यासीनां खड्गानां धाराः

धारकाः असि धारयन्तीति द्वंद्वः॥ अस्फालिता आ
यामे अस्फालिताः॥३॥ ॥ ततः कोपं चकारो
च्चैरंबिका तानरीन्प्रति॥ कोपेन चास्या वदनंम
षीवर्णमभूत्तदा॥४॥ ॥ ततो दैत्यानुपसंह
र्तुमंबिका देवी तानागतानरीन्प्रति उ
च्चैरतितरां कोपं चकार॥ तदा कोपेन अस्याः
२ देव्याः वदनं मुखं मष्या इव वर्णः रूपं यस्य तत् २
मषीवर्णं हृष्टं वर्णमभूत्॥ यतः कोपादंबिका
या मुखं कालवर्णमभूत्॥ ततः ललाटात्का
ली नाम दैत्यान् विनाशायैव तु देवी समुत्पन्ना तो
कांचिदियाहि॥४॥ ॥भ्रुकुटीकुटिला तस्या
ललाटफलकाद्द्रुतं॥ काली करालवदना वि
निःक्रांतासिपाशिनी॥५॥ ॥ भ्रुकुटिकुपं
यास्तस्याः अंबिकायाः देव्याः भ्रुकुटीकुटिलात्

श्रीगणेशाय नमः॥ ऋषिरुवाच॥ सुमेधाः सुर
थं वाचमूचे॥ ॥आज्ञप्तास्ते ततो दैत्याश्चंडमुं
डपुरोगमाः॥ चतुरंगबलोपेता ययुरभ्युद्यता
युधाः॥१॥ ॥ ततो धूम्रलोचनवधानंतरं शुंभे
न आज्ञप्ताः आज्ञापिताः आदिष्टाः नियुक्ताश्चं
डमुंडपुरोगमाः चंडमुंडपुरःसराः दैत्याः चतु
रंगबलोपेताः हस्त्यश्वरथपदातिसमेताः अ
भ्युद्यतायुधाः सन्नद्धबद्धोन्मुखायुधाः सं
तः ययुः जग्मुः आज्ञप्ता इति वादितस्तत्रेण नि
पातितः पुरोगमः पुरोगामी पुरोगच्छतः पुरो
गमौ चंडमुंडपुरोगमौ येषां ते तथोक्ताः हस्त्य
श्वरथपदाति सेनांगं स्याच्चतुष्टयं च तारिसै
न्यानि॥ तत्र तच्चतुरंगबलं सैन्यं तेन उपेताः
संगताः ययुरिति याता एव नायाता इति भावः॥१॥

विभर्ति धरा। विविधानि चित्राणि यस्य तत् विचित्रं॥ ख
ट्वाया: अंगं खट्वांगं वा चित्रं च तत्॥ खट्वांगं च विचित्र
खट्वांगं॥ तस्य धरा विचित्रखट्वांगधरा॥ प्रेतनरख
ट्वांग धरेति चार्थ:॥ नराणां प्रेतानां शिरसां मालान
रमाला विभूषणं यस्या: सा नरमाला विभूषणा॥
नरमुंडमाळाविभूषणा॥ मध्यमपदलोपी समास: ३
द्वीपी॥ जलाशयो यस्मिन् तत् द्वीपं तस्य निवासत्वे
न द्वीपि व्याघ्र: तस्य चर्म परिधानं वासो यस्या: सा
द्वीपिचर्मपरिधाना॥ व्याघ्रचर्म पांघरली दीर्घे:॥
शुष्कमांसं शरीरं यस्या: सा शुष्कमांसा निर्मांसा अस्थि
चर्ममात्रशरीरा॥ अत एव अतितरां भैरवी अतिभैरवी
अतिभयंकररूपा॥ अति कुंठा भैरवा तु भयंकरा तु
पुरुषा तु इति च भैरवा इति च पाठ:॥ ६॥ अतिवि
स्तारवदना जिह्वाललनभीषणा॥ निमग्नारक्तने
त्रनादापूरितदिङ्मुखा॥ ७॥ पुन: कीदृशी

काली अतिक्रांतं विस्तारं अतिविस्तारं॥ अतिविस्तारोय
यस्य यो तत् अतिविस्तारवदनं यस्या: सा अतिविस्तारवदना॥
ललज्जिह्वा यां चुराद्विरक्त स्मीय॥ आतनी पदी जिह्वा
वेल्यु टिळाळने॥ चलनं लणि सण्यं हर पर्से झेयं॥ जिह्वाया:
ललनं आनळेच॥ लेढ जिव्हाले हणसा तेन भीषणा भया
नक जिह्वाललनभीषणा॥ निमग्ने नितरां अंतर्लीने आ
रक्ते आरक्तवर्णे तारके हि ते नयने यस्या: सा निमग्नारक्तन
यना॥ नादेन सिंहनादेन कंठगर्जनेन आसंतात् पूरि
तानि दिशां देशानां मुखानि द्वाराणि अंतराळा
नि यया सा नादापूरितदिङ्मुखा खांग आप सजना
दसंगोपाय या हाड उ. पू॥ वाटेमृ॥ ६ कुहर पदा उ. [illegible]
वांटाप्ते न उ. [illegible] वा देखोन उ. [illegible] मुक्ते टावेव॥ च
[illegible] पूर्व [illegible] उ. [illegible] मुक्ते टाव
वा॥ ७॥ ॥ सा वेगेनाभिपतिता घातयंती महासुरान्॥
सैन्ये तत्र सुरारीणामभक्षयत तद्बलं॥ ८॥ अवि

कालला यंदूलास्या काली ॥ देवी वेगेन जवेन अभिपति
ता अभियाता महासुरान् घातयंती महासुरान् प्रति
घातं कुर्वंति ताडयंतीत त्रसैन्ये सुरारीणां देवद्विषां
सुराणाम् अरयः तेषां तस्य द्वं बलं ॥ सैन्यं कर्म अभक्ष
यत आस्वादयत ॥ कक्षअदने ॥ चुरादि द्विणिचश्चात्मा
मनेपदं ॥ घातयंतीति घातस्त्र्यर्थेत्त ॥ तं कुर्वंतीतीति क
चू ॥ महासुरान् प्रति घातं कुर्वंती ताडयंती त्यर्थः ॥
४ अन्यथा हन्तेः प्रयुक्ते घातयंती त्युक्ते घातमाम
हासुरानिति ॥ अप्रयुक्तवती त्यर्थः स्यात ॥ यद्वा कुतिर्ग
त्यर्थः घ्नतः गच्छतः पलायमानान् पलायध्वमिति
प्रयुंजना घातयंती त्युच्यते ॥ यथा गच्छतः पुरुषान्
प्रगच्छति प्रयुंजाना गमयंती त्युच्यते ॥ यद्वा महा
सुरान् घातयंती घ्नंती त्यर्थः ॥ [illegible] विष्टप्रयुक्ताणि च
निवृत्ते प्रेषणाद्धातोः प्राकृतेर्थणिजिष्यते ॥ धात्व
र्थानुप्रवेशोपिबुध्या रूपाणिचीयते इति वचनात् ॥

भ्रुवौ कुटीव भ्रुकुटी ॥ इकोह्रस्वोङ्यो गालवस्येति ॥
२ त गौरी रपदीकं ह्रस्वत्वं वा अच्च ले ॥ भ्रुकुसादीनां तेन
उभयविकल्पे त्रैरूप्यं भ्रुकुटी कुटी भ्रुकुटयां भ्रु
भंगात् ॥ कुटिलं भ्रुवौ तस्याः भ्रुकुरंग कुटिलाद्
भ्रुकुटीकुटिलात् ॥ ललाटफलकात् ललाटफ
कमिव विस्तालत्वेन ललाट फलकं ॥ तस्मात् स
काशात् ॥ कुतं चाधि ॥ करालवदना भयंकरंक
रालं दंतुरं तुंगं वदनं वक्रं यस्याः सा तथोक्ता द
ष्ट्राकरालवक्त्रा ॥ असिः खड्गः पाशश्च आयुधं
माकर्षणसाधनं ॥ तद्वती असिपाशिनी पाशपा
णिः सती काली नाम चार्थिकं कापि अपरा देवी वि
निष्क्रांता निर्गता ॥ ५ ॥ ॥ विचित्रखट्वांगधरा
नरमालाविभूषणा ॥ द्वीपिचर्मपरीधाना शुष्क
मांसातिभैरवा ॥ ६ ॥ ॥ ईदृशी काली धरति

नैःश्व वेयंप्रति भैरवं॥१०॥ ॥किं कुर्वंती सा काली तथैव गजानि
वयोधयो द्धार अश्वारोहं॥ जासैकवचनं योधानु अश्वारोहानु
तुरगैः सह अश्वैः समं वक्त्रे निक्षिप्प दशनैर्दंतैः साथ
नैः अतिभैरवं अतिभयंकरं यथास्यात्तथा चर्वयंती भक्षयंती॥ चर्व आदने चादि॥ चर्वयंती अतिभैरवं मस्कं योधानु
तुरगैः सह तानियं प्रयुक्ते च चर्वंति मह्कमाता काली योधानु
तुरगांश्च चर्वंति अति भैरवं मस्कं चर्वंति प्रयुंजाना चर्वयं
ती इत्युच्यते॥ गतिबुद्धि प्रत्यवसानार्थेति सूत्रेण अण्यं
ता वस्थायां कर्ता सण्यंते कर्म भवति॥ तथैव रथं सारथिना
सह॥ अत्रापि जातैकवचनं॥ रथान् सारथिभिः सह वक्त्रे
निक्षिप्प दशनैः साधनैः अतिभैरवं अतिभयंकरं यथास्यात्तथा चर्व
यंती चर्वंति चर्वंति प्रयुंजाना भुक्ष्वेति प्रेरयंती चर्वयं
ती उच्यते॥ अत्र योधाः तुरंगाः रथाः सारथयश्च च
र्वाः भक्ष्याः चर्वकोति भैरवी मस्कं पात्रवक्त्रं परिवेषि
का कालिसैव चर्वयंती माता पुत्रान् वेति समाधिः॥ अथो

रोहाः अत्र योधाः सारथिः यता॥ चर्वयंतीति वा परमनो नि
दंनुम॥ चर्वयतीति पाठे पालि द्वितीये काले व्यत्ययो वा कु
र्मीतिलट्॥ हस्तश्चरथाविध्वंसनेनानं तरं पदातिरूपं॥
सैन्यं विध्वंसयितुमाह॥ ॥एकेजग्राह केशेषु॥ ॥सा का
ली एकमसुरं ताडयितुं केशेषु करेण जग्राह॥ ॥ग्रीवाया
मथचापरं॥ ॥अथ सा काली अपरं दानवं ग्रीवायां ताडया
मास॥ ॥पादेनाक्रम्य चैवान्यं॥ ॥अथ सा काली अन्यं दा
नवं पादेनैवाक्रम्य अपोथयत॥ हिंसितवती॥ यद्यपि युक्तो
पपुंथतीति सार्थे भाषार्थे पोथयेदि सन्निधानात्॥ पुवंदो
पुष्पभाषार्थ इति हृत्वान्येनेवादिधौ लेनेत्वान्येनपुथ
हिंसार्थ इत्यपि ज्ञेयः॥ अथवा अपरा यो इति पाठः॥ पुय
संकूर्णने चुरादिः चूर्णी चकार॥ यद्वा अपुदयदिति पाठः
पुद हिंसायां चुरादिः॥ ॥उरसान्यमपोथयत॥१२॥
अथ सा काली अन्यं दानवं उरसाक्रम्य अपोथयत॥
हिंसितवती अपुदयदित्यर्थः॥ ॥तैर्मुक्तानि च शस्त्रा

सप्त॰

६ णि महास्त्राणि तथासुरैः॥ मुखेन जग्राह रुषा दशनैर्मथि
तान्यपि॥१३॥ ॥सा काली देवी तैः खड्गमुद्गरादिभिरसुरैः
मुक्तानि प्रयुक्तानि खड्गादीनि हस्तस्थानि तथा महास्त्रा
णि च महांति बाणादीनि आग्नेयवायवीयादीनि मोक्षणी
यानि क्षेप्याणि मुखेन जग्राह॥ गृहीतवती॥ अपि च
तानि तानि शस्त्राणि महास्त्राणि तथा रुषा मुखेन गृ
हीत्वा दशनैः साधनैः तया काल्या देव्या मथितान्य
पि॥ मथ विलोडने॥ व्यालोडितानि चर्वितानि चूर्णिता
नि शस्त्रमस्त्रायुधमिति॥ आयुधत्वेन एकत्वेऽपि
तज्ज्ञा काऽप्रयोगभेदेन भेदोस्त्येव॥ तयोरिति साधुः॥
पि बीशक्ति विचित्रानंतेति घटते एवायमर्थः॥१४॥
बलीनां तद्बलं सर्वमसुराणां दुरात्मनां॥ ममर्दाभक्ष
यच्चान्यानन्यांश्चाताडयत्तथा॥१५॥ ॥सा काली
देवी दुरात्मनां दुष्टात्मनां बलीनां बलवतां
असुराणां चंडादीनां तद्बलं सिद्धं सर्वं च तुर्विधं हस्त

१ वे वेगः प्रधावनजवयोः॥९॥ ॥पार्ष्णिग्राहांकुशग्राहयोध
घंटासमन्वितान्॥ समादायैकहस्तेन मुखे चिक्षेप
वारणान्॥१०॥ ॥पुमान् पार्ष्णिरधस्तयोर्गुल्फयोरधः प
श्चाद्भागः पार्ष्णिः पृष्ठोपमत्वात् पार्ष्णिः पार्ष्णिरिव पार्ष्णिग
हंति॥ अवष्टभ्नंतीति पार्ष्णिग्राहाः पार्ष्णिग्राहस्तु पृष्ठतः॥
गजानां तु पार्ष्णिग्राहाः रक्षकाः पृष्ठरक्षकाः॥ अंकुशो
स्त्री सृणिः स्त्रियां॥ अंकुशान् गृह्णंतीति अंकुशग्रा
हाः कर्मण्यण्॥ युध्यंते संप्रहरंतीति योधाः॥ पचाद्यच्॥
योद्धारः॥ घंटाः गजानां पार्श्वे लंबिताः निनादस्य वा
रिणो लंकाराश्च तैः समन्वितान् वारयंतीति शत्रून् वारणाः
गजाः तान् पादिता गजेः॥ तान्॥ एकहस्तेन समादाय सं
क्षिप्य गृहीत्वा मुखे वक्त्रे चिक्षेप॥ सा काली देवीति संबंधः॥
पार्ष्णिग्राहादिभिर्घंटांतैः सहितान् गजान् रथान् रथैः ॥१०॥
तथैव योधं तुरगैः रथं सारथिना सह॥ निक्षिप्य वक्त्रे दश

द्रुगभिस्सरुः ॥ दंता नाम अग्राः भागाः दंताग्राः दंतेषु वा
अग्राः तैरभिहताः ॥१५॥ ॥ क्षणेन तन्महासैन्यमसुरा
णां निपातितं ॥ दृष्ट्वा चंडिकुद्रावतां कालीमतिभीषणां ॥१६॥ ॥
कालमाद्व्या क्षणेन क्षणमात्रेण कालेन ॥ यद्वा क्षणे
न रणोत्सवेन तन्महत्तत्सिद्धं हस्त्यश्वरथपदाति इक्ष
णं चतुर्विधं महत् बहुलं चंडादीनां असुराणां सैन्यं
७ बलं निपातितं रणाहमौ दृष्ट्वा अवलोक्य प्रचंडविक्र ७
मश्चंडो दैत्यः तां अतिभीषणां अतिभयंकरस्वरूपां विक्र
मं कालीं देवीं अभिदुद्राव अभि समुख्ये नोपद्रुतुमाद्र
वत् ॥ क्षणेन तद्बलं सर्वमसुराणां निपातितं इति पाठे वि स
एवार्थः ॥ अतिभीषणामिति पाठे तु क्रियाविशेषण
मेतत् ॥ द्रुगतोक्तिः ॥ अतिद्रुद्राव अतिभीषयतेअ
तिभीषणां यथा दिलातर्थः ॥ चंडस्त्वाभिदुद्रुव
न्तून कार्यादि हत तआह ॥ शरवर्षैर्महाभी
मैर्भीमाक्षीं महासुरः ॥ छादयामास चक्रैः सह
तां

मुंडः क्षिप्तैः सहस्रशः ॥१७॥ शराणां वर्षाणि संपाताः
तैः महाति भीमानि बलानि घोराणि बलानि तैः भीमभ
सा यंकरे अक्षिणी यस्याः तां ॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वां
गात् षच् समासांतः महान् असुरः छंदसंवरणे चुरादिः ॥
मुंडानि मस्तकानि क्षिप्तानि आपतितानि रणे तेन
मे चैस्तरनि मुंडक्षिप्तानि क्षिप्तमुंडानि क्षिप्तमस्तकानि
वाहिताग्न्यादिषु पाठात् निष्ठांतस्य क्षिप्तस्य परनिपातः
सहस्रेण सहस्रशः संख्यैकवचनाच्च वीप्सायां शस्
कुर्वन्निनेनेति चक्रैः घूर्णकनिधानं क्षयादीनां चचक्रे
देशकृत इति वक्ष्ये ॥ अथान्वयः ॥ महासुरश्चंडः म
हाभीमैः अतिभयंकरैः घोरैः शरवर्षैः बाणसंघातैः
भीमाक्षीं भयंकरदृष्टिं तां कालीं देवीं बलमर्दिनीं देवीं
छादयामास ॥ आच्छादितां चकार ॥ किं च सएव महासु
रश्चंडः सहस्रशः सहस्रेण चक्रैः आसमंतात्
तां कालीं छादयामास ॥ कथंभूतैः चक्रैः मुंडक्षिप्तैः

मुंडानि क्षिप्तानि रणे। तदेव मुंडानि मस्तकानि क्षिप्तानि
अपनीतानि शत्रूणां येस्ता चि मुंडक्षिप्तानि क्षिप्तमुंडा
नि अपनीतमस्तकानि तैः वाहिताग्न्यादि[त्वा]दिति निष्ठांत
स्य क्षिप्तपदस्य परनिपातः॥ अपरे त्वाहुः॥ चंडशरव
र्षैः तां कालीं छादयामास॥ मुंडश्च मुंडस्तु क्षिप्तैः अति
तश्चक्रैः आयुधैः तां कालीं छादयामासेति॥ तच्चुडत्त
रवा॥ अथ मुंडश्च धावतामिति॥ आधोन्येन पृथङ्मुंड
स्य युद्धाभावेन विरोध्यते तस्मा चंड एव शरवर्षैरकैश्च
८ कैश्च तां छादयामासेति युक्तं वक्तुं तत्र मुंडक्षिप्तैः
रिति विसर्गे मुंडशब्देन पदंपतं॥ किंतु निर्विसर्ग एव कृ
तसमासः पठनीयो मुंडक्षिप्तैरिति तत्र चंड एव शरवर्षैः
तां चक्रैः छादयामास॥ कालीं॥ किंभूतैश्चक्रैः मुंडक्षि
प्तैः क्षिप्तमस्तकैः॥१७॥ ॥ तानि चक्राण्यनेकानि विश
मानानि तन्मुखं॥ बभुर्यथार्कविंबानि सुबहूनि घनो
दरं॥१८॥ ॥तानि चंडेन दैत्येन प्रयुक्तानि अनेकानि

अथ पदाती लक्ष्यं बलं सैन्यं ममर्द॥ मर्द क्षोदे॥ स्वा
र्थे लिङ्॥ चुक्षोद पिपेष॥ चूर्णीचकार॥ अन्यान्नु दे
क्ष त्यान् अपायंश्च॥ स्वादत॥ यथा अन्यान्नु दैत्यान् अत्ता
उपयच्च॥ अत्ती लउद॥ तत आघाते चुरादिः॥ निर्दन॥
असिना निहताः केचित् केचित् खट्वांगताडिताः
जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा॥१५॥
तथा कालदेव्या केचिदसुराः असिनाखड्गेन
निहतास्ताडिताः संतः विनाशं जग्मुः॥ तथा के
चिदसुराः तथा कालया दंताग्राभिहताः संतो वि
नाशं जग्मुः॥ असौ कालवे तु विच्छन खट्वायाः अंग
अस्थि तेन ताडिताः खट्वे तपितृभूमिष्ठास्नग्गनसी
द्रव्यधिप दैवताः तदैतेन गमातृश्च मप्रतिहत
शक्तिकर्मसाधकं॥ अन्ये त्वाहुः॥ खट्वासुरशरी
रपंजरः खट्वा स्यमंगं खट्वांगमिति॥ अन्ये तु
प्रेतनरशिरःकरखीकसपंजरः कंकालः खट्व

बाणसंभवेषु॥अभूतं चोपम्यं द्रष्टव्यं॥अर्के स्फ
टिकसूर्ययोः चक्रं राष्ट्रे रथांगे च सैन्ये शस्त्रे च
कीर्तितं॥घनो मेघे मतं गुणे त्रि मूर्त्तानिरंतरे
१८॥ ॥ततो जहासातिरुषा भीमं भैरवनादिनी॥
काली करालवक्त्रांतर्दुर्दर्शदशनोज्वला॥१९॥
ततो रणे सर्वोल्लासतः काली देवी अतिरुषा कृ
धा भीमं भयंकरं यथास्यात्तथा जहास॥हसित
वती॥हस हसने॥कीदृशी काली॥भैरवं भयं
करं॥यथास्यात्तथा॥नंदती भैरवनादिनी॥यद्वा
भैरवः कालाग्निरुद्रः तद्वन्नादास्तरणे गर्जति भै
रवनादिनी यद्वा भीमं यथास्यात्तथा भैरवं देवं ना
दयति नादोपेतं करोति सानवपरस्त्रीभोगे
सबलः॥कृतशृंगं नादं कृतवती भैरवनादिनी॥
पुनः कीदृशी काली करालवक्त्रा करालं भय
कृद्रूपं दंतुरं तुंगमकृते॥करालं वक्त्रं यस्याः
सा तथोक्ता॥यद्वोत्तरा हृमेकपदं॥कालीपदं

९ ९

विहाय॥करालेवक्त्रे यस्या अभ्यंतरेलत्रदुर्दर्शाः दुःखे
न दृश्यमानाः कृष्णुमशक्याः येदशनाः दंताः दं
ष्ट्राः तैरुज्वला॥करालवक्त्रांतर्दुर्दर्शदशनोज्वला॥ ६
हासः शुभ्रः तेन काली कृष्णापि सती उज्वलाभू
दिति वर्णोत्कर्षोक्तिः॥१९॥ ॥उत्थाय च महासिंहं
देवी चंडमधावत॥गृहीत्वा चास्य केशेषु शिरस्ते
नासिनाच्छिनत्॥२०॥ ॥सा काली देवी विजिगी
षुः सती महासिं महांतं खड्गं उत्थाय उत्थाप्य स
म्यक् कृत्वा ऊर्ध्वीकृत्य॥अंतर्भावितण्यर्थोत्र तिष्ठति॥
यद्वा उत्थाय उत्थाप्य ऊर्ध्वीकृत्य उद्भवति ष्ठति॥
कचित्सकर्मको गतो गतिवचनः॥अकर्मकः॥यद्वा उत्था
प्येति पाठः॥तयन्तो णिच्॥महासिंहं तु यमानं प्रयु
ज्य ऊर्ध्वीकृत्वा चंडमधावत॥धावुगतिशुद्ध्योः॥धा
तुः सुरितेलोप्रासनेपदं॥चंडदैत्यमुपजोतुमा
टौकत॥ततः किमकृतसेत्याह॥गृहीत्वेत्यादि॥

सप्त०

अस्य चंडस्यासुरस्य केशेषु मूर्द्धजेषु गृहीत्वा आकृ
ष्य तेन प्रसिद्धेन असिना शिरोमस्तकं अच्छिनत्
अच्छिदत् ॥ कलेवरादपातयत् ॥ व्याहरद्देवीकर
णे ॥ उत्थायैव महासिंहं देवीइति पाठे महासिंहे केस
रिणं उत्थाय अरूढदेवी चंडमधावतेति संबंधः ॥
अथवा महासिंहं देवी इति छेदः ॥ रूषा तेनासुरस्य
यं ॥ कूल उन्मादने चुरादिः देवी महासिंमहां त
रवकं उत्थाय उतोलय उत्थाल्येमहं इति रूषा चंड
१० मधावत ॥ अतएव तेनाशिनी अच्छिनदिमन्वयो १०
घटते ॥ उत्थाय अरूढस्य उत्तोल्य उत्थाप्य इत्यर्थ
पर्यायणं शिष्टप्रयोगतो धावने कर्थे च या घ
टते ॥ यद्वा उत्थाय च महासिंहं देवी चंडमधा
वतेति कचित्पाठः ॥ महासिंहं सकाशात् उत्था
य अथ रूढदेवी चंडमधावतेति अन्वयः ॥ यद्वा
उत्थाय च महासिंहं देवी चंडमधावतेति पाठः ॥
सुपिस्थः कः उत्कैस्तिष्ठति ॥ उत्था अयगतो

असंख्यातानि च क्रूराणि कृत्तिणि तन्मुखं तस्याः
कोल्याः देव्याः मुखं कुर्लं विशमानानि ॥ प्रवेश
नशीलानि बभुः ॥ भान्तिस्म ॥ अभ्रुभिरि दिदीपिरे
कान्तीव ॥ अर्कबिंबानि च ॥ यथा सुबहून्यनेकानि
अर्कस्य रवेर्बिंबानि मंडलानि घनोदरं घनस्य मे
घस्य मेघस्य उदरं जठरं अभ्यंतरं प्रविशमाना
नि प्रवेशनस्वभावानि भांति शोभन्ते यथा मान्य
पि च क्रूराणि तानि विविदृश्यानि भुनेपदं विध्यौ निरु
पसर्गस्याश्रयणादिकं नरानं च ॥ कर्तरिहि ॥ ता
छिल्यवयो वचनशक्तिषुवानन्दश प्रत्ययोः नारु
त्रो ल्लटः ने ल्लो कान्यये धातोष्वधीप्रति प्रविधि
ध्यौ लौन्तितिलटः चात इति तरावत्साजाप्यत
थान कारेण प्रसादस्तश्रवणात् ॥ नशांतयोगे
हकधोगषष्ठी वाचित्वा द्वितीया ॥ विशप्रवेशने
सकर्मकः ॥ उपदाविविश्वैः राश्चे मोसेकाः
को शालेश्वरेभांति वत् ॥ उत्सादो वकुन्यर्क वि

अथ मुंडोऽभ्यधावत्तां दृष्ट्वा चंडं निपातितं ॥ तमप्यपातयद्भूमौ
खड्गाभिहतं रुषा ॥२२॥ ॥अथ मुंडो महासुरः तयां का
ल्या देव्या निपातितं भ्रंशितं चंडं दृष्ट्वा तां कालीं अभ्य
धावत् ॥ उपद्रोतुं माढौकत ॥ स्यगतो ॥ सत्वेविगितायां
गतौ धे वादेशा दृश्यते ॥ यद्वा धालु गतिशुध्योः खादिते
तु ॥ लङ् अथ सा काली देवी रुषा क्रुधा तमपि मुंडासुरम
पि खड्गाभिहतं खड्गेन ताडितं परासुं भूमौ अपातय
त् ॥ पातयामास ॥ खड्गो नरकंकालः प्रेतेन रहिता
११ स्थि पंजरः तेन ताडितः परासुः छूतः तं ॥ मुंड केत्रि ११
षु मुंडितं ॥ दानवेषु स्त्रिमुंडः स्यात् मस्तके चैयोरदः ॥
मुंडितेत्रिषु लिंगेषु मुंडे मुंडं त्वयोर्निहितं ॥ अपातयद्भू
पातयते लेट् ॥२३॥ ॥हतशेषं ततः सैन्यं दृष्ट्वा चंडं नि
पातितं ॥ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं ॥२३॥
देव्याहतेभ्यः शेषमवशिष्टं सैन्यं देसबलं स्वल्पं कं चं
सुमहावीर्यं सुष्ठुमहद्वीर्यं प्रभावो यस्य सः तं चंडं च सु

महावीर्यं मुंडं च युद्धे देव्या निपातितं दृष्ट्वा भयातुरं सत् त
तः पुरुषभ्रमितः स कातरगतः अपगतं दिशो भेजे ॥ तं
तो युद्धभूमितो पसृत्य दिशं तां नाशिश्रयत् ॥ भयेनातु
रं विकलं कथितं भयातुरं ॥२३॥ ॥शिरश्चंडस्य काली
च गृहीत्वा मुंडमेव च ॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य
चंडिकां ॥२४॥ ॥काली अंबिका ललाटोत्थिता देवी
चंडस्यासुरस्य शिरश्च तथा मुंडस्यासुरस्यैदं मौंडं
शिरश्च तयोर्मस्तकद्वयं गृहीत्वा आदाय प्रचंडाट्टहास
मिश्रं प्रचंडः प्रगल्भः अट्टः अत्युच्चकः हासः प्रचं
डाट्टहासः तेन मिश्रं मिश्रितं प्रगल्भादिकहास
गर्भं यथा स्यात्तथा अभ्येत्य अंतिकमागत्यैव चंडि
कामंबिकां आद्यशक्तिं प्राह अवोचत् ॥ प्राहेति व
यं कालसामान्यद्योति ॥ यथा स्त्रियः किमद्भुतं
कार्यं विधायस्व निकाये सहासं भाषंते स्वके लो
के तथैवं सहासमुवाच ह ॥ अथवा योलोपरदेव
तां त्रिभुवनजननीं स्तुवंतेश्वरीं प्रागभ्येत्य प्रगत्या

शुंभाय गृहीत्वा णे हं त कथितं तो तौ विमौ चंडमुंडौ पुनः इ
प्सुभाग तौ तावालोक्य जननीति सोक्त्रासो हास्यो
सो युक्तः रवेणोक्तं विस्तरेण ॥२४॥ ॥ कालीकिमब्र
वीत् चंडिकामित्याह ॥ काल्युवाच ॥ ॥ मया तवात्रो
पहृतौ चंडमुंडौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं नि
शुंभं च हनिष्यसि ॥२५॥ ॥ हे चंडिके तव महापशू द्वौ
चंडमुंडौ अत्र युद्धयज्ञे युद्धे एव यज्ञस्तस्मिन् युद्धयज्ञः तस्मि
न् विषये मया काल्या उपहृतौ समर्पितौ उपहारी
१२ कृतौ स्तः अतश्च युद्धयज्ञो यस्याः सा युद्धयज्ञा देवी १२
देवकार्यकारिणी हे युद्धयज्ञे देवि हे देवकार्यकारिणि त्वं स्व
यमेव शुंभं निशुंभं च द्वौ महापशू देवगणप्रीत्यै हनिष्यसि ॥
यद्वा युद्धयज्ञे विषये हनिष्यसि यथा देवगणप्रीत्यै
यज्ञे शास्त्रोक्तैः महापशुभिः नरमेधैर्हन्यते नरः
तथा तावन्मया ऋत्विजेव चंडमुंडौ नाम महापशू
द्वौ हतौ ॥ अतःपरं शुंभं निशुंभं च महापशुं त्वमेव

आद्यः पूर्वैः कौल्पशु ॥ आसमुत्पादयित्वा अथ देवी उग्रा
उग्रनीलसती महासिंहं च आप्य अगमत् प्राप्य चंडम
धावतेति अन्वयः ॥ अत्रैवं पाठे ॥ अर्थांतरे यथा दे
वीं इति रूपा उग्रा उग्रनीलसती महासिंहं च महाराव
कं च आप्य अगमत् प्राप्य चंडम् अधावतेति कर्तरान्वी
न्वयस्तु पूर्ववत् ॥२०॥ ॥ छिन्ने शिरसि दैत्येंद्रश्च
क्रे नादं सुभैरवं ॥ तेन नादेन महता त्रासितं भुवनत्रयं ॥
२१॥ ॥ दैत्येंद्रः चंडमहासुरः तस्यैव शिरसि देव्या
छिन्ने सति शिरःछेदसमय एव पशुवत् सुभैरवं
सुष्ठु भयंकरं नादं सिंहनादं मुखेन ध्वानं च चक्रे कृत
वान् ॥ तेन महता नादेन शब्देन भुवनत्रये त्रासितं
त्रस्तं उद्वेगं प्रापितं कर्मणि क्तः ॥ उद्वेगं प्रापितं ॥ यद्वा
त्रसनं त्रासः तदस्य संजातं तारकादित्वात् इतच् ॥
मसौ चंडः छिन्ने रसा ॥ अपि मायावित्वात् ॥ पुनः सोऽपि
तो युद्धे अन्यथा कथमयं नादः स्यात् तेन नादेन
भयंकरेण त्रासितं संजातत्रासमभवद्भुवनत्रयं ॥२१॥ ॥

श्चंडमुंडादेव्यैव कथ्यते ॥ ततश्च पृषोदरादित्वाच्चंडमुंड
रूणाने चामुंडा साध्यति ॥ यद्यस्य करे स्ति तत्तस्यास्तीति
तद्वत्संभवति दंडीतिवत् ॥ यं करेण यो गृह्णाति स तस्या
स्तीति मत्वर्थ संभवनात्तद्वान् संभवति तद्धारणात्
स्वरदूतीतिवत् ॥ प्रकृतेपि चंडमुंडौ कयापि गृह्णाति सा
चंडमुंडवती कालीति मत्वर्थे आरी आदित्वादिति स्त्रियां
टपि चंडशब्दस्य पृषोदरादित्वात्तदभावे चंडमुंडे चामुं
॥९३॥ डेति चंडिकापि प्रायः ॥ यद्यपि चंडमुंडयोः शिरसी एव ९३
काल्या गृहीत्वा आनीते ॥ ननु तावेव चंडमुंडौ देव्यो त
थापि कापि ॥ ग्रामैकदेशे दग्धे ग्रामो दग्ध इतिवत् चं
डमुंडैकदेशयोः शिरसोश्चंडमुंडौ समुदायोतयोः प्र
युक्तौ शिष्टप्रयोगतः ॥ कश्चित्त्वाख्याने च प्रमाणश्च ।
समाख्यातस्तत्स्कन्धश्च समीरितः ॥ इत्यभिधानात्
रा चोनु तस्कराद्मुंडयति खंडयति च मुंडा च मुंडेव
चामुंडा इहस नेषामपि हृष्यत इति पुरुषवद्दीर्घे संज्ञेति ॥

तत्रा ॥ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता ॥ चामुंडेति ततो
लोके ख्याता देवी भविष्यसीति चंडिकाभिप्रायतश्चामुंडे
ति प्रकृतार्थ हार्दिद प्रकृतार्थानुज्ञानाद्गुणविप्रणीति
रूढशब्दार्थे निराकाकोप प्रसंगच्च ॥ ७ ॥ ॥ इति श्री
महाराजाधिराज श्रीमन्नागमराम्बयश्रीमदुदूरण सुंड
श्री शे तनुश्चक्रवर्ति विरचितायां गोपालनस्यां चंडिकाम
हात्म्य टीकायां चंडमुंडवधाविद्धपलक्षितः सप्तमो
ध्यायः ॥ ७ ॥ ॥ श्रीमज्जगदंबार्पणमस्तु ॥ श्री राजाम
गजहूं ॥ ५।८७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

१४ ९८

हंतुमर्हसीतिभावः॥२५॥ ॥ऋषिरुवाच॥ ॥सुमेधाः
सुरथंवाचमूचे॥ ॥तावानीतौततोदृष्ट्वाचंडमुंडौम
हासुरौ॥उवाचकालीकल्याणीललितंचंडिकांवचः॥
२६॥ ॥ततोनंतरंकल्याणींकल्याणशुभांवाचंवचनंति
कथयंतीचंडिकांभगवतीतौमहासुरौचंडमुंडौकालमा
आनीतौदृष्ट्वाकालींदेवींललितंईप्सितंमनोहरंव
चःउवाचउचितंउक्तवती॥२७॥ ॥यस्माच्चंडंचमुंडंच
गृहीत्वात्वमुपागता॥चामुंडेतिततोलोकेख्याता
देवीभविष्यसि॥२८॥ ॥चंडिकादेवीकालीमादि
श्यतु॥किमिति॥कालित्वंयस्मात्कारणात्तुचंडमु
डंचगृहीत्वामामुपागतासिततःकारणात्तुलोकेभु
वनेचामुंडेतिख्यातादेवीभविष्यसि॥लोकेचामुंडे
तिनाम्नाकीर्तितादेवीभविष्यसि॥स्पष्टस्पष्टं॥
इतिललितंवचःचंडिकाम्बिकाहस्ताच्चंड
मुंडौद्वौकालमार्गेण्हादसोयतः॥महत्वंचेच्छुत

देशानां सैन्यानीति भावः ॥ देशानां महतां यानि सर्वाणि ह
स्त्यश्वरथपदातिलक्षणानि समस्तानि सैन्यानि तेषां मु
द्योगः उद्यमः तं उद्योगं सर्वसैन्यानामित्येव सिद्धे दे
शानामिति प्राधान्यख्यापनार्थं ॥ यद्वा ॥ सर्वाणि सै
न्यानि येषां ते सर्वसैन्याः रक्तबिंदुप्रभृतयो देशाः ते
षामुद्योगः तमादिदेश ॥ प्रभूतं प्रचुरं प्राज्यमदभ्रं ब
हुलं बहु ॥ क्षयो नाशः संजातो येषां तानि क्षयितानि तेषु
१ हतेषु कृतेषु ॥ यद्वा क्षपितेषु ॥ क्षेप प्रेरणे ॥ चुरादिः ॥ २
प्रेरितेषु द्रावितेषु प्राणेभ्यो दूरीकृतेषु नाशितेष्विति या
वत् ॥ कोपपराधीनं अधिनं चेतो यस्य स तथोक्तः कोपेर प
धीनं चित्तं इति यावत् ॥ यद्वा कोपे पराधीनं आयत्तं अधी
नमर्पितं चेतो यस्य स तथोक्तः असुरेश्वर इति असुरा
णामीश्वरः शुंभः ॥ यद्वा असून् प्राणान् राति गृह्णाति
असुरः मृत्युः ईश्वरो यस्य सः असुरेश्वरः मृत्युपर
तंत्रः आसन्नमृत्युः शुंभो देवीं प्रति देशानामुद्योगमा

दिदेश आज्ञापयामासेतिभावः ॥ हपूरणे ॥ २ ॥ ॥ अद्य सर्व
बलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां चतुराशीतिर्निर्यां
तु स्वबलैर्वृताः ॥ ३ ॥ ॥ शुंभः पुनर्विशेषतः आदिदेश ॥ कि
मिति ॥ अद्यास्मिन्नहनि इदानीं वा मदाज्ञया षडशीति
दैत्याः प्रधानभूता उदायुधाः उद्धृतशस्त्राः सज्जीकृ
तायुधाः सन्तः सर्वबलैर्वृताः सर्वैः सैन्यैः तुरंगकक्ष्य
कैः सज्जितैः हस्त्यश्वरथपदातादिभिः सेनाभिः वृताः
वेष्टिताः सन्तः निर्यांतु देव्याः संमुखे हंतुं निर्गच्छंतु ॥ षड्भि
रधिकाऽशीतिः शाकपार्थिवत्वात्समासः ॥ विंशत्याद्याः
सदैकस्मिन् संख्याः संख्येयसंख्ययोः ॥ किंच कंबूनां कंबूना
म्नां दैत्यानां चतुराशीति वृंदभेदाः सर्वबलैर्वृताः स
तः निर्यांतु देव्याः संमुखे निर्गच्छंतु ॥ चतुर्भिरधिकाऽ
शीतिः चतुराशीतिः पूर्ववदेकवचनं ॥ यदि चतुरशी
तिर्विसर्गः पाठः तदा चतस्रः अशीतयः कंबूनां
केयः समाहृताः इति विग्रहस्तदा तु द्वितीयार्था

स्त॰ दा.का.५

द्विमासमाहारे समासः॥ यद्वा॥ चतस्त्रश्च अशीतिश्च द्वंद्वे प १
तोऽप्यत्र्यः समाहृताः इति द्विगुर्वा समासे द्वंद्वं वा
नां चतुरशीतिः॥ कतिस्विद्बहुत्वेनैषामिति निर्णय
तु निरेतु॥ इति एकवचनान्तेन योज्यं॥ एकवचो द्विप्रतः
यथा वृक्षाः फलकलिलता सा सापि कुलकलिता च फलती
ते एकवचनसंगतिः॥ चतुराशीतिपाठे॥ अन्याहतद्वंत्र
तत्रे माद्विति योगविभागतः शिष्टप्रयोगतः प्रागेका
2 दशभ्यो छंदसीति सूत्रकाव्यव्यवहारलिंगात्॥ योग 2
विभागादिष्टसिद्धिः इत्याहं तच्चरेफात्॥ अत एव पूर्वो
दशादित्या द्व॥ अन्येषामपि दृश्यत इति वा आशीतिश
ब्दाकारस्य वा दीर्घत्वं द्रष्टव्यं नेतत्सर्वत्र कर्तव्यमिति
चतस्त्र आशीतयेद्वत्र दशातिकाद्विकसंख्या
संख्येयेषु च चात्र बुधाः॥ ॥ कोटिवीर्याणि पंच
राशकुराणां कुर्वन्ति वै॥ शतं कुलानि धूम्राणां
निर्गच्छंतु ममाज्ञया॥४॥ ॥शुंभः पुनर्निर्दिशितः

श्रीगणेशायनमः॥ ॥ऋषिरुवाच॥ ॥सुमेधाः सुरथं
वाचम्नवे॥ ॥चंडे च निहते दैत्ये मुंडे च विनिपातिते॥
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः॥१॥ ततः को
पपराधीनचेताः शुंभः प्रतापवान्॥ उद्योगं सर्वसै
न्यानां दैत्यानामादिदेश ह॥२॥ ॥अस्य श्लोकद्व
यस्यैकक्रियत्वादेककर्तृत्वादेकान्वयता वसैया
का अस्याद्व्याख्या तत्र चंडे दैत्ये निहते सति तथैव मुं
डे चंडे दैत्ये विनिपातिते सति तथैव च सैन्येषु च बहुलेषु
बहुसंख्यातेषु क्षयितेषु सत्सु संजातभयेषु दूते
षु सत्सु अतोऽनंतरं कोपपराधीनचेताः कोपपर
वशात्मा ततः प्रतापवान् अकंप्य तेजस्कः परत्वा
असुरेश्वरः शुंभः दैत्यानां सर्वसैन्यानां उद्योगं दंडी
ति सेनानिःसरणार्थं यात्रां सर्वोत्सुकतामादिदेश॥ देवीप्र
देवी प्रहृष्टिषेणाधितुं उद्योगं कुरुतेत्याज्ञापयामास॥

ह्राः कालकनामानो दैत्याः कालं यमरूपमात्मानं शत्रुभ्यः
कायति कथयति कालकः कालकस्यापत्यानि पुमांसः
कालकाः शिवादित्वादण् ॥ यद्वा कालं मदं कायति कथ
यति कालकः तस्य इमे कालकाः कालककुलोत्पन्नाः दै
त्याश्च ममाज्ञया त्वरिताः त्वरास्संभ्रमे ॥ संभ्रमसहि
ताः वेगेन संजातत्वराः सत्वराः संतः दैत्यास्समं युद्धाय
योद्धुं सन्नद्धाः सायुधाः संतः निर्यान्तु तथा तद्वत् ॥ दौर्हृदाः अ
२ सुराः दुष्टं हृदयं यस्य स दुर्हृत् दौर्हृदः सुहृद्दुर्हृदौ मित्रामित्रयोरिति नि ३
पातितः ॥ तस्यापत्यानि पुमांसः दौर्हृदाः दौर्हृदाख्याः असु
राः ते युद्धाय सन्नद्धाः संतो ममाज्ञया त्वरमाणाः त्वरिताः
निर्यान्तु ॥ तथा मौर्याख्याः असुराः मुरस्यापत्यानि
गोत्राणि गर्गादित्वाद्यञ् ॥ यञञोश्च लुक् ॥ बहुत्वे त
न ॥ कादकस्तस्मात् ॥ केदोवरपुत्रेणाभिजायते ॥ यद्वा मुर
स्य देहस्य भावः मौर्यं तद्वंतः मौर्याः अर्शआदित्वादच्
यद्वा मुरस्यापत्यं मौरिः ॥ [illegible] ॥ मौरीमह

तिमौर्याः ॥ इतश्चादिभ्यश्च ॥ ते निधुद्धाय सन्नद्धाः त्वरिताः मद
ज्ञया दैत्यास्संभ्रमे निर्यान्तु ॥ तथा कालकेयाः कालकायाः
अपत्यानि पुमांसः कालकेयाः कालकेयनामानो अ
सुराः स्त्रीभ्यो ढक् ॥ कालकवंशजाता दैत्याः शुभ्रादिभ्य
श्चेति ढक् ॥ कालकेयाः तेऽपि मदाज्ञया त्वरिताः युद्धाय स
न्नद्धाः संतो निर्यान्तु ॥ इति शुम्भाज्ञादिदेश ॥५॥ ॥इत्याज्ञाप्या
सुरपतिः शुम्भो भैरवशासनः ॥ निर्जगाम महासैन्य
सहस्रैर्बहुभिर्वृतः ॥६॥ ॥इत्येवमसुरानाज्ञाप्य भै
रवशासनः भैरवं भयंकरं शासनं आज्ञा यस्य सः
तथोक्तः यद्वा ॥ भैरवात्मनो [illegible] सकारणत्वशासनं यस्य
शुम्भस्य आसन्नमरणत्वात् स तथोक्तः असुरपतिः
शुम्भः बहुभिरनेकैर्दैत्यैः वृतः सन् निर्जगाम ॥ दैत्या
सैन्यसंयोद्धुं निर्ययौ निरगात् किंभूतैः बहुभिः महासैन्य
सहस्रैः सैन्यानां सहस्राणि सैन्यसहस्राणि महांति
सैन्यसहस्राणि तेषु बहुषु परिमितेषु संतितानि म

हा सैन्यसहस्राणि तैर्बहुभिरनेकैरसंख्यातैः दानवसैन्यैः
वृतो देव्याः समं योद्धुं निर्जगाम शुंभः ॥६॥ ॥आयांतं चंडि
का दृष्ट्वा तत्सैन्यमतिभीषणं ॥ ज्याःस्वनैः पूरयामास
धरणीगगनांतरं ॥७॥ ॥आयांतं शुंभसेनायां समवे
तायसैन्यास्ते सैनिकाश्च तेरिति सैन्यः पुंसि ॥ सेनां स
मवेतः सैन्यः सेनायावेतिन्यः ॥ अतिरूपानेऽपित्रा
४ दृश्यार्थे तथाच ॥ अमन्वयः अतिभीषणमिति भयंकरं त ४
सैन्यं ॥ यद्वा ते सैन्याः सेनायां समवेताः संमिलिताः ह
स्त्यश्वरथपदातिसमूहः यस्य शुंभस्य तत्सैन्यं ॥ तेषायां
तं शुंभं दृष्ट्वा चंडिकादेवी ज्यास्वनैः धनुर्ज्यानां टंकारै
र्वीर्टिकारध्वनिभिः धरणीगगनांतरं द्यावापृथिव्यं
तराळं पूरयामास ॥ अथ द्वितीयान्वयः ॥ अतिभीषणं
अतितरां भीषणो भयंकरः तत्सैन्यं तस्य शुंभस्य सैन्यः
सेनायां समवेतो मिलितः हस्त्यश्वरथपदातिसमूहः

आदिदेश ॥ किमिति ॥ ये प्रसिद्धानि ॥ कोटिवीर्याणि कोटि
गणितवीर्याणि ॥ कोटिवीर्येनामधेयानि असुराणां पंचाश पं॰
त्कुलानि वृंदानि निर्गच्छंतु ॥ ममाज्ञया देव्याः समं योद्धुं
निर्यांतु ॥ कोटिसंख्यानि पंचाशदिति पाठे ॥ असुरा
णां कुलानि निर्यांतु ॥ कीर्तितानि पंचाशत् पुनः कथि
तानि कोटिसंख्यानि असुराणां कुलानि वै प्रसिद्धानि
मम शुंभस्याज्ञया देव्याः समं योद्धुं निर्गच्छंतु इत्यर्थः ॥
किंच धूम्राणां धूम्रनाम्नामसुराणां शतं कुलानि शतं वृं
दानि निर्गच्छंतु ॥ ममाज्ञया देव्याः समं योद्धुं निर्यांतु ॥ धौम्रा
णामिति पाठे तु ॥ धूम्रस्यापत्यानि पुमांसः धौम्राः तेषा
दित्यादृष्टु ॥ अंतरश्लोकपवादः ॥ धौम्राणामसुराणां शतं
कुलानि योद्धुं निर्गच्छंत्वित्यर्थः ॥ विधौम्रोः ॥६॥
कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ॥ युद्धा
य सज्जा निर्यांतु आज्ञया त्वरिता मम ॥५॥ ॥ शुंभः
पुनर्विशेषतः आदिदेश ॥ किमिति ॥ कालकाः असु

तीयस्तु तरो सुष्ठु महानादं महान्तं नादं गलगर्जनं छत्तेवानु
चकार ॥ अंबिकापि घंटास्वनेन घंटानादेन तं नादं
तस्यासिंहस्य नादं सिंहनादं अबृंहयत् ॥ अबृंहयत् ॥ बृहि
वृद्धौ ॥ हेतौ णिच् ॥ लङ् ॥ अडागमः ॥ वृद्धिर्मासु ॥ अंबिका
चापध्वनैर्हयदिति पाठे तु आगमन्यासेना निषिद्धः डागमाभा
वः ॥ अन्यथा तु पाबृंहयदिति स्यात् ॥ ततः सिंहो महानादं ॥
स ततसिंहो महानादमिति च पाठ इष्ये ॥ बनेकवस्तु सुष्ठु किन्तु तेस
५ तीवचानिर्दिष्ट ॥८॥ ॥ धनुर्ज्यासिंहघंटानां नादापूरि ५
तदिङ्मुखा ॥ निनादैर्भीषणैः काली जिग्ये विस्तारितानना
९ ॥ ॥ धनुर्ज्यानादेन सिंहनादेन घंटानादेन च आपू
रितदिङ्मुखा आसमंतात्पूरितानि दिङ्मुखानि यस्या
सा तथोक्ता ॥ चांगा ओपसर्गेना दसंयोगे पृषादीति प
दिङ्पू ॥ पक्षे तु दप्यू ॥ एवंविधा काली देवीति स्त्रियं वि
धेर्भीषणैः निनादैर्विस्तारितानना विस्तारितास्या विस्तारि
तमुखा सती जिग्ये जिजये ॥ जि जये अभिभवे व्यत्ययो

च कुलमिति कर्तर्यात्मनेपदं ॥ को कोत्कर्षेण वर्त्ततेय द्वारा
कूनामिव बभूवे ॥ य द्वाजिग्ये इति कर्मणि प्रयोगः ॥ तथाहि
धनुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा विस्तारिता
ननात्तया काली देवी तया भीषणैः भयंकरैः निनादैः
स्वनैः असुरवर्गः शत्रुवर्गो जिग्ये अभिबभूवे ॥ कर्तरि
परस्मैपदी जयति ॥ कर्मणि तु भावकर्मणोरित्यात्मनेपदं
जज्ञे इति तु पाठे जानेः प्रादुर्भावे आत्मनेपदी काली भीष
णैर्निनादैर्विस्तारितानना जज्ञे प्रादुरभूदिति वित्ति
कृतकनालवदनाज्ञाता अजनिष्ट ॥ कीदृशी काली ॥ ध
नुर्ज्यासिंहस्य घंटायाश्च नादैः आपूरितदिङ्मुखा
आसमंतात्पूरितदिगंतराला ॥ अथवा जज्ञे इति ज्ञाअ
वबोधने कर्मणि लिट् आत्मनेपदं ॥ भीषणैर्निनादैः
या विस्तारितानना दैत्यसैन्यानि स्वकीयप्रयत्नानि प्र
यवसास्या मिति विवृत्ती कृतकनालबकाद्रूपते
सा काली ति दैत्यैर्जज्ञे अनुमापि ज्ञाता कीदृशी काली

धनुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा इत्यन्वय ॥ स
र्वा सिमहे वर्त्तिनानाकालिकावासरवीतितत्सादृश्य
तः संशयाभिरश्च तेषामधिपेणे र्निनादेर्विशेषचिन्हेर्दिक्स्ता
रितानना देहा सैन्यानि सर्वाण्यप्यमुनि प्रसक्तसास्त्रा
निति विहत्ती हृत कमल वदनासती या वत्ते ते साकाळी
ति देवैरज्ञायि इति भावः ॥१९॥ ॥तन्निनादमुपश्रुत्य
दैत्यसैन्यैश्चतुर्दिशं ॥ देवी सिंहस्तथा काली सरोषैः प
६ रिवारिताः ॥२०॥ ॥चतुर्दिशमिति लुप्तदशकारान्तं तन्नि ६
नादविशेषणं चेत् ॥ अथ चेत्सप्तम्यन्तेन क्रियाविशेषणं
स्यात्तदा दिशा शब्देनटावंतेन साधनीयं ॥ चतस्रो
दिशो विकरणसंख्यताः यस्य तन्निनादस्य चतुर्दिक
तं चतुर्दिशं चतुर्दिक्व्याप्तं तन्निनादं तासां धनुर्ज्यासिं
हघंटानां निनादं निःस्वनं ध्वनिं उपश्रुत्य कर्णं कृत्वा कुपि
तैर्दैत्यसैन्यैः देवी च आद्याशक्तिर्भगवती अंबिका सिं
हश्च केसरी वाहनीभूतः काळी च अंबिकायाः लला

तसैन्यैः ततः सैन्यैरायांतं दृष्ट्वा चंडिका देवी ज्यास्वनैः ध
नुष्टंकारैः पिता हृष्टमनो मीजानि तन्निस्वनैः धरणीगगनां
तरं पूरयामास ॥ अथ तत्लीयोन्वयः ॥ भीषणं भयंकरं शुंभं
आयांतं दृष्ट्वा भीषणं भयंकरं तत्सैन्यनापतस्य शुंभस्य
सैन्यनापि आयातु ॥ आगच्छतु ॥ दृष्ट्वा चंडिका देवी ज्यास्व
नैः धरणीगगनांतरं पूरयामास ॥ आयांतं आगच्छंतं शुं
भं आयातु आगच्छतु ॥ तत्सैन्यं शुंभसैन्यं नपुंसकलिंगं ॥
ज्यायाः स्वनाः तैः पूरिआप्यायने ॥ धरणीचगगनं च ध
रणीगगने तयोरंतरं मध्यं पृथिव्याकाशमध्यं व्याप्त
यामास ॥ आयांतं शत्रुं तं पदं ॥ आयातु मिति तु पाठे क
र्तरि रूः ॥ ततः शुंभं तत्सैन्यं च ॥२॥ सचसिंहो म
हानादमतीव कृतवान्नृप ॥ घंटास्वनेन तं नादमंबि
का चोपबृंहयत् ॥३॥ ॥सुमेधाः ऋषिः सुरथं राजा
नं संबोधयति ॥ हे नृप हतावधानो भव ॥ ततः
धनुर्ज्यानिःस्वनादनंतरं सचसिंहः सिंहश्चअं

७ र सिंहानां देवश्रेष्ठानां ।। भवाय भूतये अभिवृद्धये स्थितएव अतीव ७
वीर्यबलान्विताः शक्तयः सामर्थ्यलक्षणा देवतारूपाश्च ब्र
ह्मेशगुहविष्णूनां तथा इंद्रस्य च पंचापि पंचानां शरीरेभ्यो
विनिःक्रम्य विनिर्गत्य तद्रूपैः ब्रह्मादिरूपैः । तदाकारै
ताद्रूप्यस्तुल्यैश्चंडिकां ययुः प्रविष्टवत्यः ब्रह्मा च हंसगः
ईशश्च रुद्रः महेश्वरः गुहश्च कुमारः विष्णुश्च नारायणः
इंद्रश्च वज्री ए तेषां तनुभ्यो विनिर्गत्य एकाएका शक्तिर्देव
ता चंडिकां ययुः ।। ब्रह्मणः शरीरात् ब्राह्मी निर्गता । महे
श्वरस्य शरीरात् माहेश्वरी ।। कुमारस्य शरीरात् कौमारी ।।
विष्णोः शरीरात् वैष्णवी ।। इंद्रस्य शरीरात् ऐंद्री एतास्ततस्तस
स्त्वेनिर्गत्य तद्रूपेश्चंडिकां ययुः ।। आपुरित्यर्थः ।। भवः क
ल्याणं संसारसत्तावाप्तिर्जन्मात्तु ।। अमराणां सैन्यानि
तेषाममरसिंहानामिति पाठे तु ।। अमराः सिंहा इव श्रे
ष्ठाः अमरसिंहाः तेषां उपमितं व्याघ्रादिभिः सामान्याः
प्रयोगे समस्य इति ।। अश्व पुरुष ।। वीर्यं वीर्यकर्म बलं प्राण

सामर्थ्ये ।। स्वेच्छालक्ष्य सामर्थ्ये सैन्ये युज्यते ना काकसीरिणाः ।।
ब्रह्मनीवर्धते चिन्हं भले वला ।। ईशे ईशः महले खनं वृणोति
गुहः चेवेल्लि व्याप्नोति विश्वं तवा विश्वं विष्णुः इंद्र इति परमै
श्वर्ये राजते इंद्रः शक्नोति शक्तिः क्तिन् शक्नोतेः कर्तरि नयः
वा शक्तिः क्तिन् ।। चंडिका चंडते चंडिका तां ।। यत्प्रपंचो लिङ्ग
तद्रूपेति यद्रूपं तदेव ख्याल कर्तुमाह ।। यस्य देवस्य यद्रू
पं यथाभूषणवाहनं । तद्वदेव हि तच्छक्तिरसुरान्योद्धुमा
ययौ ।।१३।। देवीदानवयुद्धं द्रष्टुमुपागतानां तेषां ब्रह्मादी
नां शरीरेभ्यो विनिःक्रम्यानुभावात् । प्रकाम्यात् ।। कायव्यूहेन
प्रयत्क्षरूपेण तयो ब्रह्मणो दय शक्तयः तत्तद्देव सदृशरूपैः चं
डिकां वीरताः चंडिकां युद्धायोत्साहयितुं ययुरिति प्रोगपं
तास्ने नस्पष्टयति ।। यस्य देवस्य ब्रह्मादेः यद्रूपं आकारः यथा
भूषणवाहनं ।। यथालंकारं यथा वाहनं च येस्य देवस्य यद्वा
हनं तद्देवरूपं बिभ्राणाता द्वारा नैव शरीरविन्यासं
धारयंती तद्वदेव च वाहनमारूढवती तच्छक्तिस्तस्य स

स्कदेवस्य सप्तसायोर्दिं: अमरा एषादिदेवता: तद्वदेवायुधानि वि
भ्रती सती हि निश्चयेन असुरान् योद्धुं ॥ युधसंप्रहारे ॥ दे
यान् संप्रहर्तुं आययौ ॥ देवी सा निःशेष संग्रामरंगस्थले
वर्ताऽनागमत ॥ १३ ॥ ॥ हंसयुक्तसमानस्था साक्षसूत्र
कमंडलु: ॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते
१४ ॥ हंसयुक्तेयानं जितो यो विमानः तस्मिन् हंसयुक्तवि
मानेतिष्ठती तेहंसयुक्तविमानस्था ॥ उदक्याणां स्फटिक
८ म मणीनां सूत्रं जपमाला अक्षसूत्रं च कमंडलुं च ताभ्यां ८
सहवर्तमाना साक्षसूत्रकमंडलु: ॥ एवं विधा सा कानामे
त्याह ॥ एवं विशेषणाविशिष्टा ब्रह्मणः शक्तिः रसुरैः स
ह युद्धमायाता आजगाम सा खलु ब्रह्मणः ब्रह्माणी साभिधी
यते ॥ ब्रह्मणस्त्री ब्रह्माणी साभिधीयते ॥ ब्रह्मणस्त्री ब्रह्माणी
अत्रानुगागमाभावाद्वेदागमप्रसिद्धं नामधेयमित्यूह्य
ते ॥ अत एव निरुक्तिं तां नापेक्षितनियसिद्धनामेति नास्य
दृष्टि: ॥ यद्वा देवस्तत्वं तपो ब्रह्म ब्रह्मा विप्र: प्रजापति: ॥

टोड्दनात तथा चएता: देवी सिंहकालम: तिस्रोपि शरौघै: शार
सेपाते: शरक्षाते: चतुर्दिशं यथास्यात्तथा परिवारिता:
परिवेष्टिता: कलिता: विद्ध इतियावत् ॥ वष्टिभागुरिरल्लो
पमवाप्योरुपसर्गयो: ॥ इत्यल्ले ताइपि टापेवाप्यथावाचा नि
शा दिशा ॥ इति दिग्गशब्दात्टाबंतोप्यस्ति चतुस्रो दिशा:
चेधिकरणसंभृता: यस्मिन् शरौघवारणे कर्मणि तत्
चतुर्दिशं क्रियाविशेषणानां कर्मत्वं नपुंसकैकत्वं वक्तव्यं ॥ (७०)
एतस्मिन्नंतरे भूप विनाशाय सुरद्विषां ॥ भवायाम
रसिंहानामतिवीर्यबलान्विता: ॥ ७१ ॥ ॥ ब्रह्मेशगुह
विष्णूनां तथेंद्रस्य च शक्तय: ॥ शरीरेभ्यो विनिष्क्रम्य
तद्रूपैश्चंडिकां ययु: ॥ ७२ ॥ ॥ श्लोकद्वयमिदमेकक्रिया
कर्मकान्वयमवसेयं ॥ सुमेधासुरथं राजानं बोधयति ॥
हे नृप दुतावधारनो देवीमहिमानमाकर्ण्यत ॥ एतस्मिन्नं
तरे एतस्मिन्नवसरे देवी दानवसंग्रामे प्रस्तुते सति अंतरेऽ
वकाशे समये मध्ये वा सुरद्विषां दैत्यानां विनाशाय अमर

यं माहेश्वरी देवता प्राप्ता असुरैः समं योद्धुं आजगाम ॥ शुक्ले
शुभ्रके श्रेष्ठे सुकृते वृषभे वृष ॥ अस्त्री त्रिशूले च शूलं स्यात् ॥ शुभ्रं ॥
देवाद्दुतेवरः श्रेष्ठो त्रिसुशूलमस्ताकृ प्रिये ॥ अनापकः
परिहार्यः कङ्को वलयोस्त्रियां ॥ प्रासादिकं रिक्तं ॥ लेखा
रेखा कला प्रकृतौ चित्राता ॥ अन्यथा लेखा राजिरितिअ
र्थः ॥१५॥ ॥ कौमारी शक्तिहस्ता च मयूरवरवाहना ॥ यो
द्धुमभ्याययौ दैत्यान् अम्बिका गुहरूपिणी ॥१६॥ ॥ शक्ति
रायुधं हस्ते यस्याः सा तथोक्ता शक्तिहस्ता उपाहरणार्थे
ऽपि ॥ परे निष्ठा सप्तम्यौ भवत इति वक्तव्यं ॥ मयूरेषु श्रेष्ठो व
रः मयूरवरः वाहनं यस्याः सा मयूरवाहना ॥ वाहन वर
माहिताग्न्यादित्वात् नाशंकनीयं ॥ आहितशब्दाभावात् ॥ नहि
मयूरवरः वाहनेना रोपितो किंतु वाहनेयष्टा रोपिते मयूर
ते तदा रोपितत्वं नाहि तन्मुच्यते ॥ मयूरो वरं यस्याः सा तथो
क्ता ॥ रूपरूपवत्यानि अभ्युदयार्थि ॥ गुहं कुमारं कारणरूपय
ति दर्शयति गुहरूपिणी यद्वा गुहस्य रूपं गुहरूपं तद

स्यामस्तीति गुहरूपिणी अत इनिः ऋण् प्योड् प्॥ यद्वा गुह
रूपं करोति सा रूपयति तदा चष्टे वा तच्छीला गुहरूपयतेर्णिनिः
अम्बिका माता तत् कौमारी कुमारस्येयं कौमारी शक्तिश्चेति ता
दैत्यान् योद्धुं अभ्याययौ अभ्याजगाम ॥ च कृ
चौ तत् कौमारी वैशिकर अम्बिका माता दैवता शक्तिहस्ता मयूरवा
हना गुहरूपिणी च सती दैत्यान् योद्धुं संग्रहीतुं अभ्याययौ वि प्र ५
पन्वयः ॥१७॥ ॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥
रगा शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥१७॥ ॥ गरुडस्यो
परि गरुडोपरि ॥ पूरणगुणेत्यादिना षष्ठीसमासप्रतिषेधः
हृद्रूतो व्ययस्य तेन बहुपरि इतिवत् षष्ठीसमासः ॥ संस्थि
ता सम्यग् अवस्थिता ॥ गरुडारूढेत्यर्थः ॥ संख्याधारे स्थिते
स्मृते ॥ शंखश्चेषां रेजत्वः चक्रं च सुदर्शनः गदा च कौ
मोदकी शार्ङ्गं धनुः हस्तिदन्तः शृंगं शृंगस्य हस्ति
तस्येदं शार्ङ्गं वैष्णवं धनुः अन्यत्र दृश्यते च ॥ पयेश्रृङ्गमा
हिषमुच्यते ॥ गवलं माहिषं शृंगं शार्ङ्गं चापादि मन्मयं ॥

रक्तरक्तश्चंदनकः पूतैर्ष्वसेनांगतेनरक्तवङ्गावेननपुंसभवं॥
तत् शंखपद्मं हस्ते यस्याः सा शंखवच्चकगदाऊ रक्तहस्ता॥
प्रहरणार्थमेवः पानिवासप्रभेभावतदिति वक्तव्यं॥ शिखो
शियं वेणवीशक्तिर्देवतानारायणी तथैवचतदेव ब्रह्म
ण्यादिशक्तिर्वदे वदे समनुयोद्॥ तुथसंप्रहरे॥ संप्रह
तुअभ्युपायेयोगभूपाजगम॥ अथवा तथैव तदेववि
१० ष्णुदेवे वैष्णवीशक्तिरपिदेशानप्र। तुक्षमीतथावः॥
वैष्णव्याः शक्तेरायुधानि पंचगोहरस्कच रादइति वैष्ण १०
तीस॰ ५६ ॥ ॥ तदानीं मां देवीं आनम्रमूर्तयः भक्तिप्र
कर्षात् संतः सर्वे मुनयः वशिष्ठादयः स्तोष्यंति
वा दुष्यत्त ॥ तावत्रपं लिगा ५७ ॥ ॥ भीमादेवीति विख्या
तं तन्मे नाम भविष्यति ॥ ५२ ॥ ॥ ततः तस्मात् भीम
रूपस्य रक्षोभक्षणरूपत्वात् विख्यातं प्रसिद्धं भीमा
देवीति विख्यातं नाम मे देव्याः नामधेयं भविष्यति ॥
संपन्नस्य सेवकस्य द्वास्सा दिति भीमं नामाद्ययोः पादा ने
३३ लिपातितेन ॥ ५३ ॥ ॥ यदारुणाख्यस्त्रैलोक्ये महाबा ३३
धां करिष्यति ॥ तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्प
दं ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं
भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ ५४ ॥
हि देवा यदा त्रैलोक्ये लोकत्रये त्रिपिष्टपे लोके अरु
णाख्यः अरुणसंज्ञकः अरुणो नाम महासुरः
महाबाधां महतीं पीडां करिष्यति लोकानां बाधिष्य
तीति तदा तदा अहं देवी असंख्येयषट्पदं भ्रामरं रू

पं भ्रमरसंबंधिनीं मूर्तिं कृत्वा त्रैलोक्यस्य त्रयाणां लोकानां
हितार्थाय ॥ त्रैलोक्यस्येति छांदसी षष्ठी अन्यथा हि त
द्योगे चतुर्थी स्यात् ॥ तं अरुणं महासुरं वधिष्यामि ॥ हनि
ष्यामि ॥ तदा लोकाः सर्वतः सर्वत्र मां देवीं भ्रामरीति
च भ्रामरी देवी स्तोष्यंति सत्कीर्तयिष्यंति ॥ भ्रमरस्येयं
मा कृत्वा भ्रामरी देवी भ्रमरस्येदं भ्रमरं रूपं आकारः कथं
भूतं भ्रामरं रूपं असंख्येयाः संख्यातुमशक्याः गणनाम
तीताः षट्पदाः भ्रमराः यस्मिन् तत् ॥ असंख्येयषट्पदं
भ्रामरं स्वरूपं [illegible] देवी असंख्येय [illegible] भ्रामरं रूपम् [illegible]
अरुणं नाम महासुरं लोकरक्षणार्थं हनिष्यामि ॥ यतः त
तः सा भ्रामरीति नाम्ना लोकैः स्तूयते ॥ सर्वत्रापि
भा॰ च॰ ॥ अरुणस्यासुरस्यापि वधं पुरा कृतवती ॥ इति तु
[illegible] ॥ इदानीं देव्याः
अवतारणं [illegible]
[illegible] ॥ ॥ ५५ ॥ इत्थं यदा यदा बा
धा दानवोत्था भविष्यति ॥ तदा तदावतीर्याहं

सप्तशती) टी०श्री०९९

करिष्याम्यरिसंक्षयं ॥५३॥ ॥ हे देवाः इत्थमुक्तानुसारेण
प्रकारेण यदा यदा दानवैर्बाधा उत्पत्स्यति उत्थास्यति वा दान
वोत्था दानवेभ्यः समुत्पन्ना बाधा पीडा लोकानां भवि
ष्यति उत्पत्स्यते संपत्स्यति तदा तदा हे देवी तत्र काया
रूपावलीयं प्रादुर्भावमवाप्य अरातिसंक्षयं शत्रुविना
शं करिष्यामि विधास्यामि । दानवोत्थेति सुप्सुपेति समास
कः कर्तरि ॥५५॥ ॥ श्रीमद्भुजाधिराज श्रीमत्तोमरा
३४ न्वय श्रीमदुद्धरण राजश्री शांतनु चक्रवर्ती विरचि २८
तायां शांतनव्यां श्रीचंडीमाहात्म्य टीकायां नारा
यणीस्तुति विधुपकाक्षितः श्रीरुद्रैकादशोध्यायः
॥११॥ श्रीमज्जगदंबार्पणमस्तु ॥ श्रीरस्तु ॥ मंगलमस्तु ॥

सेविरिपो वचित ॥ अयोगः एवं ॥५५॥ वांस्तान् नरस्था पयस्यपी ॥ किं
च ॥५५॥ दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति ॥५०॥
त तस्मात् दुर्गमासुरवधात् हेतोः विख्यातं प्रसिद्धं मे दुर्गा देवी
ति नाम नामधेयं भविष्यति दुर्गमासुरं दुर्गमासुरस्यपि संह
रिष्यति ॥ दुर्गा तु देवी पृषोदरादित्वात् तकारलोपः यद्वा
दुर्गमासुरो हंतव्यत्वेन यस्याः सा दुर्गा तु रखी आदि वास्मदे
र्गायोः स्त्रियां टाप् ॥५०॥ ॥ पुनश्चाहं यदा भीमं रूपं कृ
त्वा हिमाचले ॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राण
कारणात् ॥५१॥ ॥ हे देवाः पुनश्च पुनरपि अहं देवी य
दा हिमाचले तुहिनाद्रौ भीमं घोरं रूपं कृत्वा ॥ रक्षोपस्र
तानां त्राणकारणात् इतोः रक्षांसि राक्षसान् भक्षयि
ष्यामि ॥ क्षयिष्यामीति पाठे क्षयं प्रापयिष्यामि ॥ प्रा
ति पदिकाद्धात्वर्थे च बहुलं इष्टवच्चेति णिच् ॥ क्षप
यिष्यामीति पाठे तु क्षप प्रेरणे चुरादिः प्रेरयिष्यामी
त्यर्थः ॥५२॥ ॥ तदा मां मुनयः सर्वे स्तोष्यंत्यानम्र

गोतयाबा ध्यासे स्तुतिः अविद्यमानां सकलोपरब्रह्मकला
ब्रह्मविद्यायस्याः संस्तुतो ममलायांसा ऽऽहं सकलबाधा॥
मोहस्वाममतासंस्तुतिः लांबाधांअसंशयं नाभिषिष्या
मि प्रीपिमुलकामेरवगंतव्यं॥ रविश्चेतच्छ दोहं सोयथाएभिः
स्तवैर्मांयः स्तोष्यते तस्याहं कारस्कृतां सकलां सर्वबा
धां मोहमयीं ममतां संहति शमयिष्यामि॥१॥ ॥मधुकै
टभनाशं च महिषासुरघातनं। कीर्तियिष्यंति ये तद्वद्वधं
शुंभनिशुंभयोः॥२॥ ॥अष्टम्यां च चतुर्दश्यां नवम्यां चै
कचेतसः॥ श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमं॥३॥
न तेषां दुःकृतं किंचिद् दुःकृतोत्था न चापदः॥ न भविष्य
ति दारिद्र्यं न चैवेष्टवियोजनं॥४॥ ॥श्लोकत्रयमेतदेका
न्वयं द्रष्टव्यं॥ पुरुषाः एकचेतसः संतः सावधानाः
संतः अष्टम्यां च नवम्यां च चतुर्दश्यां च पक्षद्वयेपि विशे
षानुक्तितः यथाक्रमं तु नयेऽपि मधुकैटभनाशं च म
हिषासुरघातनं च तद्वत् शुंभनिशुंभयोर्वधं च भक्त्या
कीर्तयिष्यंति तद्वदेव च ये श्रोष्यंति आकर्णयिष्यंति भ

क्त्या मम माहात्म्यमुत्तमं पुण्यतमं सर्वकामदुघं तेषां कीर्तयिष्यं
तां पुंसां च श्रोष्यतां च तेषां दुःकृतं दुरितं स्वल्पं किंचित्॥ न कि
चिदपि नाविष्यंति विनश्यंति इत्यर्थः॥ न च तेषां उभयेषां दारि
द्र्यं दरिद्रता भविष्यति॥ आपदाएव ते न भविष्यंति इत्यर्थः॥ न च
तेषां इष्टैः सहचेतनैरचेतनैश्च पुत्रादिभिर्धनादिभिश्च
वियोजनं वियोगो विश्लेषो न भविष्यति॥ सदेवेष्टैः सह भो
क्ष्यंते इत्यर्थः॥ मधुकैटभयो नाशो यस्मिन् ग्रंथे स तथो
क्तः। तं हनने नाशं॥ घातस्य करणं घातनं॥ ण्यतालिद्वं
महिषासुरघातनं सूदनं हिंसनं मारणं यस्मिन् ग्रंथे स तथो
क्तः॥ केचित्तु घातनस्थाने सूदनं पेठुः पुदरक्षणे हिंसायां च
तद्वत् तथैव इत्यर्थः॥ वधो यस्मिन् ग्रंथे प्रतिपादितत्वेन विद्यते
सः वधः अर्थवादित्वाद् वै॥ तं॥ शुंभनिशुंभयोरिति॥ द्वि
वचनेन वधद्वयं सूच्यते॥ तेन वधानां चैकस्य तु अ
प्रस्पष्टद्वेदन त्रयेण यथाक्रमं तत्कीर्तनं श्रोतापि हरिहरौ
यद्वा मधुकैटभौ द्वौ एको महिषः शुंभनिशुंभौ द्वौ
इति तेषां वधाः अष्टमी चतुर्दशी नवमीष्वस्तित्रोपि पहै

ह्यप॥ तत्वेन पीडितिभविष्यंतीति यथाक्रमेणकीर्त्तनप्रसंगदोषः॥
एकमनन्यवृत्ति चेतो येषां ते तथोक्ताः॥ भक्तिरनन्यश
रणं तथाश्रयणं॥ तथा महातः आसतनः अवलारायस्याः
सामहात्मावकुवलारावकुलरावतारावा तस्याःश्राव
महात्म्यं श्रुतमं श्रेष्ठतमं दुःखफलकं कर्मदुष्कृतं असमंतात्
पचंते गच्छत्यपि दुःखानि यापदः दुःस्थितयुः दरिद्रस्य
आकिंचनत्वस्यभावः॥ दारिद्र्यं निर्धनत्वं॥ इष्टैः सहवि
२ योजनं वियोगः विश्लेषः॥८॥ ॥शत्रुतो नभयं तस्य द २
स्युतो वा नराजतः॥ नशस्त्रानलतोयौघात्कदाचित्सं
भविष्यति॥८॥ ॥तस्यार्थं तस्योपलि बाले छं कदाचिद
पि शत्रुतो नभयं नसंभविष्यति॥ दस्युतः तस्करतो पि वा॥
नराजतो पि नृपात्॥ नशस्त्रतः नआयुधतः नअनल
तः नअग्नितः तत्तोयौघात् नजलप्रवाहात् नसंभविष्य
तीतिअनेनसर्वसंबध्यते॥ शत्रुतइति अपादानेवा॥ ही
यरुहानि तिपंचम्यास्तसिः एवंदस्युतइत्यादिषुशास्त्रेष्व
अनेकश्लोकतायोपचः॥ सर्वदिंवो विभाषेकवद्वीत॥उ
तस्मान्मयैतन्माहात्म्यं पठितव्यं समाहितैः॥ श्रोतव्यं

श्रीगणेशाय नमः॥ ॥श्रीदेव्युवाच॥ ॥यद्यपि प्रागपि देवान्
देव्योवाचतत्तथाप्यध्यायादौ देवीवचनस्य प्राधान्यं ध्वनयि
तुं देवीमहात्म्याध्ययनश्रवणादिफलश्रुतिप्रामाण्यं चैद
र्शयितुं देव्यैव भगवती स्वयमुचितां वाचं देवान्प्रत्युवाच॥
एभिस्स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः॥ तस्याहं
सकलां बाधां नाशयिष्याम्यसंशयं॥१॥ ॥यः पुरुषः
समाहितः भक्तिश्रद्धान्वितो भूत्वा एभिः प्रागुक्तैः स्तवैः स्तं
त्रैः च पुनः पुनश्च नित्यं अविकल्पितं यथाभवति तथा श
श्वद्वा मां देवीं जगज्जननीं स्तोष्यते तस्य पुंसः सकलां बा
धां नाशयिष्यामि अहं देवी॥ अस्मिन्नर्थे असंशयं संशयाभा
वः॥ अर्थाभावेऽव्ययीभावः॥ यद्वा असंशयं यथास्यात्तथा
सकलं पीडां नाशयिष्यामीति अहं॥ स्तोष्यते॥ क्रियाफले
कर्त्तृगे तेरुहादात्मनेपदं॥ एभिरिति प्रत्यक्ते हिंदुः
स्थिरकर्तैश्च॥ हंसः सूर्यः परमात्मा॥ आत्मावादिसो
ब्रह्मेतिश्रुतेः हं सस्यकर्तृ हं सकलां बाधां तेप्राणि

कृयात्॥ अशेषान् समग्रान् उपसर्गान् उपद्रवान् शमयेत् दूरी
कुर्यात्॥ न केवलमनुपसर्गानेव शमयेत्॥ अपि तु तथा त
द्धेतुं तेषां पुंसां त्रिविधं त्रिःप्रकारं उत्पातं अशुभं वा
सूचयेत् सुसितं॥ दुःखं दुःकमोगुणमसूचकं तु च शमयेत्॥
त्रिविधं आध्यात्मिकं शरीरोत्पन्नं रोगद्वेषादिकं व्याध्यादि
कं च॥ अधिभौतिकं भूतप्रेतादिजनितं भयपत्रमादिकं अ
धिदैविकं देवकृतं वज्रपातादिकं दारिद्र्यादिकं च यद्वा
महत्सु वः स्वः सम्भवमुत्पातत्रयं शमयेत्॥ भूलौकायं स्मृ
३ तौ भूमिरन्तरिक्षं भुवः स्मृतं॥ स्वःशब्देन तथा स्वर्गलोके ३
लोक्यं लीदृं स्मृतं॥ भूकंपादिभौमं उत्पातं शमयेत्॥ अं
तरिक्षजनितमुत्पातं नक्षत्रगजैनं शमयेत्॥ स्वर्लोकजनि
तमुत्पातमस्तकेतुदर्शनोद्भूपतनं शमयेत्॥ महामारीस
मुद्भवान् निति॥ महद्॥ महती मारी महामारी तस्याः समुद्भूता
न् शमयेत्॥५॥ ॥ यत्रैतत् पठ्यते सम्यक् दुं॰ तत्र आयतने
मम॥ सदा न तद्विमोक्ष्यामि सानिध्यं तत्र मे स्थितं॥
अत्र देव्याः आयतने गृहे शक्तिप्रतिमादिसंनिधौ मद्

पदेवेतत् हृदये कृत्वेजात्कृत्तं चरित्रप्रयोगेन महात्म्यं नित्यं प्रतिपादितं
सम्यक् पठ्यते॰ पठतस्सु च्युद् पठ्यते भक्तितः शुचिः तत्र आयतने
गृहे॥ सदा सर्वदा न विमोक्ष्यामि न त्यक्ष्यामि॥ तत्र गृहे स्वस्तु
मे देव्याः सान्निध्यं संनिधाने समवस्थानं स्थितं स्थिति
मद्भवेत्॥ स्वास्थ्यार्थि प्रथमः॥६॥ ॥ बलिप्रदाने पूजायामग्नि
कार्ये महोत्सवे॥ सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च॥
बलिप्रदाने पूजायां अग्निकार्ये महोत्सवे च सर्वं समस्तमेतत्
मम देव्याश्चरित्रं मुच्चार्यं अवश्यं पठनीयं॥ केन लोक्यते॥ श्रा
व्यं अवश्यं श्राव्यं श्रोतव्यं च सर्वं॥ उरावश्यकेणपठेत्॥ यद्वा एवं
तादृकोयत्॥ श्राव्यं श्रावयितव्यं सर्वं जपनीयं॥ एकैकेनाजप
न तुष्टिरद्भूतोऽस्मात्॥ महान् वम्यादोष्णगभैष महिषमहाप
शुभिर्बलिदाने॥ देवलोकेसे न पशुसमर्पणं॥ ददाते बुद्॥ यद्वादि
अवरखंडने॥ पूजा पुष्पोपहारदीपादिसमर्पणं॥ यद्वा अलंकरण
वस्त्रस्रक्चंदनमाहेनच्यत्र चामरादिभिः कुमारीसुवासिनी
समर्चने पूजा॥ अग्निकार्यं कालु तेमासि॥ अग्निज्वालं जन
नं॥ यद्वा देवीमहात्म्यकृते पमाष्णानेनेपुरश्चरणे होम
हित्वा होमाग्निकार्यं॥ पुत्रजन्मयज्ञलक्षणो महोत्सवः॥

सप्त०

यद्वा चैत्रे वसंतोत्सवः वैशाखे वारुणपुष्पप्रचारोत्सवः ज्येष्ठे ज
लक्रीडोत्सवः आषाढे इंद्रध्वजोत्थानोत्सवः श्रावणे डोलाडो
लनोत्सवः भाद्रपदे इंद्रमणिधनुरर्चनोत्सवः अश्वयुजि
शारदोत्सवः कार्तिके दीपोत्सवः मार्गशीर्षे मनुष्योत्सवः
माघे नरोत्सवः फाल्गुने गंधर्वोत्सवः ॥ एतेषु सर्वेषु देवीच
रितं पठनीयमिति भावः ॥ यथा श्रवणीयं च यद्वा महोत्सवः
सर्वश्रुतिपारायणं यद्वा वदेतत् कर्त्तरी क्विप् ॥ वदति वेष्टे ४
वतामिष्टं देवी प्रणवः महानुत्सव मंत्रोप्यास्ति समहोत्सव
४ स चासौ सर्वश्चेति महोत्सवो मंत्रदीक्षाख्यो यज्ञः तस्मिन्
यद्वा ॥ उत्सवे कृते दिने ॥ उद्धव मुते ॥ श्रियां भवे संपदा
दिष्यः शुधौ वर्त्मन्यः ॥ उदः सर्वो दीक्षावतः उत्सवः सुधो
त्सवः महानुत्सवः सुधोत्सवो यस्मिन् मनुग्रहे स म
होत्सवः तस्मिन् ॥ ७ ॥ ॥ जानता जानता वापि बलिपू
जां तथा कृतां ॥ प्रतिक्षिप्याम्यहं प्रीत्या वन्हिकोन्नं तथा
कृतं ॥ ८ ॥ ॥ तथा ज्ञानेन प्रकारेण यो मत्स्तोत्रं पकार्यदु
ति कर्त्तव्यता गुरूपदिष्टेष्टं ज्ञानता बोधेन स्यान्नयी संको

च सदा भक्त्या परं स्वस्त्ययनं महत् ॥ ४ ॥ ॥ तस्मात् वांछितार्थ
साधनत्वात् हेतुतः समाहितैः संबंधानैः कुलेयत्नेः पुंभिः
परं प्रकृष्टं कुलैश्वर्ये महत् पूजनीयं स्वस्त्ययनं येतेत्सस्त
कं रोगयने वर्त्मनि हि कामुष्मिन् फलसाधने स्मरणे ममदेव्याः
एतन्माहात्म्यं माहात्म्यप्रतिपादनग्रंथसंदर्भरूपं भक्त्या जे
नेन पठितव्यं सदैव वार्च्यासनीयं ॥ सदा सर्वदैव भक्त्या समा
हितैः श्रोतव्यं च ॥ श्रवणीयं च ॥ एतन्माहात्म्यमिति बहुव्री
हिरयं ॥ ग्रंथवृदस्सोन्यपदार्थः ॥ शब्दस्यैवपठनेन शरण
योग्यत्वेन विषयभावात् ॥ एतदिति पुंस्त्वकपदत्वेन माहात्म्य
प्रतिपाद्यत्वेनयत्रास्ति ग्रंथे तद्दूपचारात् ममचरितं
येन अत्र अप्यर्थात् माहात्म्यशब्देनोच्यते इति ॥ पठनश्रव
णयोः फलं दर्शयति ॥ स्वस्त्यर्थी क्षेमपुण्येषु मंगले धातोर्यं
स्मृतः ॥ स्वस्त्ययनं क्षेमपुण्यावाप्तिकृत्सिध्यर्थः ॥ ५ ॥
उपसर्गानशेषांश्च महामारीसमुद्भवान् ॥ तथा त्रिविधमु
त्पातं माहात्म्यं शमयेन्मम ॥ ५ ॥ ममदेव्याः माहात्म्यं
तत्प्रयोजकं भक्तितः शृण्वतां पुंसां च महामारीसमु

सप्त०

चरित्रत्रयं लक्षणं संपूर्णं भक्तिसमन्वितः मनुष्यः पाठिष्यति श्र
यथायोगं मत्प्रसादेन सर्वबाधाविनिर्मुक्तः धनधान्य
समन्वितः भविष्यति संशयो नात्र कर्तव्यः ॥ वर्षेण निर्वृता
बाधिकी सांवत्सरी किं पुनः आकालोत्तेन निवर्त्तिमिति ठक्कु ॥ स्त्री
यां ङ॰ पू ॥ सा च बाधिधेति पाठे तु आसमंतात् बाधा आबाधा
महती पीडा तया निर्मुक्तः ॥ ततो वासनया कालं च महादुर्जातस्य
यो नैतिशास्त्रप्रामाण्यकीर्त्तनमेतत् ॥ ५॥ ॥ श्रुत्वा मम
तन्माहात्म्यं तथा चोत्पत्तीः पृथक्शुभाः ॥ पराक्रमं च युद्धे
षु जायते निर्भयः पुमान् ॥ ८॥ ॥ एतत्त्रिविधं चरित
त्रयलक्षणं मम देव्याः महात्म्यं महान्तं प्रभावं भक्तिः
श्रुत्वा गुरुलोग्रहीत्वा यावद् द्वादश पर्यन्तं अधिकं च पुमा
न् ॥ सु युद्धेषु निर्भयो जायते तथा मम देव्याः शुभाः जग
त्पुण्यकरीः पृथक् उत्पत्तीः ब्रह्माणयादि महाशक्तिरूप प्रा
दुर्भवितीः श्रुत्वा तथा कलयन् पुमान् युद्धेषु निर्भ
यो जायते ॥ तथा मम देव्याः पराक्रमं शुभवीरकर्माणि च

श्रुत्वा युद्धेषु निर्भयो जायते ॥ यद्वा युद्धेषु मम पराक्रमो श्रुत्वा
निर्भयो जायते पुमान् ॥ तथा चोत्पत्तयः शुभा इति पाठे तु ॥ ...
या बहु च भवति शेषः प्रसंगे जसः प्रयोगः छांदसः शुद्धिक्ष
तबहुवचनमर्थे तेन अपि बहु कारणेषु निर्भयत्वार्थः ॥ युति
श्रुणे ॥ भ्रत्यादिः संपदादिभ्यो वृत्तिः स्त्रियां क्तिन् पू ॥ य च नेषु त
क्षिणं पापस्तेषु कर्कः लस्यो युतिः यद्वा सूत्रं च धन जयादिः यद्वा
नंसु च दर्वं धनं तस्यो युति ॥ उ हं गतौ ॥ ज्ञाहे स्यादिः संपदादि
त्वात् क्तिन् पू ॥ हानं हा निरयादि गतिः तस्यां युतिः हात्वाः लोकि
विषये निर्भयः पुमान् जायते ॥ अथ युद्धेषु स्त्रामेषु च नि
र्भयो जायते ॥ निर्भयं निचयोः ॥ शत्रुक्षयो मे पराक्र
मो ॥ १०॥ रिपवः संक्षयं यांति कल्याणं चोपपद्यते ॥ नंदते च
कुलं पुंसां मम माहात्म्यं शृण्वतां ॥ ११॥ ॥ भक्तितः ...
देव्याः महात्म्यं शृण्वतां आकर्णयमानां नो पुंसां ...
पवः शत्रवः संक्षयं नाशं यांति कल्याणं च मंगलं च उपप
द्यते कल्याणं कर्तु ॥ प्रत्यागतोदिवार्द्धि उपसंपद्यते
उपजायते इति पाठे तु उत्तरोत्तरवृद्धिः ॥ कुलं गोत्रं

सप्त-

श० १२

नंदते ॥ टुनदि समृद्धौ परस्मैपदी कर्त्तरि कर्मव्यतिहारे त्वात्मने
पदं ॥ यद्वाण्यंतात्कर्मकर्त्तरि यगात्मनेपदं च ॥ नंदते कुलं पुंसा
मिति तु पाठः ॥ नंदते च कुलं पुंसामिति पाठे तु भावे यगात्मने
पदं च ॥ स्वेत तिर्णि त्रिजनेन कुलान्यभिजनान्वयो ॥ कुलं
गृहं च वंशो जनपदे निरा हिणि तु त्रिषु ॥ ११ ॥ ॥ शांतिकर्म
६ णि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं ६
शृणुयान्मम ॥ १२ ॥ ॥ उत्पादिता सूचिता पदार्थानां सर्वत्र
सर्वस्मिन् शांतिकर्मणि ॥ तथा दुःस्वप्नदर्शने दुष्टफलकस्व
प्नदर्शने ॥ उग्रासु असत्निष्टफलासु ग्रहकृतासु पीडासु
च ममदेव्याः माहात्म्यं शृणुयात्पुरुषः ॥ तच्छ्रवणादेव
तस्यापि पुंसः सर्वबाधोपशांतिर्भवति ॥ स वै पाप्मनि स
द्धि भवेति भावः ॥ १२ ॥ ॥ उपसर्गाः शमं यांति ग्रहपीडाश्च
दारुणाः ॥ दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमभिजायते ॥ १३
दृष्टेर्ष्टं किं पुनर्यत्नतः कि ॥ ममदेव्याः माहात्म्यश्रवणादुपसर्ग
र्गा इति बाधाः आत्मिदैवकादयः शमं यांति ॥ यद्वा उपसर्ग

५ प्रतिमाप्रतिष्ठा स्त्रस्यजालिपः कश्चित् ॥ अर्थो आदिलोपश्च ॥ न तस्त्वद्दा परतीति
आवरणे कृष्णा ॥ सेना पत्ते तत्र धातु लोप ॥

वनीयोपसर्गोपसंहति क्रियाकर्मजानतां वा प्यजनेनता वापिभ
क्तिनता पुंसा कृतं बलिं पशुप्रदानं तथा नेन कृतां पूजां च तथा
नेन कृतं वह्निहोमं वह्नौ त्रिमध्वादिहोमप्रेक्षणं च प्रतिमा अ
हं देवी प्रतिक्षिप्यामि प्रतिगृहीष्यामि स्वीकरिष्यामि ॥ यग
तश्चित्तं प्रतिष्ठं स्यात् ॥ एतदूर्द्ध्वणं प्रतीक्षायालोर्विष्यति का
ठे लुट् प्रत्ययः पिपू ॥ इडागमः ॥ अंतलोपः ॥ इणुको आदेशा
प्रत्ययोः वत्वं ॥ प्रतीक्षिप्यामिति पाठे ॥ इक्षदर्शने ॥ अनुदात्तेल
निबंधनमात्मनेपदविधानमनित्यमिति चक्षिडंगः ॥ ङि करणं
ज्ञापकमित्युक्तत्वात् ॥ परस्मैपदं ॥ बलिपूजाभिषेके कपदत्वपाठे
तु बलिनापशुविशंसनेन सह कृता पूजा बलिपूजा बलिरु
पा पूजा सम्करः बलिपूजा तां ॥ १० ॥ ॥ शरत्काले महापूजा
क्रियते या च वार्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्
न्वितः ॥ ११ ॥ ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ॥ म
नुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १२ ॥ ॥ अदः श्लोकद्व
यस्यान्वयं बोद्धव्यं ॥ या च शरत्काले वार्षिकी महापूजा शर
त्काले क्रियते ॥ तस्यां विषये ममदेव्याः ॥ एतन्माहात्म्यं द

सप्त०

६०१२

शुक्लं धूपस्वं पिरूपिरवं पिपिशालश्चो षिलाका त्रो षि प्रभृ
तयश्च ते रभिभूता नामंकृता नां तिरस्कृता नां बालानां वो
तिकारकं उपद्रवशमनकारणं मम मेध्याः महास्मश्रवणं उत्तमं
मांश्रयणीयं ।। किंच नृणामेव कार्यकारिणी कृथंचिसर स्तुतो
श्चारन प्रयोगतः संघातभेदेन्नि त्वत्वभेदप्रसक्तेरति न मम
हास्मश्रवणमेवोत्तमं मैत्रीकरणं मित्रहेकरणसाधनं चे
ष्टितमं मम महास्मश्रवणमेव भवति ।। नान्यदिति भावः ।। ९४ ।। ५
दुर्बलानामवीर्याणां बलहानिकरं परं ।। रक्षो भूतपिशाचानां
पठनादेव नाशनं ।।९५।। दुर्वृत्तानां च ये येषां ते दुष्टचाराः
दुर्वृत्ताः प्राणिनः तेषां नैष्ठुर्याणां परमंश्रेष्ठं बलहानिक
रं परं बलविनाशहेतुरूपं मम महास्मपठनं ।। हन्तो हेतो
ट ।। किंच रक्षसां मायाविनां लंकादिवासिनां हेतानां बाल
ग्रहादीनां पिशाचानां पिशिताशिनां तामसानां च पीडाक
कानां अहत्रपरूपाणां मम महास्मस्य पठनादेव नाशनं
अदृशो भवती हृती करणं नावते रसि कुलीति भावः ।।९५ ।।

सर्वमभैतन्मस्मरणं मम सन्निधिकारकं ।।९६।। सर्वं केवलं एतत्तु
आदिनिष्ठा वरसानं उक्तपणं मम देव्याः सान्निध्यस्य सन्निधी
भावस्य कारकं नैकट्यकारणं ।। मम सन्निधिकारकं इति पा
ठे पिसं निधानं स्वं निधिरिति व्याख्या श्रेयणात् सर्वार्थः
यद्वा सतः सन्निधिः महानिधिः महापद्मादिः तस्यैकं कारकं प्रा
प्तं पठ्यमानं स्यादिति भावः ।।९६।। ।।पत्र पुष्पार्घ्य धूपैश्च गंध
दीपैस्तथोत्तमैः ।। विप्राणां भोजनैर्होमैः प्रदक्षिणायैरुत्तमैः ।।
अन्नैश्चापि विविधैर्भोगैः प्रदानैर्वस्त्रेण यः ।। प्रीतिर्मे क्रियते
सा तस्मिन् सकृदुच्चरिते कृते ।।९७।। ।।श्लोको कद्दयमिदमेकान्व
येवेदितव्यं ।। पुष्पैः फलैः प्रकारैः वस्त्रेण यत् क्रियते ।। मे
मयुं देव्याः प्रीतिः सा अस्मिन् मम महास्मरणस्य सकृदेकवारमेव उ
च्चरिते पठिते वा श्रुते नाभक्ति भक्तिः सर्वकामदुघा प्राप्नि
तैवस्यात् ।। पत्रैश्च पुष्पादिभिश्च आगमेषु महिमा
तं गायत्र्यादिभिः वर्णादिभिर्नेहा पञ्चभिश्च नरैः पुष्पैः सुमति
संपृष्टनैवेद्यैः हजोमैः मधुघृतादिभिः धूपैः कर्पूरागरुस्य

ग मर्दाङ्गितैः बहुरूपादिभिः नानाकृतिगंधैः चराचरात्मके श्री
वासादिधूपैः प्रपूज्यते ॥ तैः गंधैः गंधसारघनसाररक्तचं
दनमृगमदकंकोलकंकोलरागरुंकुमादिभिर्दीपैः कर्पूर
घृतादिप्रज्वलितैः माणिक्यमहौषधिरूपकल्पितैः सूर्यमहौषधिः
नैवेद्यहोमैः परमान्नपरघोतिभिक्षोपकल्पितैः राधसैः अ
तएवडिभैः उक्तैः अभ्युत्तमैः तथा उत्तमैर्विविधैः बिप्राणां भ
तैव्यैर्भोजनैः पंडुलोपचैर्भोज्यैरन्नादिभिः कल्पितैः तथा वि
विधैर्होमैः तथाजोऽनिर्वाविद्यानिर्वाण्प्रतिदिनं विविधैः प्रे
क्षणीयैर्दर्शनीयैर्नृत्यगीतवाद्यैः तथा अन्यैश्च विविधैर्भो
गैः तथा दानैः मनोऽभिलषितैर्विभूष्ये चित्तरैः चराचरात्म च
स्त्राखंकारपूजादिभिः साधनैः वत्सरेण संवत्सरेण या
विप्रीतिः सकृत्कामं दुर्लभं क्रियते सा स्मिन्नन्न प्राकृ
प्रपंचितसममहात्म्यस्य छंदके वा भक्तो वा प्रतिपठिते श्रु
ते च वा सा व्याप्तिर्वृष्टवामनेस्तर्थं ॥ सकृदुच्चरिते श्रुते
एकवारं ॥ यत्र वास्तकृत्सर्वदा ॥ महासहस्रसहस्रिकैः पुंस्त्रीः

गैः उत्पातः प्रकृतविरुद्धबुद्धयः लाः शांतिं प्रगच्छंति यांति ॥ अज
यंकृच्छ्रमुत्पातः उपसर्गः स्वनामं त्रयं ॥ तथा दारुणाः भयानकाः
ग्रहपीडाः आदिपदग्रहदैत्याः वाधासर्वशांतिं यांति यांति ॥
तत्र वचनकृष्टिहेतुः स्वप्नदुःस्वप्नौ यस्मिन्कृष्टके दुःस्व
प्नं कृत्यं ॥ सुस्वप्नं योगभिर्नः स्वप्नाय विप्राय फलेत तत्सुस्वप्नं
फलं ॥ उपजायते स्वप्ने दुःस्वप्नस्य विरते यत दुष्टफलमुपल्प्त
तत्सुस्वप्नस्य चित तमेव फलं संपद्यते इति भावः ॥ अत्र वचने अ
पि फलाधिक्यमिति ज्ञापितं देवता प्रभाव ॥ दुःस्वप्नसुस्वप्नयो
रुभयोरपि स्वप्नत्वं पुल्लिंगत्वपि बहुव्रीहौ फलेन वपदार्थ विवक्षते ॥
नपुंसकत्व कुतो पपत्तिः ॥ अद्वचो दोस्वप्नशब्दो नास्ति ॥ अ
न्यथा स्वप्नपुंस्त्वकृता पपद्यते ॥ दुःस्वप्नं च कृष्टिहेतुः सुस्वप्न
मुपजायते ॥ इदं पिपाठे नास्ति वाक्ये ॥ ॥ बालग्रहा
भिभूतानां बालानां शांतिकारकं ॥ संघाते भेदे च नृणां
मैत्रीकरणमुत्तमं ॥ ॥ बालग्रहाभिभूतानां सिद्ध
नां ग्रहपीडकाः हिंसाः द्रताः रसनाद्यः रसनादिको
सिनो दृष्टिबंधं दृष्टिगतबुद्ध्यैर्विचेष्टितानि बंधि

ग्रहाभिभूतानां स्तुतस्य कृपापुः प्रयच्छति पितेतिवत्॥ चतुर्थ्ये भूया
केषष्ठ्येव वा॥१८॥ ॥रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं
मम॥१९॥ ॥मम देव्याः जन्मनां उत्पत्तीनां ब्रह्मण्यादि महा
लक्ष्म्यादिरूपतया प्रादुर्भावानां अवताराणां कीर्तनं कथनं कर्तृ
भूतेभ्यः हिंस्रेभ्यः भूतप्रेतपिशाचशत्रुसिंहव्याघ्रादि ग्रहादि
भ्यः भक्तानां रक्षां मनपायं करोति॥ जन्मिनामिति पाठे तु
मम देव्याः कीर्तनं नामग्रहणं कर्तृ जन्मिनां जन्मभाजां म
नुजानां पुंसां भूतेभ्यः रक्षां करोति पालनं विदधाति यथा॥१९॥
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणं॥ तस्मिन् श्रुते वैरिकृ
तं भयं पुंसां न जायते॥२०॥ ॥मेदं आश्चरितं शस्त्रप्रयो
गलक्षणं संग्रामकौशलमभूत्॥ तस्मिन् श्रुते सती त
त् श्रुतवतां पुंसां युद्धेषु तत्कालान्यत्र च वैरिकृतं शत्रुनि
र्मितं भयं न जायते॥ न उत्पद्यते॥ निबर्हयति विनाशयति
निबर्हणं॥ नंद्यादिभ्यो ल्युः॥ दुष्टानां दैत्यानां निबर्हणं दु
ष्टदैत्यनिबर्हणं चरितं चरित्रं दुष्टदैत्यनाशकरं॥२०॥

युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः॥ ब्रह्मणा च कृता
स्ताश्च प्रयच्छन्ति शुभां मतिं॥२१॥ ॥हे सुमेधसो मार्कंडेयेन च तत
द्वै ब्रह्मर्षिभिः मद्देव्यां विषये याश्च स्तुतयः कृताः त
थापि ममलावर्ते मोहगर्ते निपातितत्वात्॥ महामायाप्रभावेन सं
सारस्थितिकारिणः इत्याद्याः ता अपि शुभां मतिं प्रयच्छन्ति पठ्यमा
नाः॥ पठ्यन्ते पुंभ्यः याश्च मयि विषये ब्रह्मणा च मधुकैट
भभीतेन कृताः स्तुतयः विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारका
रिणीं॥ स्तौमि निद्रां भगवतीं विष्णोरतुलतेजसः इत्याद्याः॥ ता
अपि शुभां गतिं प्रयच्छन्ति॥ पठ्यमानाः पठ्यन्ते॥ हे देवाः मयि
देव्यां विषये याश्च स्तुतयः युष्माभिः कृताः देव्या यया तत
मिदं जगदात्मशक्त्या इत्याद्याः॥ अथ च युष्माभिरेव स्तुतयः
कृताः नमो देव्यै महादेव्यै इत्याद्याः॥ अथ च युष्माभिरेव कृ
ताः॥ देवि प्रपन्नार्तिहरे प्रसीद इत्यादि त्रिविधाश्च स्तुतयः शु
भां गतिं प्रयच्छन्ति शुभां मतिं प्रयच्छन्ति पठ्यमाना पठ्यन्ते पुं
भ्यः॥२१॥ ॥अरण्ये प्रांतरे वापि दावाग्निपरिवारितः॥ दस्यु
भिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः॥ सिंहव्याघ्रानुयातो

वाचने वा वनहस्तिभिः ॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बंधगतोपि वा ॥
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ पतत्सु चापि शस्त्रे
षु संग्रामे भृशदारुणे ॥ सर्वाबाधासु घोरासु वेदनाभ्यर्दितो
पि वा ॥ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ २२ ॥ एकान्वय
मिदं श्लोकचतुष्टयं ॥ अरण्ये विपिने वापि वर्तमानः मम देव्याः
एतत्तु चरितं चरित्रं कर्म स्मरन्पुरुषः ॥ संकटात् दुःखप्रदस्थला
त्तु सकाशाद्धेतुभ्यः स्वयमेव संकटं नानुसंबाध्य ॥ कर्मकर्तरि
मुचेर्लिङ् ॥ तथा प्रांतरे चापि योजनमध्ये मार्गे ॥ प्रांतरं दूरशून्यो
१० ध्वा ॥ तथा दावाग्निपरिवारितः समावृतोपि वा ॥ दवो दावो वनेचनो न १०
क्तो ॥ तथा दस्युभिस्तस्करैर्वृतः वेष्टितो वा ॥ तथा शून्ये निर्जनप्र
देशे शत्रुभिर्गृहीतो वा ॥ तथा सिंहव्याघ्रानुयातो वा ॥ सिंहेन
या व्याघ्रेण वा अनुगतो पद्रुतः ॥ तथा क्रुद्धेन राज्ञा वध्योयमिति त
वध्योहि यमिति आज्ञप्तः क्रुद्धेन राज्ञाज्ञापितो वा ॥ तथा बंधगतो वा
न बद्धोपि वा ॥ तथा वातेनाघूर्णितः ॥ व्याकुलितः बाधितो
पास्तो वा ॥ तथा महार्णवे समुद्रे पोते समुद्रमध्ये नौकाविशेषे
येन सांयात्रिकाः पोतवणिजः कथ्यते ॥ तत्रावस्थितोपि वा ॥

पेच नरश्चैः समाष्टैरेकद्वस्त्रैः चतुरैरेकेन वोच्चरिते श्रुते चैव स
र्वदः ॥ सहार्थे चेकवारे च सदार्थे चाव्ययं सकृत् ॥ सकृत्तु च
रिते श्रुते इति पाठे तु श्रुतत्राद्दतः श्रवणस्य प्राधान्यं ॥ स्तु
चरिते देव्याः शोभने त्रैलोक्यवर्तिनेच रिते च यत्र सकृदेव
श्रुते तस्याः प्रीतिः सर्वार्थसाधनीभवति ॥ १९ ॥ केरभस्यैतिभा
वः ॥ प्रेक्षणीयैरहर्निशं भक्ति पाठे तु कल्प्य दाहामंत्रे हुतजलो
क्षणेन संस्कृतहत छागादि पशुर्बलिं कारितः ॥ तत्र पशुपु
ष्पार्घधूपैरिति पशुग्रहणे न पौनरुक्त्यप्रसंगेन ॥ ततः इत्थं
चार्थे नैव कृत्वा ॥ उत्सवे च ते ॥ प्रशस्तं च यदि तादृशे केर वं
छिन्न धिया यथा राजाभिषेके वे इति ॥ २० ॥ ॥ श्रुतं हरति पापानि
तथारोग्यं प्रयच्छति ॥ २१ ॥ ॥ मम देव्याः महात्म्यस्य श्रुतं
श्रवणं कर्तृ पापानि हरत्यपनयति ॥ नपुंसके भावे क्तः ॥
तथा योगक्षेमं वत्सरात्स्यहीनं जनितवते ॥ प्राक्शान्मम देव्याः
महात्म्यं कर्तृ श्रुतं सत् पापानि हरति भजतां ॥ तथा भ
जतां आरोग्यं प्रयच्छति आरोगताजनयति ॥ दानप्रति

सप्त॰ मेधाः सुरथं वा च मुचितामृचे॥३ इत्युक्ता सा भगवती चंडिका
चंडविक्रमा॥ पश्यतामेव देवानां तत्रैवांतरधीयत॥ इत्यु
क्त्वा इत्युक्त्वा व्याहृत्य सा भगवती चंडविक्रमा प्रगल्भप
राक्रमा चंडिका देवी पश्यतामेव देवानां तत्रैव सती तान्
देवान्नायते रक्षतीति तत्र तान् पालयंती सत्येव स्वयमंतर
धीयत॥ अतोऽनुपलब्धिः॥ यद्वा सा देवी पश्यतां देवानामेव
तत्रैव देवशरीरेषु व अंतरधीयत स्वयमेव देवशरीरेषु
११ वांतर्धीयते स्म॥ पश्यतामेवेत्यादरे षष्ठी॥ पद्मं ११
यथा जननी सुतानामाजलोनादृत्यलोकानादृत्य तथाम
पि सर्वजननी देवदर्शनतोऽन्तर्धीयत स्वमिवेति भावः॥ य
२८॥ ॥तेऽपि देवा निरातंकाः स्वाधिकारान्यथापुरा॥ यज्ञ
भागभुजः सर्वे चक्रुर्विनिहतारयः॥२९॥ ॥अथ देवा
अपि सर्वे देव्या विनिहतारयः विनाशितशत्रवः अत एव
यथा पुरा सर्वस्मिन् देवकाल इव निरातंकाः [illegible]
वनतो निर्भयाः यज्ञभागभुजः यज्ञभागानां भुंजानाः स्वा

तः स्वाधिकारान्यथापुरा पूर्ववत् शुंभनिशुंभा दुष्टयलः आणीव
स्यान्यपाप्मा चक्रुः इत्यन्वयः॥२९॥ ॥ देव्या हते दैत्याऽतिह
ते शुंभे देवरिपौ युधि॥ जगद्विध्वंसिनि तस्मिन् महोग्रे तुल
विक्रमे॥३०॥ ॥ निशुंभे च महावीर्ये शेषाः पातालमाययुः॥३१॥
शुंभे देव्या लक्षितः जगद्विध्वंसिनि त्रैलोक्यकंटके न
च महोग्रे अतिरौद्रे अतुल्यविक्रमे अनुपमपराक्रमे देवरिपौ
समरे च शुंभे महावीर्ये अतिसैन्ये निशुंभे च निहते सति शेषाः
अवशिष्टाः दैत्याः पातालमाययुः॥ बलिसद्म प्राप्ता वि
[illegible]॥ चरावृत्य [illegible] इति विक्रमपण्यं चकाप तदेव दि पोतु
[illegible]॥ विक्रमस्तु तिरस्कृता॥ वीर्यं बलं प्रभाव [illegible]
पत यस्मिन् तत् पातालं॥३१॥ ॥एवं भगवती देवी सा नित्यापि
पुनः पुनः॥ संभूय कुरुते भूप जगतः परिपालनं॥३२॥
सुमेधाः सुरथं संबोधयति॥ हे नृप एवं [illegible] सा
सा भगवती देवी नित्यापि भूत्वा अविनश्वरा [illegible]
सती पुनः पुनः संभूय आविर्भूय प्रादुर्भाविता [illegible]

गत: त्रैलोक्यस्य परिपालनं परिशीलो रक्षणं कुरुते ॥ सर्वेज्जन
नीतिपलसारा गण्यभास्वनि सेवेला जगन्मङ्गलिन्दिर्वानी
कार्यक्रम प्रार्थ्यमाना विर्भवति सा परदा ॥ उत्पत्तिं तु तदा खलो
कैसारिस्याप्यधिश्रीयते इति ॥ २० ॥ ॥ स ये तन्मोह्यते
विश्वं सैव विश्वं प्रसूयते ॥ सा याचिता च विज्ञानं तुष्टा
बुद्धिं प्रयच्छति ॥ २१ ॥ ॥ सैव देवी विश्वं कुलं प्रसूय स तेज
नयति ॥ प्रउत्पत्ति प्रवर्तते दिव्यादि ॥ तथैव देवी वोधे तुष्टा त
१२ धाए लोभं मोहयते ॥ लोहवेचितेषु दिव्यादि ॥ आविवेकमो ने
अं तेजाम्बवे क नमनातेसो हि तं क्रियते सदेवीभक्तैः या
तासती विज्ञानं विवेकरूपं ज्ञानं च प्रयच्छति ॥ सैव देवी
तुष्टा सती तपसा जनित संतोषा ऋद्धिं संपदं च महतीं प्र
यच्छति ददाति ॥ तुष्टा ऋद्धिं प्रयच्छति तु इति पाठे तु असंधि
तापनिर्देश: ॥ हेतुः ... इति तुष्टा इति भावे तस्य
अवस्थाने ... च स्यात् तुष्टे ऋद्धिं प्रयच्छति इति स्यात् ॥

यानुपात्ते शिरो गोपात: ॥ तथा भृशदारुणे अत्यर्थे भीषणे संग्रामे ॥
शस्त्रेष्वायुधेषु पतत्सु वापि ॥ अतिशयेन दारुणं भृशदारुणं
संग्रामस्तस्मिन् ॥ तथा सर्वबाधासु सर्वा: आसमन्तात् बाधा
योगा: तासु ॥ सर्वबाधासु इति पाठे सप्तम्यर्थो भवति ॥ अ
हरविप्रकर्षति ॥ घोरासु सर्वपीडासु वर्तमानो वा ॥ तथा वेद
नासु संततदु:खेषु अनुभवत्सु वर्तमानोऽतीव प्रपीडितो भ्यर्दि
त: पीडितोऽपि वा सर्वत्र तत्र ममदेव्याश्चरितं स्मरन् नर: संक
टात् दुरुत्तरदु:खात् मुच्येत स्मरणेनेति योजनीयं
ह अरण्यप्रान्तरे वापि मृत: ... कालः ... सिंहव्याघ्रानुयातो
वेति ... कश्चित् पठन्ति केचित् ॥ अत एव मम प्रभावात् सिंहाद्या इ
त्युपपन्नं भवति ॥ २८ ॥ ॥ मम प्रभावात् सिंहाद्या दस्यवो
वैरिणस्तथा । दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ २९ ॥
मम देव्या: प्रभावत: सामर्थ्यत: सिंहाद्या: तथा दस्यव:
तस्करा: तथा वैरिण: शत्रव: मम देव्या: चरितं च
रित्रं स्मरत: पुरुषात् सकाशात् दूरादेव दूरत एव
पलायन्ते दूरीभवन्तीति ॥ २९ ॥ ॥ ऋषिरुवाच ॥ स्तु

स्त्री महाकाली तया ॥ मारयति संहारयति मारः प्रजाक्षयः ॥ महां
श्चासौ मारश्च संहारकः महामारः कालाग्निरुद्रः तस्य स्त्री म
हामारी मारस्वरूपं यस्याः सा देवी महामारी स्वरूपा तया महामा
रीस्वरूपया ॥ यद्वा महत् उक्तं च उत्सवः ॥ महान् उत्सवो यस्य
आसो मैता मारयति नाशयति महामारी महाप्रलयानलज्वा
ला तस्या इव स्वरूपं यस्याः सा महामारी स्वरूपा तया ॥ मृ
त्युञ्जिका महामारी जगत्संहारकारिणी ॥ महामाया महानि
द्रा महाकाळी ति तामसी ॥ सैव कालानलज्वाला सैवाविद्या
१३ तमः प्रसूः ॥ सैव मोहप्रसूर्देहसृः सैव सर्वोपि देवता ॥ ब्रह्म १३
णो हिरण्यगर्भाख्यस्य कल्पादौ निर्गतिनः सृजति ब्रह्माण्ड लोके च म
तिनिः सृजति अस्मात् ॥ पोत इसंत ॥ पत्रीकारो हि हीनेन
२९ ॥ ॥ सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं
करोति भूतानां सैव काले सनातनी ॥ ३० ॥ ॥ आजो जन्मर
हिता सनातनी नित्या सैव शाश्वती देवी काले भूतानां नु
हीप्रलयसमये तमोगुणमयी सती महामारी ति कथ्यते
तथा काले उत्पत्तिकाले सैव भूतानां सर्गसमये सत्वगुण

प्रधाना सृष्टिर्भवति सृष्टिकारणभूता भवति तथा सैव देवी का
ले भूतानां परिपालनसमये रजोगुणप्रधाना स्थितिं करोति
सनातनी सदा भवी सनातनी ॥ न जायते अजा ॥ ३० ॥ ॥ भवका
ले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥ सैवाभावे तथालक्ष्मी
र्विनाशायोपजायते ॥ ३१ ॥ ॥ भवे काले देवी सान्निध्यका
ले नृणां गृहे सैव देवी लक्ष्मी वृद्धिप्रदा संपद्वृद्धिप्रदा लक्ष्म्याः
संपदः वृद्धिः उपचयः तत् प्रभावा भवति भेदात्मकः तथा सै
व देवी अभावे सान्निध्याभावे लक्ष्मी विनाशाय लक्ष्म्याः संप
दः विनाशाय अभावाय उपजायते ॥ संपदभावरूपा उप
जायते यत्र लक्ष्मी संपत् तत्र देव्याः सान्निध्यं यत्र चेतत्सा
य न्निध्यं तत्र संपदपि नेत्यन्वयव्यतिरेकौ वेदितव्यौ ॥ विसंदे
वी सान्निध्य कारणं तस्याश्चोपायं दर्शयति ॥ सुमेधाः ॥ ॥रु॥
स्तुता संपूजिता पुष्पैर्गन्धधूपादिभिस्तथा ॥ ददाति
वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभां ॥ ३२ ॥ ॥ हे नृप सा
देवी स्तुता वाद्यकैः पदैः संस्कृता संकीर्तिता च तथा पुष्पैः
संपूजिता च तथा गन्धैः कर्पूरचंदनमृगमदादिभिर्वि

१४०

छिस्सा॥ तस्मात्सृतैः ब्वे कुलिधेषु पिसा अतिद्रुह्यणा दृस्वालं
कालतो कृत्वा द्विजानां दितो भक्ति प्रण तोच सलीअप्रार्थि
ते वस्तु क्रियोर्यः चित्तं धनेपुत्रोऽन्य अयुरारोग्य मैश्वर्य च
चत्वारस्सचितं॥ धर्मे मतिं भोग तीज दृढत्वितयतु क्रं आयु
सावियापर त्वामुक्त ई तु भ्रतास्सना तनी॥ संसारबंधहे तु
श्चसैव सर्वेश्वरेश्वरी इति॥२२॥ इति श्रीमद्राजाधिराज
श्रीमत्तोमरान्वय श्रीमद्दुर्गेण मलश्रीरोत नु चक्रवर्ति वि
१४ रचितायां श्रीचंडिका माहात्म्य टीकायां समुद्ध्येयस्य वर्णय
स्वनिरूपण विध्युपलक्षितो देव्या राज्ञे मफल्या वाप्ति निरू　१४
पणं नाम द्वादशोऽध्याय॥१२॥ ॥श्रीजगदंबार्पणमस्तु

स्वद्. कुस्य इति वचत॥ सायाचिनाथेविद्ज्ञानमिति पाठे तु अ
र्थेषु विज्ञानमिति विग्रहः॥ एतत् प्रागप्यभाणि॥ तेनात्र वि
स्मयः कार्यो योगनिद्रा जगत्पतेः॥ महामाया हरेश्चैषा तया
संमोह्यते जगत्॥ ज्ञानिनामपि चेतांसि देवी भगवती हि सा॥
बलादाकृष्य मोहाय महामाया प्रयच्छति॥ तया विसृज्यते विश्वं
जगदेतच्चराचरं॥ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये॥
स्यादिंतये तस्यकं ब्रह्मांडमनुजेश्वर॥ महाकाली महाकाले
महामारीस्वरूपया॥२९॥ ॥सुरथं राजानं सुमेधाः संबोधयति॥
हे मनुजेश्वर हे सुरथ महामारी स्वरूपया तया महाकाल्या महा
तामस्या महादन्यात सकलं ब्रह्मांडं त्रैलोक्यगर्भकं स्वान्तं
व्याप्तं महाकाले प्रलयसमये॥ महांश्चासौ कालश्चेति म
हाकालः॥ अनिष्टः कालः अकालः असमयो निंदितः कालः
सर्वभूतानां संक्षयसमयत्वात्॥ यद्वा महांश्चासौ कालश्च म
हाकालः कालाग्निरुद्रः तस्मिन्नुपस्थिते महाकाले महा
प्रलयकाले संहारकाले समुपस्थिते सति महांश्चासौ
कालः कालाग्निरुद्रः संहारकाल महाकालः तस्मै

सि.स०

द्विष्णुमायया ॥२॥ ॥ भगवद्विष्णुमाययातयैवचंडिक
येचविद्याज्ञानंक्रियते उत्पद्यते परमात्मज्ञानसाधनं
देव्येवोपनिषद्रूपेतिभाव: ॥ विष्णोर्माया विष्णुमाया
भगवती विष्णुमाया भगवद्विष्णुमायातया । यद्वाभ
गवान् विष्णु: भगवद्विष्णु: तस्यमाया । तदुक्तं ।
साविद्यापरमामुक्तेर्हेतुभूतासनातनी ॥ गुणाश्रये
१ गुणमयेनारायणिनमोस्तुते ॥ ऐश्वर्यस्यसमग्रस्य १
धर्मस्ययशस: श्रिय: ॥ वैराग्यस्याथमोक्षस्य
षण्णांभगइतिस्मृति: ॥२॥ तथात्वमेषवैस्यश्र
तथैवान्येविवेकिन: ॥ मोहंतेमोहिताश्चैव
मोहमेष्यंतिचापरे ॥२॥ ॥ हे राजन् तया महा
मोहरूपयादेव्यात्वं विवेकी सन्नपिसंप्रतिमोहयसे ।

प्राक्मोहितोभू: भविष्यतिचकाले मोहमेष्यसिच । त
थैवएषवैस्यश्च समाधिनामितथैव मोहंते मोहितश्च
मोहमेष्यतिचतथैवतथैवयुवाभ्यामन्येपिविवेकि
न: पुमांस: अनधिगतशास्त्रा: संतोप्यपरेचतेन्यश्रा
न्येच सर्वेतथैवद्रष्टव्या: मोहंते मोहिताश्चमोहमेष्यंप्रा
प्स्य । संप्रियदुक्तं । तथापिममतावर्तेमोहगर्तेनिपाति
ता: । महामायाप्रभावेणसंसारस्थितिकारिणा । तन्नात्र
विस्मय: कार्योयोगनिद्राजगत्पते: । महामायाहरेश्चैषा
तयासंमोह्यतेजगत् ज्ञानिनामपिचेतांसिदेवीभग
वतीहिसा । बलादाकृष्यमोहायमहामायाप्रयच्छतिइ
ति ॥ प्राक्राजाभगवंतंत्वांमहर्षिंसुमिछाम्येकंवदस्व
तदितियद्रहस्यसमस्तपद्यंतदिदानीमृषिरुपदेष्टुमाह ॥ ।।

स॰स॰ तामुपेहि महाराज शरणं परमेश्वरीं ॥ आराधिता सैव नृ
णां भोगस्वर्गापवर्गदा ॥ ५॥ ॥ हे महाराज हे सुरथ तां
परमेश्वरीं देवीं शरणं रक्षित्रीं उपेहि । उप इहि उपेहि
आत्मने॰ उपगच्छ शरणं व्रज । सैव देवी भगवत्येव आ
राधिता तपसा॰ तोषिता सती नृणां पुंसां भोगस्वर्गा
पवर्गदा ततः अपवर्गदा मोक्षदा भवति । ज्ञानद
मोक्षदा भवति तपस एव मोक्षदा । ज्ञानादेव तु कै २
२ वल्यमिति सिद्धांतः संप्रदानत्वाभावात् रजकस्य
वस्त्रं ददातीतिवत् संबंधे षष्ठ्यपवर्जनमिति ।
उपपूर्व इण् गतौ । लोट्यपि ध्वे उप इति हि इहि
इति स्थिते । एत्येधत्यूठ्सु इति वृद्धिर्नेति द्वि
धावेन्नीत्यनुवर्तनात् तत आद्गुण एव बाधकाभा

श्रीगणेशाय नमः ॥ ऋषिरुवाच । सुमेधाः भगवान् ऋषिः सुरथंरा
जानं प्रति उवाच मुचे ॥ एतत्ते कथितं भूप देवीमाहात्म्यमुत्त
मं । एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥ १॥ हे भूप हे सु
रथ एतत् उत्तमं अनुत्तमं देव्याः माहात्म्यं श्रेष्ठतमं सर्वार्थ
साधनं सर्वकामधुक् ते तुभ्यं कथितं व्याहृतं मया सुमेधसा
महर्षिणा सा देवी भगवती एवंप्रभावा ईदृग्विधसामर्थ्या
वर्तते । सेतिका । यया देव्या सर्वजनन्या सर्वपोषिण्या सर्व
संहारिण्या इदं जगत् विश्वं धार्यते ध्रियते पाल्यते प्रत्य
वसीयते ॥ यथाकाला धृङ् अवस्थाने णिच् । कर्मणि यथा
स्मनेपदं च लट् ॥ क्रियावाचित्वमाख्यातुं मे कोत्रार्थः ॥
प्रयोगतोनुसर्तव्या अनेकार्था हि धातवः ॥ महात्मनो महा
मूर्त्तेर्देव्याः भावे कर्मणि वा ब्राह्मणादित्वात् प्रतिसम्बद्धिते टि
लोपे माहात्म्यमिति सिद्धं ॥ १ ॥ विद्या तयैव क्रियते भगव

पहरणेनच॥ जगाम सद्यस्तपसे स च वैश्यो महामुने टि०१२
स्रस० ॥५॥ ॥इदं श्लोकद्वयमेकान्वयं ज्ञेयं॥ हे क्रौष्टिक हे मुने
आकर्णय इति प्रागुक्तेन प्रकारेण तस्य सुमेधसो ब्र
ह्मर्षेर्वचः श्रुत्वा देवीमाराधय इति उपदेशवाक्यमाक
र्ण्य सुरथो नाम स नराधिपः तं सुमेधसं महाभागं शं
सितव्रतमृषिं प्रणिपत्य प्रणम्यैरा राज्यपुत्रमित्र
कलत्रादावतिममत्वेन अतिमोहेन भ्रातृभिः राज्या २
पहरणेन च हेतुना निर्विण्णः दुःखितमानसः सन्
२ सद्यः सपदि तपसे जगाम। तपस्तोषितदेवीवरावा
स्त्यफलोपभविष्यन् जगाम। तथा समाधिर्नामवै
श्यश्च तादृश एव सन् तपसे जगाम। भगस्यैश्वर्या
देरिदं [illegible] महत् गरीयः भागं यस्य सः महाभागः

तं। शासितं यत्नेन प्रतिपादितं व्रतं यस्य येन वा स शंसि
तव्रतः तं। धगेननूकरणे। कर्मणि क्तः। शाच्छोरन्यतरस्यां
श्यतेरित्यं व्रतेनित्यमिति नुवक्तव्यं। शंसितव्रतमितिपा
ठे तु शंसयते कर्मणि क्तः शंसा वा संजातास्य। शंसितव्र
तं शास्त्रोक्तं उपवासादि यस्य सः तं शंसु स्तुतौ। नि
र्विण्णस्योपसंख्यानमिति पाठे विदि पूलाभे। विदवि
चारणे वा क्तः निष्ठानत्वं॥ ॥संदर्शनार्थमंबायाः
नदीपुलिनसंस्थितः॥ स च वैश्य। स्तपस्तेपे देवीसू
क्तं परं जपन्॥६॥ ॥अंबायाः सर्वजनन्याः देव्याः
संदर्शनार्थं प्रत्यक्षीकरणाय नदीपुलिनसंस्थितः
नद्याः पुलिने द्वीपे तटविशेषे वा। नद्यां द्वीपं च पुलिनं
तत्र संस्थितः सः राजा सुरथः सः वैश्यश्च समाधिर्नाम

सप्तश० परं श्रेष्ठं सर्वार्थप्रदं केवलं देवीसूक्तं वैदिकमृग्विशेषमंत्रे टी०१२
देव्यधिदैवत्ते देव्या सुष्ठु शोभनमुक्तं प्रणितं। देव्यां वावि
षये सूक्तमुपदिष्टमाचार्ये राग्मीयं देवी प्रणवमृ
ग्गर्भं वा एतदेव वा चंडिका चरितत्रयं जपन्नान
पस्त्वेपेतपश्यकार। केचित्तंत्रग्रहणाद्वामाताम्ना
त् केतिमालकामंत्ररूपं देवीसूक्तमाहुः। अपरे तु
देवीसूक्तं पृथगस्तिरहस्यंतज्जपन्नित्याहुः। अ ८
८ न्ये त्वाहुः श्रुतिस्मृतिपुराणोक्तादेवीसूक्तानीति।
संस्थापारे स्थितो मतो। तपस्तपः कर्मकस्यैवेति
तपः कर्त्ता कर्मवद्भवति। उपवास। हीनितपां स्थि
तापसं तपंति। दुःखयंति। सताप स स्वगति भूतः स्व
वांछितस्वर्गाद्यर्थं तपांसितप्यंते। तपोस्युपार्जयति।

वात आङः पूर्वत्वेपि आङ् हिएहि उपएहि। इति स्थि
ते। वृद्धिं बाधित्वा ओमाङोश्चेतिपररूपत्वे सती उपे
ही सवरूपं। उपेही तितु हलत बुद्धि पाठः छांदसः क्वचि
त्कः सर्वविधये छंदसि विकल्पांत इतिवचनात्। य
यद्वा एहीत्येतद्धि मक्तिप्रतिरूपकमव्ययं पृषोदरा
दित्वाद्वा साधुः। उपएहि उपेहि महाराज राजाहस
खिक्व्यष्टचू। नपूजनापु जायांस्वतियहणं। अश्नो
ते राशुकर्मणि वरड्ड ञ्योपाधायाः परमोमि म्बरी॥ ७।
य मार्कंडेउवाच॥ मार्कंडेयो भगवान् ऋषिः स्वशिष्यं
क्रौष्टिकं मुनिं वाचमुच्चितामुचे॥ ॥त। इतित स्य
वचः श्रुत्वा सुरथः सनराधिपः। प्रणिपत्य महात्मा
गं तमृषिं शांसितव्रतं॥ निर्विण्णोतिममत्वेन राज्या

सप्तश०

पूजा नमस्या पचितिः सपर्याचार्हणाः समाः॥ पुष्पालि
धूपाः अग्नयः तर्पणानि चतेसे॥ ॥निराहारो यता
त्मा नौ तन्मनस्कौ समाहितौ। ददतुस्तौ बलिं चैव निज
गात्रासृगुक्षितं॥८॥ ॥निर्निश्रय निषधयोः निरा
हारौ हविष्यादिना तीव निश्रितावशनौ ततः क्रमशो मू
लाशनौ फलाशनौ पर्णाशनौ। अपूजस्तौ वायुभक्षौ।
ततश्च मरणं हृत निश्रयौ निराहारौ। निवारिताहारौ।
शनैः शनैः यतात्मानौ विषयेभ्यो व्यावर्त्तितमनोनेत्रा
दिस्थानेंद्रियौ निर्जितेंद्रियग्रामौ। तावज्जितेंद्रिया
नस्याद्विजितान्येंद्रियः पुमान्॥ नजयेद्रसनं याव
ज्जितं सर्वं जिते रसे। तन्मनस्कौ तस्यामेव धातुं मनो
ययोस्तौ तथोक्तौ। देवीध्यानपरौ समाहितौ। गुरूप
दिष्टार्थे सावधानौ निरस्तसंशयौ। बहुविघ्नपरिहा

रपरौ नियमपरायणौ तौ सुरथवैश्यौ। निजगात्रासृगु
क्षितं। तपश्चरणकाले परहिंसापराङ्मुखत्वात्। स्वश
रीरोद्भवसिक्तमेव असृङ्मयं बलिं च ददतुः। गुरूजं
बाहुजं वा। पिरक्तमांसमयं बलिं॥ भक्त्यावेशान्मह
न्नरो महामायार्थमुत्सृजेत्॥ चशब्दात्। निजशरीर
जं रुधिरं चंदन विलेपनं च देव्यै ददाते। एतेन शरीरं चा
पातयामि मंत्रं वा साधयामीति हठयोगः सूचितः॥ ॥
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः॥ परितुष्टा जग
द्धात्री प्रत्यक्षं प्राह चंडिका॥९॥ ॥एवमुक्तप्रकारेण
समाराधयतोः पूजयतोः त्रिभिर्वर्षैः। यतात्मनोः देव्या
मवहितचेतसोस्तयोः क्षत्रियवैश्ययोः परितुष्टा तस्मि
तेन तपसा अतिप्रीता जगतां धात्री चंडिका देवी प्रत्य
क्षं समक्षं प्रकटीभूय प्राह कथयामास। प्राहेति वि न

त्कि प्रतिरूपकमव्ययं॥ यतश्चंडिका धात्री ततस्तयोः स्त
त तपसोः प्रसन्ना बभूव अन्यथा तस्मिते न घोरेण तपसा
ग्नि नाच जगंतिदह्येरं न्ने वेति भावः॥ जगतिदधातिज
गद्धा आतोनुपसर्गेकः अन्यभ्यस्तेनेगस्त्र्य तज्ञा अ
त्रीयद्धा॥ ओहाङ्गतौ॥ जगंति जिहिते जगद्धा आतोनु
पसर्गेकः तयो होरन्यतैरस्यां वर्ग चतुर्थः अत्री संह
त्री अतएव ओहाकू स्यागे अतोपि क जगति जहीति
जगद्धात तो त्रीभा त्री॥ ॥ देव्युवाच॥ देवी चंडिका
भगवती सुरथं राजानं वैश्यं च समाधिं नाम वाचमूचे
॥ ॥ यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन॥ मत्तस्त
त्प्राप्यतां सर्वं परितुष्टा ददामि यत्॥१०॥ ॥ हे भूप
त्वयाय प्रार्थ्यते हे कुलनंदन कुलवर्द्धन वैश्य त्वया च

तपसंतापे लिटि॥ तपस्तपेन तपो र्जितवानिस्वार्थः॥ अन्यकर्त्
के ते तु उत्पति स्वर्ले स्वर्लकारः॥ ॥ तौ तस्मिन् पुलिने
देव्याः कृत्वा मूर्त्तिं महीमयीं॥ अर्हणं च क्रतुस्तस्याः
पुष्पधूपाग्नितर्पणैः॥८॥ ॥ तौ द्वौ राजा सुरथः वैश्य
श्च समाधिर्नाम तस्मिन्नद्याः पुलिने तट विशेषतोयो
त्थितं तत्पुलिनं तत्र देव्याः मूर्त्तिं आकृतिं महीमयीं॥
कृत्वा मृन्मयीं॥ [redacted] प्रतिमां विधाय॥ मयड्वैतयोर्भा
षायाम भक्ष्याच्छादनयो रिति विकारावयवयोर्महीया
मयट्॥ तस्याः देव्याः अंबिकायाः पुष्पधूपाग्नितर्पणैः
पुष्पैः धूपैः अग्निभिः अग्निकार्यैः होमैः तर्पणैश्च वि
हितैः तैः संरुचितैः अर्हणं पूजां आराधनां च क्रतुः
चक्रतेः॥ पृथक् पृथग्विधाते॥ मूर्त्तिः काठिन्यकाययोः॥

सस्य० अविभ्रंशि अविचलं राज्यं राज्ञाभावः कर्मवाराज्यं वव्रे १०
प्रार्थयामास॥ अविभ्रंशिराज्यमन्यंतर प्राप्ति साध्यं
अथच॥ अत्र अस्मिन्नपि जन्मनि अविभ्रंशि अवि
चलं राज्यं राज्ञाभावः कर्मवाराज्यं अग्रे प्रार्थयामास
अविभ्रंशिराज्यंमन्यंतर प्राप्तिसाध्यं॥ अथच॥ अ
त्र अस्मिन्नपि जन्मनि अविभ्रंशि॥ भ्रंशू अधः
पतने णिनिः नविभ्रंशः अविभ्रंशः तद्रूपं च॥ अ
त्रैवच निजेन तेग बलात् हतशत्रु बलं निजं आत्मी
यं राज्यमेव वव्रे प्रार्थयामास॥ हतशत्रुबलं बलात्
तथोक्तं॥ वृञ् वरणे कर्तरि आत्मनेपदं॥ वव्रे॥ स्थै
र्यसामर्थ्यं सोन्येषु बलं नाकाक सीरिणः॥ ॥
सोपि वैश्यस्ततो राजा ज्ञानं वव्रे निर्विण्णमानसः ॥
ममेत्यहमिति प्राज्ञः संगविच्युतिकारकं॥१२॥ ॥

ततो देविनः ततः देव्युक्तानंतरं वाप्राप्तः मोक्षकांक्षित्वा
द सोतितरां बुद्धिमान् निर्विण्णमानसः॥ संसारदुःखो
द्भवेन सः॥ सः समाधि नामवैश्यो अतिविरक्तः सन् ज्ञानं
मोक्षोद्देशं प्रार्थयामास॥ कीदृशं ज्ञानं ममेत्यहमि
त्येवं संगविच्युतिकारकं॥ ममायं पुत्रोऽहं पिता ममेदं
कलत्रं अहं भर्ता ममेदं धनमहं स्वामी तस्य स्वाध्या
सनामेनः यः संगः तस्य संगस्य विच्युतिः रक्षणं वि
लयः॥ तस्याः कारणं कारकं पलत्वं जातिमोहः संसृ
तिः अहंता च संसृतिः तद्विलयकारकं ब्रह्मज्ञानमिति
भावः॥ अतस्मिंस्तद्बुद्धिरध्यासः॥ तेन निःसंगस्यै
वा सनो ममत्वममत्वमहं तं च सर्वदुःखावहः संगः
सर्वात्मना भाव्यते॥ तस्य संगस्य परमात्मस्वब्रह्म
ज्ञानं विच्युतिकारकं भवति॥ ममता वाहंता च संगः

सं सर्गापेक्षाबुद्धिः ॥ एतज्ज्ञानं भेदनिबंधनं तस्य विच्यु टी०१३
स्वस० तिकारकं विशुद्धजनकं मोक्षाप योगिज्ञानं ॥ देव्युवाच ॥
॥ स्वल्पैरहोभिर्नृपते स्वराज्यं प्राप्स्यते भवान् ॥
नव हत्वारिपून स्खलितं तत्र भविष्यति ॥ १२ ॥ ॥ हे नृ
ते प हे सुरथ भवान स्वल्पैरहोभिर्दिनैः कतिपयैर्वासरैः
रिपून् हत्वा स्थितवतः अस्खलितं यद्विखलितं अवि
च्छिन्नं च तत् राज्यं प्राप्स्यते ॥ आपुव्या सो व्यत्ययो ब
हुलमित्यात्मनेपदं । शेषे प्रथमः । अस्खलितं तव सु
रथस्य तत्र अग्रिमे जन्मन्यपि । तव तु राज्यं भविष्यति
तवराज्यं भविष्यति । तत्र राज्यं भविष्यति इति पाठत्रयं
तत्र नगरे जन्मांतरे च ॥ १२ ॥ ॥ मृतश्च भूयः संप्रा
प्य जन्म देवाद्विवस्वतः ॥ सावर्णिकोनाम मनुर्भवा

प्रार्थ्यते याच्यते तत् त्वत्तः सर्वं मत्तः देवीतः सकाशात् प्राप्यतां
लभ्यतां अवाप्यतां अहं परितुष्टास्मि तत् त्वत्तः त्वेते च तेच
क्षत्रियाय वैश्याय च ददामि ॥ कुलस्य नंदनः वैश्यः यत्तो
सो कुलात् सकाशात् लब्धं नग्रहिष्यति मोक्षकामत्वादै
राग्यभाक्त्वादिति भावः ॥ द्वितीयार्थे प्रार्थ्यतामिति तु क्व
चित्पाठः सपुनरुक्तः प्राप्यतामिति तु पठ्यतां ॥ यद्वा
वैश्यापेक्षया न पौनरुक्त्यं त्वया त्व प्रार्थ्यतां त्वया च प्रा
र्थ्यतामिति ॥ ददामि तत् ददामि ते इति पाठद्वयं क्वापि
दृश्यते ॥ मार्कंडेय उवाच ॥ मुनिः स्वशिष्यं वाचमूचे ॥
ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥ अत्रैव च नि
जं राज्यं हतशत्रुबलं बलात् ॥ ११ ॥ ॥ ततः देवीतः तद्
व्युत्क्रमानंतरं वा नृपः सुरथः अन्यजन्मनि अन्यजन्मा
पेक्षया अन्यदपि मे भाविय ज्जन्म तस्मिन्नन्यजन्मनि

वात् प्रत्ययोत्तरपदयोश्चेति साशोभावः॥ ननु च अस्म
त्त इति बहुवचनेनोपक्रमात् प्रयच्छाम इति बहुवचनेन न १०१२
सस° भवितव्यं॥ तत्कथं प्रयच्छामी त्येकपदं स्यात्। एतदा
ह अस्मत्त इति छेदः अस्सु क्षेपणे। अस्यामि क्षिप
ति संसारं निराकरोति। अन् विधिरूपं चरस्य वि
रोधनं एतत्वात् मादृशाः॥ अयस्मपादित्वात्। भव्यात् १
१ भावानु वाद्यः॥ भावक्त कितु। वैश्यवर्यस्य यामत्तो व
रोय श्च अभिवांछितः। इत्यपपाठः। यद्वा व्यत्ययो बहु
ळामिति एकवचन बहुवचनं ततश्च अस्मत इत्येव
पाठः। वरणीयो वर्णः क्लीबे प्रधानं प्रमुख प्रवेकानु
त्तमोत्तमाः॥ तुष्टयं वरेण्याश्च प्रवहो तवराध्य्यवत्॥१५॥ ॥
मार्कंडेय उवाच॥ मुनिः स्वशिष्यं वाचमुक्तवान्॥
इति दत्वा तयो र्देवी यथाभिलषितं वरं॥ बभूवांतर्हि

ता सद्यो भक्त्या ताभ्यामभिष्टुता॥१६॥ ॥ हे कौष्टिक मह
र्षे इति प्रकारतः तयोः क्षत्रियवैश्ययोः सुरथश्च समाधि
श्च यथाभिलषितं अभिवांछितं मनति क्रम्य आमिष्टव
रं दत्वा भक्त्या ताभ्यामभिष्टुता त्वं जगतां स्त्रष्ट्री राक्षि
त्री संहर्त्री च। संस्तुता सती सद्यः सा भगवती चंडि
का सपदि अंतर्हिता बभूव। अंतर्धानमगात् अदृश्या
भूत्॥१६॥ ॥ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः॥
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः॥१७॥ ॥
हे कौष्टिक महर्षे एवं प्रागुक्त प्रकारेण सुरथः क्षत्रियर्षभः
श्रेष्ठः क्षत्रियः देव्याः भगवत्याः सकाशात् वरं लब्ध्वा प्रा
प्य इह राज्यमनुभूय ततः तनु त्यक्त्वा सवर्णायां सूर्या
द्देवात् जन्म समासाद्य संप्राप्य सावर्णिर्नाम मनुः रा
जा भुवि भविता॥ कर्त्तरि भविष्यदनद्यतने लुट्॥ नवि

ष्यतीसर्ग्ः॥ मनुरित्ययं सप्तशतिकास्वरूपो महामा टिका॰
स॰ त्रोमंत्रः सर्वेषामधीयः तांसर्वकामधुगिति सूचयि ७३
तुं अवसाने प्रयोजि भगवताश्रीमार्कंडेयेनेतिसि
द्धं॥१८॥ ॥७॥ ७॥ श्रीमद्ब्रह्मकृष्णगुरवेनमः॥
॥श्रीमत्लक्ष्मीपुरसुंदर्पेणमस्तु॥श्रीमत्जगदंबार्पण
७१ मस्तु।श्रीरस्तु॥७॥ शुभंभवतु श्री।७॥ ७॥ ७०

न्भुवि भविष्यति॥१४॥ ॥ हे भूप भवान् अतः सन्नपि एत
च्छरीरं परित्यक्तवानपि भूयः पुनरपि सूर्यात् देवात् सव
र्णायाश्च तस्त्स्याः जन्म उत्पत्तिं संप्राप्य सावर्णिकोना
म मनुः राजा भुवि भविष्यति। सावर्णिरेव सावर्णिकः
संज्ञायां कन्। वर्णेन सहिताः सवर्णाः तत्स्त्रीत्याट्कं
बाधित्वा बाह्वादि वाताद्दिञ्। सावर्णिः॥१४॥ ॥
वैश्यवर्य त्वया यश्च वरो स्मत्तोभिवांछितः॥ तं प्रयच्छा
मि संसिध्यै तव ज्ञानं भविष्यति॥१५॥ ॥ हे वैश्य हे वर्य
यद्वा हे वैश्यवर्य वैश्येषु श्रेष्ठ त्वया अस्मत्तः देवीतः
यः वरः अभिवांछितः अस्मित वरं संसिध्यै परमा
स॰ ६० त्मस्वरूपसंगत्यै प्रयच्छामि। ततश्च वरप्रदानतः
तव ज्ञानं भविष्यति। मोक्षे धीर्ज्ञानमुच्यते। अस्म
त् इति पंचमी। बहुवचनस्य तत्। अतश्चैकत्वोऽना

द्विनंदनृपशाके च १६९२ विरोधिकृत वत्सरे ॥ मार्गेश्वरे
कृष्णपक्षे द्वितीया भौमवासरे ॥ महाराजा देवा[illegible]जे
नैवाल्लिखितं रघुशर्मणे ॥ परोपकारायस्वार्थाय शु
भदं भवसर्वदा ॥ ॥ आमर्दकस्थवासी हरकोपनाम्न
स्येदं सप्तशती सटीक पुस्तकं समाप्तमगमत् ॥ ॥

सप्तशती

टीका॰ ९३

10 (L)

10

B X (✓)

SANSKRIT

११ छ ॥ इदं सप्तशतीसटीकं पुस्तकं स्वमास्तंभवालि ॥ छ ॥ छ ॥ ११